(G) 4983 Years of kaliage passed away, after 155 samvatsars, and after 1084 years of shaka era, Three lakhs cow, and sixteen villages, one lakh Brahmins were fed every year. In eight autumn seasons, eight types of marriages as well as the sacred thread ceremony

is performed to Brahmins on the eigth year, to Kshatriya on eleventh and to Vaishya on the twelfth year.

(H) Give synonyms fcr words given below :

चक्रम्, प्रभावः, मूर्च्छा, शोक, युद्ध, वियोग, अपराध, कण आर्द्र, वीर्य, तृष्णा, तेजः वधः स्वजन, स्वेद, प्रीति, उपाधि, अब्द, ईषद्. अमर्षण, रक्षित.

एकचत्वारिंशः पाठः ॥

(Lesson forty first)

व्यंजनान्त-नामानि ।

Before terminations beginning with vowels. the final consonants at the end of a word च्, छ्, ज्, श्, ष्, स् and क्ष do not change but before terminations beginning with consonants च् and ज् are changed to क् or ग् and छ्, श्, ष् are changed to ट्, ड् .

Exceptions–But व्रश्च, भ्रश्च, सृज्, मृज्, यज्, राज्, भ्राज् and परिव्राज् change their final ज् to ष् and then ट् or ड् (क) In दिश्, दृश् and स्पृश् change श् to क् or ग् according to Sandhi–rules and नश् changes optionally to क् or ग् and ट् or ड् both. In the same तक्ष् and गोरक्ष् change their final क्ष to ट् or ड्. (व्रश्चभ्रस्ज्सृज्मृजयजराजभ्राज्च्छशां षः)

–Examples–

(१) स्त्रज् (F) प्र. स्त्रक्-ग्, स्त्रजौ स्त्रजः । स्त्रजम् स्त्रजौ स्त्रजः । स्त्रजा स्त्रग्भ्याम्-भिः । स्त्रजे स्त्रग्भ्याम्-भ्यः । स्त्रजि स्त्रजोः स्त्रक्षु ।

(२) राज्-(M) राट्-ड राजौ राजः । तृ राजा राड्भ्याम् राड्भिः । स राजि राजोः राट्सु-राट्त्सु । Before स् and after ट् we have to add त् optionally.

(३) विश् (F वैश्य) विट्-ड् विशौ विशः। तृ विशा विड्भ्याम्-भिः। स. विशि विट्सु-विट्त्सु। श् is changed to ष् and then to ट्.

(४) प्रावृष् (स्त्री) प्र. प्रावृट्-ड् प्रावृषौ-षः। तृ प्रावृषा-प्रावृड्भ्याम्-भिः। स प्रावृषि-प्रावृट्सु-ट्त्सु।

*( ) दिश् (स्त्री) प्र दिक्-ग्, दिशौ दिशः। तृ दिशा दिग्भ्याम्-भिः। स दिशि दिशोः दिक्षु।

(9) सदृश् (Adj. neuter) सदृक्-ग, सदृशी, सदृंशि।

(A) Words ending in स before terminations ending in अस् have been learnt by us. Now we shall see words ending in स्. Forms of these nouns are the same in masculine as well as Fem. and in neuter gender. Nom. and Acc. Vocative. the Penultimate vowel is lengthened in plurals.

(B) Those nouns which end in अस् or आस do not change before terminations beginniug with vowels and before those that beginning with consonants, the final स् is changed according to samdhi rules.

(C) When इस्. उस् and ओम् at the end of nouns change their स् to ष् before vowel terminations. According to samdhi rules स् is changed र् before soft consonants and before सु it is changed to विसर्ग or ष् optionally and स् is changed ष् acc. to rules mentioned before. वाच्+सु= वाक्+सु+षु=वाक्षु। वार्+सु=वार्षु। कर्तृषु, अर्चिष्षु-ःषु। ज्योतींषि अर्चिष्मत्, श्रोष्यति, कुरुष्व, but रामासु कर्मसु, पुंसु।

Examples

(१) भास-(F) भाः भासौ भासः। भासम्। तृ. भासा भाभ्याम् भाभिः। च. भासे......। पं. भासः भासोः भासाम्। भासि भास्सु-भाःसु।

*(ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'—एभ्यः क्विन्–युजेरसमासे क्विन्प्रत्ययस्य कुः, कवर्गो अन्तादेशः स्यात्पदान्ते)

(२) अर्चिस् (N) प्र. द्वि, अर्चिः अर्चिषी, अर्चींषि। तृ. अर्चिषा अर्चिर्भ्याम्, अर्चिर्भिः। च. अर्चिषे पं. अर्चिषः। ष. अर्चिषः अर्चिषाम्। स. अर्चिषि-अर्चिःषु-अर्चिष्षु। ('सान्त महतः संयोगस्य अनेन दीर्घः 'नुम् विसर्जनीयः' शब्दव्यवायेऽपि अनेन षकार).

(३) उदर्चिस्-(वि.) प्र. पुं. स्त्री.)-उदर्चिः उदर्चिषौ। From तृ. according to अर्चिस्

(४) आयुस् (न.) प्र. द्वि. आयुः आयुषी, आयूंषि। आयुषा आयुर्भ्याम्। स. आयुषि-आयुष्षु-ःषु।

*(भिषज्, वणिज्, रुज् (F) ऋत्विज्, (M) अहिभुज्, शुच् (F) ऋच् जलमुच् (M) दृश्, विचिश्, मर्मस्पृश् (Adj) (In these ज is changed to क्-ग्।) विश्वसृज् (M) परिव्राज्, देवेज्, विभ्राज्, सम्राज्, द्विष्, त्विष् (F) रुष्, तृष् and सुगद्विष् (In these ष् is changed to ट् ड्).

(5) शतायुस् (Adj) शतायुः शतायुषौ-

from instrumental onwards like आयुस. Similarly ज्योतिस् (M.) दोस् (M.) अचक्षुस् (Adj) and neuter nouns हविस्, यजुस्, धनुस्, etc. The ending इस् of the noun आशिस् and the final उस् of word सजुस् are lengthened before consonantal terminations-आशीः, सजूः आशीर्भ्याम्, सजूर्भ्याम् आशीष्षु, आशीःषु, सजूष्षु:षु-षु (शसिवसिघसीनां च इति सस्य षः) in the same way पिपठिष्, चिकीर्ष, सुपिस् (walking well) सुतस् (one who cuts) गिर् धुर्, पुर् these words lengthen their इ and उ before consonantal terminations. प्र. गीः गिरौ गिरः तृ. गिरा गीर्भ्याम् गीर्षु। पिपठीः पिपठिषौ पिपिठिषः। पिपठीष्षु-ःषु (र्वोरुपधाया दीर्घ इकः नुम् विसर्जनीय शर्व्यवायेऽपि.)

Rule : (1) If there is ह् at the end of a word and a consonant except a nasal and semivowel following it, is changed to ढ् (हो ढः) (2) A noun beginning with द् and has ह् at the end changes it to घ् following the above said consonantal termination. (3) when in द्रुह्,

मुह्, स्नुह् स्निह् the ह् is changed optionally to घ् or ढ् वा द्रुहमुहष्णुहष्णिहाम् (4) If the noun ending with the verb नह्, ह् changes to ध (नहो धः) (5) ह् of उष्णिह् is changed to क्. (6) when a word has its first letter of the verb ब्, ग्, द् and ends in the fourth of any class (भ्, घ्, ध्, ढ्) is replaced by the forth letter of the class if it is followed by (झ) अन्ति, ष् स् and ध्व.

(एकाचो बशो भष् झषन्तस्यध्वोः)

Examples

(१) वीरुध् (F) प्र. वीरुत्-द् वीरुधौ-तृ. वीरुधा वीरुद्भयाम्। स० वीरुधि वीरुत्सु। (२) ककुभ् (F) ककुभ-ब्। तृ. ककुभा ककुब्भ्याम् ककुब्भिः। स. ककुभि। (द) मधुलिह् (पुं) मधुलिट्-ड् मधुलिहौ तृ. मधुलिहा मधुलिड्भ्याम्। स. मधुलिहि मधुलिट्सु-त्सु। (ह् is changed to ढ् and to ट् and-ड्) (४) उपानह् (स्त्री) प्र. उपानत्-द् उपानहौ। तृ. उपानहा-नद्भ्याम्। स. उपानहि-त्सु (नहो धः) (Rule No. 4)

(५) कामदुह् (M-F) कामधुक्-ग्, दुहौ, दुहः। तृ. कामदुहा धुग्भ्याम्-धुग्भिः। स. कामदुहि कामधुक्षु। (Rule No. 2 and 5) (कामदुह्-कामधुक्षु। कामधुक्-ग्, कामधुक्-सु, कामधुक्-षु-कामधुक्षु।)

(६) क्रुध्, युध् क्षुद् समिध् (F) etc. according to वीरुध्. voc. is according to Nom.

(७) अनडुह्-अनड्वान्, अनड्वाहौः अनड्वाहः। मुह् मुक्-द् मुहौ मुग्भ्याम्-ड्भ्याम्, मुक्षु मुह्सु-ट्त्सु, स्निह्-स्निक्-ट in this way स्नुह्, नश्, दुह् (धुक्-ट्) गुह् (घुट्-गुहौ) द्रुह्, बुध् (भुत्) गोरक्ष् गोरक्-ट्, तक्ष् (तक्-ट्) तग्भ्याम्-ड्भ्याम्। तक्षु-ट्सु-ट्त्सु।

(चतुरनडुहोरामुदात्तः—सावनडुहा अस्य नुम् स्यात् सौ परे) forms of neuter-प्र. द्वि. सं.

घृतस्पृश्-घृतस्पृक् घृतस्पृशी घृतस्पृंशि । सत्यवाच्-सत्यवाक् सत्यवाची सत्यवाञ्चि । लिहे-लिट् लिही लिंहि । दधृष्-दधृक दधृषी दधृंषि मुह्-मुक्-ट् मुही मुंहि । बुध्-भुज्-क् बुधी बुंधि । विश्वसृज्-विश्वसृट् विश्वसृजी विश्वसृञ्जि । प्राश्-प्राट् प्रांशी-प्राच्छी प्राञ्शि प्राञ्छि ।

Irregular names.

स्रंस् (to fall) ध्वंस् , सुहिंस् जिघांस् (desire to kill)

स्रस् (M) स्रन् स्रसौ स्रसा स्रसा स्रद्भ्याम् स्रत्सु । (Here स् is changed to त् before consonants.

ध्वस्-ध्वन् ध्वसौ ध्वसा ध्वद्भयाम् ध्वत्सु ।

सुहिंस्-सुहिंन् सुहिंसौ सुहिंसः । सुहिंसा सुहिन्भ्याम् । सुहिन्सु ।(Here स् is changed to न्)

जिघांस् - जिघांन् जिघांसौ । जिघांसा जिन्भ्याम् जिघान्सु ।

प्र. सं. द्वि. (N) स्रन् स्रसी स्रंसि । ध्वस् ध्वन् ध्वसी ध्वंसि । (The remaining like masculine)

सुहिन् सुहिंसी सुहिंसी । (वसुस्रंसुध्वंस्वनडुहां दः)

पुंस् (M) a man

प्र.	पुमान्	पुमांसौ	पुमांसः
द्वि.	पुमांसम्	,,	पुंसः ।
तृ.	पुंसा	पुंभ्याम्	पुंभिः ।
च	पुंसे	,,	पुम्भ्यः ।
प.	पुंसः	पुम्भ्याम्	पुम्भ्यः ।
ष.	पुंसः	पुंसोः	पुंसाम् ।
स.	पुंसि	"	पुंसु ।
प्र. सं. द्वि.			

(पुंसोऽसुङ्)

सुपुंसम् (N.) (शोभनाः पुमांसः यस्मिन्)
सुपुंसम् सुपुंसी सुपुमांसि । the remaining are like masculine

(५) पाद, दन्त, नासिका, मास, हृदय (N) निशा असृज् यूष, दोस् , यकृत् , उदक् , आस्य, मांस, पृतना, (सेना), सानु, शकृत् उदक, आस्य etc. optionally become पद् , दत् , निस , मास , हृद् ; निश

असन् यूषन्, दोषन्, यकृन्, शकन्, आसन्, मांस्, पृत् and नु etc. are having the double forms from Acc. plural.

(१) पद् (M.) पादः पादौ पादाः। पादम्+पादौ पदः। पदा पद्भ्याम् पद्भिः। पदोः पदाम्। पदि पदोः पत्सु। द्विपाद, चतुष्पाद, सुपाद, from Acc. plu. and (भ संज्ञा) द्विपद्, चतुष्पद् सुपद् become optionally in Fem. द्विपदी चतुष्पदी सुपदी and forms acc. to नदी। सुपात्–द् सुपादौ द्वि व. व. सुपदः remaining acc. to पद् (पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छत्प्रभृतिषु)।

(२) दत् (M.) तृ. दता दद्भ्याम्। दते। दतः। दति–दत्सु।

(३) नस् (F.) तृ. नसा नोभ्याम्। नसे। नसः। नसि नस्सु नःसु।

(४) मास् (M.) तृ. मासा माभ्याम्। मासे मासः। मासि मास्सु–सु।

(५) हृद् (N.) द्वि. हृदयम् हृदये हृन्दि। हृदा। हृदे। हृदि हृत्सु।

(६) निश् (F.) द्वि. निशः। निशा निड्भ्याम्। निशः। निशि निशोः निट्सु–त्सु।

(७) असृज् (न.) असृक् –ग् असृजी असृञ्जि। असानि। अस्ना असभ्याम्। अस्ने। अस्नः। अस्नि–असनि असस्सु।

(८) यूषन् (M.) यूषः यूषौ। यूषम् यूष्णः। यूष्णा यूषभ्याम्। यूष्णि–षणि यूष्णोः यूषसु।

(९) दोस् (दोषन्) (M.) प्र. दोः दोषौ दोषः। दोष्णः। दोष्णा दोर्भ्याम्। दोष्णि। दोष्षु–ःषु। दोषन् (N.) दोः दोषी दोंषि दोषाणि।

(१०) यकृत् (N.) यकृत्–द् यकृती यकृन्ति। यक्ना यकभ्याम्। स. यक्नि–यकनि यक्नोः यकसु। The form of शकन् are also the same.

(११) उदन् (N.) उदकम् उदकानि–उदानि। तृ. उन्दा। उन्दि–उदनि। उदाभ्याम्। उन्दाम्। उन्दि–उदनि–उदसु।

(१२) आस्य (N.) आस्यम्। द्वि आसानि। आस्ने। आस्नि आसनि–आससु। आसभ्याम्। आस्नः–आस्नोः। आस्नाम्।

(१३) मांस (N.) प्र. मांसम् । मांसि । मांसा मान्भिः । मांस मान्सु-मान्त्सु । मान्भ्याम् । मांसोः मांसाम् ।

(१४) पृतना (F.) द्वि. पृतनाम् पृतनाः-पृतः । तृ. पृता पृद्भिः । स. पृति पृतोः पृत्सु । पृतः पृतोः पृताम् ।

(१५) सानु (M.) द्वि. सानुम् सानू सानून् । स्नून् । स्नुना । स्नेव । सानोः स्नोः । स्न्वोः स्नूनाम् । स्नौ स्न्वोः स्नुषु ।

सानु. (N.) सानु सानुनि सानूनि । सानु सानूनि-स्नूनि । सानुना-स्नुना । स्नुभ्याम् । स्नुनः स्नुनोः सानूनाम्-स्नूनाम् ।

Rule (6) प्राक्, प्रत्यच्, उदच्, अवाच्, सम्यच् and तिर्यच् take a nasal in the first five terminations (अंगसंज्ञा) in masculine (अनिदितां हल उपधायाः (प्र अञ्चू.) प्राङ्, प्रत्यङ्, उदङ्. अवाङ्. सम्यङ्, अचोङ् तिर्यङ् are the first (nom sing) forms. From Acc Plural on wards before vowel terminations and in neuter Nom Acc. dual and Acc. Plural are respectively प्रत्य उद, सम्य, तिर्य become प्रती, उदी, समी and तिरश्. तिर्यङ् (M.) प्र. तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । द्वि. तिर्यञ्चम् तिरश्चः । तृ. तिरश्चा तिर्यग्भ्याम् । N. प्र. द्वि. सं. तिर्यक्-ग् तिरश्ची तिर्यञ्चि । and in Feminine they become प्राची, प्रतीची, उदीची, समीची and तिरश्ची । प्राक्-प्राङ् प्राञ्चौ प्राञ्चः । प्राञ्चम् प्राचः । प्राचा । प्राक्षु । The noun अप (Fem) water is always declined in Plural and becomes आपः. Acc अपः Just अद्भिः अद्भयः, अपाम्, अप्सु । (आ तृनन्तृस्वसृनप्तृ अपो-भि)

प्राञ्च् (M.) (East)				प्रत्यञ्च् (M.) (west)		
प्र. सं.	प्राङ्	प्राञ्चौ	प्राः	। प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः ।
द्वि.	प्राञ्चम्	,,	प्रायः	। प्रत्यञ्चम्	,,	प्रतीचः ।
तृ.	प्राचा	प्राग्भ्यामू	प्राग्भिः	। प्रतीचा	प्रत्यग्भ्याम्	प्रत्यग्भिः ।
च.	प्राचे	,,	प्राग्भ्यः	। प्रतीचे	,,	प्रत्यग्भ्यः ।
पं.	प्राचः	,,	,,	प्रतीचः	,,	,,
ष.	,,	प्रायोः	प्रत्याम् ।	प्रतीचोः		प्रतीचाम् ।
सं	प्राचि	,,	प्राक्षु ।	प्रतीचि	प्रतीचोः	प्रत्यक्षु ।

Forms of neuter gender

तिर्यञ्च (पुं.) (going a way) प्राक् प्राची प्राञ्चि ।
प्र. सं. तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । प्रत्यक् प्रतीचि प्रत्यञ्चि ।
द्वि. तिर्यञ्चम् ,, तिरश्चः । तिर्यक् तिरश्ची तिर्यञ्चि ।
तृ. तिरश्चा तिर्यग्भ्याम् तिर्यग्भिः । सम्यक् समीची सम्यञ्चि ।
सं, तिरश्चि तिरश्चोः तिर्यक्षु । उदक् उदीचि उदञ्चि ।

संस्कृत–वाक्यानि

(१) समुद्रः लवणवारां महाराशिः । (२) अस्य भूपतेर्दिशि दिशि महिमा श्रूयते । (३) द्विड्भिरभिभूता देवा विश्वसृजं शरणमगच्छत् । (४) सर्पिषा हुतभुक् तृप्यति ऋत्विजस्तमृग्भिरुपतिष्ठन्ते । (५) भिषग्भिरादिष्टा उपचारा व्याधिताय नारोचन्त । (६) प्रतिनिवर्तमाने मार्गे दिलीपः कामदुहम् वन्दितुम् व्यस्मरत अतः सा तमशपत् । (७) इयम् धूः वृषाभ्याम् वोढुम् न गुर्वी । (८) शूर्पणखायाः नासिका लक्ष्मणेन कर्तित्वा सा च विसृष्टा । (९) धनुषि बाणमारोप्य सः नेतारमविध्यत । (१०) नरस्य आयुः स्वल्पम् किंतु शिक्षा अनन्तापारा । (११) पुरोहिताः वधूवरयोः विवाहे ताभ्याम् आशींषि प्रयच्छन्ति । (१२) देवमूर्तिम् पूजयितुम् पुष्पैः पर्णैः च रचिताः स्रजः । (१३) यो भूपतिः सुहृदो वचांस्यवमत्य दुर्मन्त्रिणां वशे तिष्ठति स नूनं विद्वद्भिः परिभूयते । (१४) शरदि तु प्रायो विमलं नभो भवति चन्द्रमसो रुचिरया भासा च मनस आह्लादो जायते । (१५) यदा महान्वैयाकरणः पाणिनिः समजायत तदा व्याकरणविषये प्राचां कानिचिन्मतानि प्रतीचां मतेभ्यो भिन्नान्यासन् । (१६) नित्यं भस्मनावलिप्तं वपुर्वक्षसि मुण्डैः रचिताः स्रजो व्याघ्राणां कृत्तय एव वासांसीत्येवं शंकरस्य रूपं वर्णयन्ति कवयः । (१७) दोष्णां सहस्रं कार्तवीर्यस्य परशुरामोऽकृन्तत् । (१८) मधुलिड्भिराक्रान्तानि वीरुधां कुसुमानि सविशेषं शोभन्ते । (१९) एकदा नैषध उपानहौ विसृज्य मन्दं मन्दमुपसृत्य हंसं सहसैव पक्षयोर्गृहीतवान् । (२०) पुरा मयेन निर्मितास्तिस्रः पुरः । शम्भुरदहत्तेनासौ त्रिपुरदहन इति विश्रुतः ॥

(२१) अवश्यं नश्वरे देहे दुर्दमे च यमे द्विषि ।
हास्यं नास्याद्विनिर्याति यत्पुंसामिदमद्भुतम् ॥

(२२) अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ ।
पथि संगतमेवैतद् भ्राता माता पिता सखा ॥

(२३) वृश्चिकानां भुजङ्गानां दुर्जनानां च वेधसा ।
विभज्य नियतं न्यस्तं विषं पुच्छे मुखे हृदि ॥

(२४) मानुषाणां प्रमाणं स्याद्भुक्तिर्वै दशवार्षिकी ।
विहंगानां तिरश्चां च यावदेव समाश्रयः ॥

—: शब्दकोश :—

वार्-(न.) water पानी

लवण-क्षार (पुं.) salty water खारा पानी

दिश्-दिशा (स्त्री.) direction, quarter. दिशा

द्विष्-विद्विष् (पुं.) enemy शत्रु

विश्वसृज् (पुं.) creator सर्जनहार, ब्रह्मा।

ऋत्विज् (पुं) sacrificer, a priest पुरोहित,

हुतभुज् (पुं) fire अग्नि.

सर्पिस् (न.) clarified butter

ऋच् (स्त्री) a hymn मन्त्र

उप+स्था (१. आ) to worship उपासना करना

भिषज् (पुं.) a physician वैद्य

आदिष्ट (आ+दिश्) to be prescribed, ordered. आदेश करना.

उपचार (पुं.) treatment, medicine. उपचार.

व्याधित (वि) diseased, sick रोगी, मरिज.

आयुस् (न.) duration of life आयु.

कामदुह्-(कामधुक्-ग्) (स्त्री) wish yielding celestial cow कामधेनु.

धुर् (स्त्री.) a yoke, responsibility उत्तरदायित्व.

कर्तित्वा (कृन्त ६. प.) by killing, cutting मारकर.

विसृज्य (वि+सृज्) by abandoning त्यागकर.

अनन्तपार (वि.) endless, अनन्त

आशिस (स्त्री.) a blessing आशीर्वाद.

स्रज् (स्त्री.) a garland पुष्पकी माला.

प्राश्च् (वि.) eastern direction पूर्वदिशा. (प्राची–स्त्री)

प्रत्यच् (वि.) western direction पश्चिम दिशा, प्रतीची (स्त्री)

अवमत्य (अव+मन्) despised उपेक्षा करके.

दुर्मन्त्रिन् (पु.) evil councillore दुष्ट मन्त्री.

परि+भू (१. प.) to despise, subdue तिरस्कार करना.

भा–भास् (स्त्री) light, lustur, प्रकाश, तेज.

अवलिप्त (अव+लिप्–भू. कृ.) annoited smeared, लेपन किया हुआ

मुण्ड (न.) shaved head मस्तक,

कृति (स्त्री) skin चमडी.

दोषन् (दोस्) (पु. न) hand, the arm हाथ,

मधुलिह् (पु.) bee भ्रमर

आक्रान्त (आ+क्रम् भू कृ.) crowded, इकट्ठे हुए

वीरूध् (स्त्री) creeper लता

उपसृत्य (उप+सृ) approached पासमें जाकर.

सहसा (अ) suddenly एक साथ,

निर्मित (निर्+मा भू. कृ.) made, created बना हुआ.

विश्रुतः–renowned–प्रख्यात.

दुर्दम (वि.) difficult to be controlled कठिनतासे वश करना.

पुंस्–(पुं.) man मनुष्य

वि+निस्+या–to go away, disappear चले जाना.

द्विष्–an enemy विद्विष् (पुं.) दुश्मन.

प्रियसंवास–(पु.)the company of beloved person (पु) प्रियका समागम.

चक्रवर्त्तौ–ever revolving world–चक्रके समान फिरनेवाला

प्रसंगत (न.) company संगति

वेधस् (पु) creater ब्रह्मा.

विभज्य–(वि+भञ्ज्) divided विभाग करके

न्यस्तम्–(नि+अस्) Put in रखा हुआ

भू. कृ. put it रखा हुआ

भुक्ति (स्त्री.) ownership भोगनेवाला मालिकी

पुर् (स्त्री.) town नगर

तिर्यञ्च् (पु) lower animal निम्न प्राणी

(वि.) sideways तिरछी
समाश्रय (पु॑) occupy a certain place. साथ में रहना
माहेमन्–वि. महिमा. greatness
आयुस् (न) span of life आयुष्य
दृश् (स्त्री.) eye आँख
शुष् (स्त्री.) grief शोक
ताम्र (वि) red रक्त
पथ्य (न.) wholesomcness पथ्य
रुज्–(स्त्री.) pain, disease रोग दुःख
बि+वृध्(१.आ.)-to increase वढना
वम् (१. प.) to vomit वमन करना
त्वच्–(स्त्री.) skin त्वचा,
परि+धृ (१० उ.) to wear धारण करना
सानु (स्नु–पुं न.) summit पर्वतका शिखर
असन्+असृज्–blood असृष्ट (न) लहू
द्वार्–(स्त्री.) gate दरवाजा
संनिहित (वि.) in near, close by नजदीकमें
अनु+इष् (४. प.) to seek, to search खोजना
युध्–(स्त्री.) fight युद्ध
पृत्-पृतना (स्त्री.) army सेना
मुदित (वि.) pleased खुश होकर

गिर्–(स्त्री.) speech वाणी
वि+सृज् (६. प.) to abandon त्याग करना
क्रुध्–(स्त्री.) anger क्रोध
हविस् (न) oblation बलि
निश्–निशा–(स्त्री.) night रात्रि
ईदृश् (वि.) such ऐसा
अश्रूयत–श्रृ. श्रृ. (५ प.) कर्मणि ह्यस्तनभूत सुना heard
नासिका–नस् (स्त्री.) नाक nose
उदर्चिस् (वि.) blazing fire अग्निकी ज्वाला
उदच् (वि.) northen dlirection उत्तर दिशा, (उदीची स्त्री.)
अवाच् (वि.) southern direction दक्षिण दिशा
अमानुष (वि.) inhuman मानवतासे रहित
आसन्–आस्य (न.) mouth मुख
भूतजात (न.) the whole living creation जीवमात्र
मूर्ति (स्त्री.) an idol मूर्ति
ऋच् (स्त्री.) a hymn of Rigveda वेदकी ऋचा,
त्रिपुरदहन (पु॑.) burning of three cities, (lord Shiva) तीन पुरों के दहन करनेवाला.
निष्पाप-(पु॑.) sinless fellow पापरहित

(1A) Translate into Sanskrit :

The greatness of this king is heard of in all quarters of the earth. (2) Markendaya won a long life by practicing peneace for a long life. (3) The two eyes of the girls became red by heat (4) He does not observe restrictions in diet in illness, So his disease has increased. (5) The cloud drinks salt water and vomits it. (6) In ancient times sages used to wear tree barks. (7) The flowers on creepers which are surrounded by bees, look charming. (8) A big army stands on a the summits. of mountain. (9) On the battlefield, the drops of blood on the soldiers is seen here and there. (10) Thirsty travellers, leaving aside sea water nearby, are searching wells. (11) Having deafted the Kaurvas in battle, the Pandavas won the kingdom. (12) On hearing the sweet voice of bird, the king was pleased and became free from wrath and released him.

स्वाध्याय (Exercise)

(1B) Fill in the blanks with suitable forms of words given :

(१) अग्निर्देवानां मुखं यस्मिन्हुतेन______ देवास्तुष्यन्ति। (हविस्) (२) ______,______नभः आक्रम्यते ज्योतींषि च न विराजन्ते। (प्रावृष्, जलमुच्) (३) ______, ______ , ______ बहिर्गन्तुम् न युज्यते (निश्, ईदृश्, तमस्) (४) तस्य ______,______ , रत्नैः वस्त्रैः च भूष्यते (वपुस्, भास्वत्) (५) सर्वासु ______,______,______ गुञ्जितम् पुष्पेषु अश्रूयत। (ककुभ्, मधुलिह्, वीरुध्), (६)______ विना वन्यप्रदेशे न भ्रमतु। (उपानह्) (७) क्षिप हवींषि______। (उदर्चिस्) (८) पुष्पैः पर्णैः च देवमूर्तिं पूजयितुम्______ रचिताः। (स्रज्) (९) साधवः न तु केवलम्______विमलाः किंतु ______ अपि निष्पापाः। (हृद्, गिर्), (१०) ______जनाः दास्यम् अमानुषममन्यन्यत तद् उन्मूलयितुम् ______ जनैः सहायुध्यन्त। (उदच् अवाच्।)

(C) Form the compounds and name them :

(१) द्विड्भिरभिभूता, (२) विश्वम् सृजति, (३) भिषग्भिरादिष्टा । (५) भस्मनावलिप्तम् । (६) व्याघ्राणाम् कृत्तयः (७) शंकरस्य रूपम्, (८) वीरुधाम् कुसुमानि (९) तिस्रः पुरः (१०) मानस्य उन्नतिम् (११) असनाम् विन्दवः (१२) बालानाम् दृशौ, (१३) वृक्षाणाम् त्वचः (१४) नगर्याः द्वारे (१५) पक्षिणः मधुरया गिरा, (१६) देवानाम् मुखम् ।

(D) Dissolve the compounds given below :

(१) लावणवाराम्, (२) महाराशिः (३) दुर्मन्त्रिणाम्, (४) त्रिपुर-दहन, (५) दुर्दमे (६) दुर्जनानाम्, (७) संसृतिगर्ता, (८) देवमूर्तिम्, (९) दीर्घायुः (१०) मधुलिहाक्रान्तानि, (११) पर्वतसानुनि, (१२) वार्निधिः (१३) सत्संगतिः (१४) मुदितराजः (१५) भास्वत्रत्नानि (१६) महा-वैयाकरणः ।

(E) Recognise the forms given below :

कामदुहम्, स्रजः, आयुः, शरदि, दोष्णाम्, मधुलिड्भिः उपानहौ, पुंसाम्, द्विपि, हृत्सु, शुना, आशिषः, निशि, हवींषि, जलमुग्भिः, गीर्षु ।

(F) Give the forms of the words given belows :

(१) प्र. ए. व -स्रज्, सुरद्विष्, भास्, द्वार्, वीरुध, उपानह्, मुह, स्निह, पुंस्, ध्वंस् ।

(२) द्वि, ब. व.–प्रावृष्, अहिभुज्, अर्चिस्, आयुस्, विश्वसृज्, पुंस्, निश्, दोषन्, उदन् (न.) आसन् ।

(३) स. ब. व,–राज्, दिश्, परिव्राज्, सुरद्विष्, उदर्चिस्, ककुभ् कामदुह्, नश्, स्नुह् पाद्, नस्, यकृन् ।

(G) Give synonyms of Sk. wosds given below :

ऋत्विज्, ऋक्, भिषग्, व्याधित, वधू, वर, वीरुत्, उपानह्, हृदय, शकृत्, यकृत्, प्रायी, पुरम्, हास्यम्; वृश्चिक, पुच्छ, ज्योतिष् ।

द्वाचत्वारिंशः पाठः । Lesson Forty Two

स्वरान्त–अनियमितनामानि

(१) पति (पुं.)—प्र. पतिः पती पतयः । तृ. ए. व. पत्या च, पत्ये पं. पत्युः पतीनाम्, स. पत्यौ पत्योः पतिषु, सं. पते पती पतयः ।

*(२) सखि (पु) प्र. सखा सखायौ सखायः । द्वि. सखायम् सखीन् तृ. सख्या च सख्ये, पं. सख्युः च. सख्युः सख्योः सखीनाम्, स. सख्यौ सं. सखे । (2) Words of compounds like भूपति, लक्ष्मीपति are declined like हरि (पतिः त्रयः समास एवं) प्रियः प्रियत्रि is also declined (प्रियः त्रयः) like हरि (पुं.) मति (स्त्री) । सुसखि (शोभनः सखा) अतिसखि–(अतिशयितः सखा) परमसखा परमः सखा are declined in nom, acc. and voc. like सखि and others like हरिः–सखी (Fem.) पत्नी (Fem.) are declined like नदी.

(३) गौ (स्त्री.) गाय — दिव् (स्त्री) स्वर्ग

प्र. सं.	गौः गावौ गावः	द्यौः दिवौ दिवः ।
द्वि	गाम् ,, गाः	दिवम् ,, ,, ।
तृ.	गवा गोभ्याम् गोभिः	दिवा द्युभ्याम् द्युभिः ।
च.	गवे गोभ्याम् गोभ्यः	दिवे ,, द्युभ्यः
प.	गोः ,, ,,	दिवः ,, ,,
ष.	,, गवोः ,, गवाम्	,, दिवोः दिवाम्
स.	गवि गवोः गोषु	दिवि ,, द्युषु ।

(गोतो णित् आतोऽमशसोः)

द्यो (स्त्री) स्वर्ग is declined like द्यौः द्यावौ द्यौः (दिव औत्–दिव उत्) (दिव्–औ–दि औ=द्यौः दिव्+भ्याम् दि उ भ्याम्=द्युभ्याम् प्रद्यो (न.) प्रद्यु is declined like मधु. ग्लौ (पुं) moon, नौ (स्त्री.)

---

(२) सखा—सखि–स्, अनङ् सौ) (सर्वनामस्थाने, चासम्बुद्धौ) 'सखान् स्' 'हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति, सस्य लोपे 'सखान्' 'न लोपः प्रातिपदिकान्तस्य' इति न लोपे 'सखा' इति रूपम् ।)

(२) सखायो–('सख्युरसम्बुद्धौ' 'अचोऽञ्णिति') सखि–औ सखै, औ, सखायौ।

(३) सखीन्–'प्रथमयोः पूर्वसवर्णः दीर्घः (तस्माच्छसो नः पुंसि')–सखीन् ।

(४) सख्यु –('ख्यत्यात्परस्य'–'सख्युः' ।) (५) सख्यौ–ङे (औत्)

boat प्र. सं. नौः नावौ नावः। द्वि. नावम्-तृ. नावा नौभ्याम्-च. नावे पं. नौः स. नावि नावोः नौषु । ग्लौ-प्र. सं. ग्लौः ग्लावौ ग्लावः । पं. ग्लावः ग्लावोः,। रै (स्त्री) (wealth) रै becomes रा before consonant terminations प्र.सं. रायौ रायः। रायम् तृ. राया राभ्याम् यः राये पं. ष. रायः।

(४) जरा (F) old age निर्जर (M) a god अजर (वि.) one without old age, optionally assume the forms जरस् निर्जरस् and अजरस् before vowel terminations. (जराया जरसन्यतरस्याम्)

प्र. जरा-जरे जरसौ जराः-जरसः। द्वि. जराम्-जरसम्, तृ. जरया-जरसा जराभ्याम्, च. जरायै-जरसे, पं. जरायाः जरसः ष. जरयोः-जरसोः जराणाम्-जरसाम् । स. जरायाम्-जरसि-जरासु। सं. जरे. जरे-जरसौ। Decline निर्जर, अजर like राम and चन्द्रमस् प्र. निर्जरः निर्जरौ-निर्जरसौ। द्वि. निर्जरान्, तृ. निर्जरेण, सा च. निर्जराय-से, पं. निर्जरात् -सः-ष. निर्जरस्य निर्जराणाम्-रसाम् । स. निर्जरे-सि। सं. निर्जर. अजर (पुं) acc. to निर्जर. अजर (न.) प्र. अजरम् अजरे-अजरसी-अजराणि-अजरांसि। द्वि. अजरम् - सम्

(१) (५) अस्थि (N.) a bone, दधि (N) curd, सक्थि (N.) a thigh and अक्षि (न.) eye, become अस्थन्, दधन्. सक्थन् and अक्षन् respectively before the vowel terminations beginning with the Inst. Sing. and they are declined like नामन् and in other respects they are declined like वारि.

प्र. द्वि	अस्थि	अस्थिनी	अस्थीनि ।	अक्षि	अक्षिणी	अक्षीणि
तृ.	अस्थ्ना	अस्थिभ्याम्	अस्थिभिः ।	अक्ष्णा	अक्षिभ्याम्	अक्षिभिः
च.	अस्थ्ने	,,	अस्थिभ्यः ।	अक्ष्णे	,,	अक्षिभ्यः
पं.	अस्थ्नः	,,	,, ।	अक्ष्णः	,,	,,
ष.	,,	अस्थ्नोः	अस्थ्नाम् ।	,,	अक्ष्णोः	अक्ष्णाम्
स.	अस्थ्नि / अस्थनि	,,	अस्थिषु ।	अक्ष्णि / अक्षणि	,,	अक्षिषु
सं.	अस्थे / अस्थि	अस्थिनी	अस्थीनि ।	अक्षे / अक्षि	अक्षिणी	अक्षीणि

(१) "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः-

(६) (6) स्त्री. (स्त्री.) — प्र. स्त्री स्त्रियौ स्त्रियः। द्वि. स्त्रियम् स्त्रीम्। स्त्रियः–स्त्रीः। तृ स्त्रिया (च. स्त्रियै) पं. स्त्रियाः। ष. स्त्रियाः–स्त्रीणाम्। स. स्त्रियाम्। सं. स्त्रि. (स्त्री) becomes स्त्रिय before vowel terminations. (स्त्रियाः वामशसोः)

(6) Nouns with one vowel like श्री, धी, मी, ह्री, and भ्रू (words derived from verbs are all feminine. The long ई and ऊ are changed to इय् and उव् respectively and in Dat. Abl. gen. Loc. sing and Voc. plural they are declined like नदी and वधू optionally.

धी. (स्त्री) intellect				भू (स्त्री) earth		
प्र,	धोः	धियौ	धियः।	भूः	भुवौ	भुवः।
द्वि.	धियम्	धियौ	धियः।	भुवम्	भुवौ	भुवः।
तृ.	धिया	धीभ्याम्	धीभिः।	भुवा	भूभ्याम्	भूभिः।
च.	धियै–धिये	धीभ्याम्	धीभ्यः।	भुवै–भुवे	भूभ्याम्	भूभ्यः।
पं.	धियाः धियः	धीभ्याम्	धीभ्यः।	भुवाः–भुवः	भूभ्याम्	भूभ्यः।
ष.	धियाः-धियः	धियोः	धियाम्–धीनाम्।	भुवाः–भुवः	भुवोः	भुवाम्–भूनाम्
स.	धियाम्-धियि	धियोः	धीषु	भुवाम्–वि	भुवोः	भूषु।

(7) Compound nouns line वनभूः, व्याघ्रभीः will be declined similarly as shown above. Also सुधी, मूढधी, मन्दधी, अपश्री, सुभ्रु etc. adjectives are declined like Mas. and Fem. like धी and भू and are declined optionally like नदी, वधू in Fem. and in neuter by changing the final long vowel into short and the forms would be like शुचि and मधु. They will be like Mas. nouns optionally from Instr. onwords.

(8) प्र. सं. सुधीः सुधियौ द्वि. सुधियम्, तृ. सुधिया, सुधिये, ष. सुधियः सुधियाम्, स. सुधियि सुधियोः सुधीषु। प्र. सं. (स्त्री) प्र. सुधीः सुधियौ। च सुधियै-सुधिये : पं. सुधियाः सुधियः : ष. ब. व. सुधियाम्-धीनाम्, स. सुधियाम्-यि। Forms of सुभ्रू (पुं. स्त्री) are similarly as shown above

प्र. सुभ्रु (न.) प्र. द्वि. सुभ्रु सुभ्रुणी सुभ्रूणी, तृ. सुभ्रुवा-सुभ्रुणा च च. सुभ्रुवे-सुभ्रुवेणे। सुभ्रुव-णः सुभ्रुवोः-णोः, सुभ्रुवाम्-णाम्। स. सुभ्रुवि-णि सं. सुभ्रो-सुभ्रु।

(8) When there is a final long ई or ऊ at the end of a compound word like प्रधी[1] (प्रकृष्टा धीः यस्य), शुद्धधी, वर्षाभू[2], कामसु[3] खलपू[4] (खलं पुनाति) करभू[5] पुनर्भू[6] words ending in ई or ऊ they are changed to य् or व् before vowel terminations. If there is no conjunct consonant before them otherwise they become इय् or उव. In neuter ई or ऊ are shortened and are declined like वारि and मधु. But from Inst. sing they are declined like Mas. noun before vowel terminations optionally (ओः सुपि)

(9) प्रधी (पुं. स्त्री.) प्र. सं. प्रधीः प्रध्यौ प्रध्यः, द्वि. प्रध्याम्, तृ. प्रध्या, च. प्रध्ये प्रध्यै (स्त्री.). पं. ष. प्रध्यः-प्रध्याः (स्त्री.), ष. ब. प्रध्याम्, प्रधीनाम् (स्त्री.) स. प्रध्यि प्रध्याम्, (स्त्री) प्रधीषु।

वर्षाभू (पुं. स्त्री.) प्र. वर्षाभूः, द्वि. वर्षाभ्वम्, च. वर्षाभ्वे-वर्षाभ्वै (स्त्री), पं. वर्षाभ्वः-भ्वाः (स्त्री) वर्षाभ्वाम् वर्षाभूणाम् (स्त्री) वर्षाभूषु स्त्री. वर्षाभ्वी also becomes and declined like नदी. प्रधि (न.) द्वि. प्रधि प्रधिनी प्रधीनि, तृ. प्रधिना-प्रध्या च. प्रधिने-प्रध्येः-पं. ष. प्रधिनः-प्रध्यः प्रधीनाम्-याम्।

Exception :– (1) Compound nouns ending भू like स्वयंभू, मनोभू (other than वर्षाभू and पुनर्भू) change their final ऊ to उव् before vowel terminations and are declined

* अचिश्नुधातुभ्रुवां य्वोरियङुवङौ। + न भू सुधियोः।

---

1 talented 2 frog 3 wish yielder 4 sanctify the wicked 5 nail 6 widow married.

* (२) एरनेकाचोऽसंयोगपूर्वस्य।

like सुभ्रु, प्र. स्वयंभूः स्वयंभुवौ स्वयंभुवः, तृ. स्वयंभुवा ष. स्वयंभुवाम् । पुनर्भू, प्रधी (स्त्रो) वीरस्, प्रस् are declined like वधू and लक्ष्मी from Inst. onwards;

(10) Compound nouns ending in नी, ग्रामणी, अग्रणी, सेनानी take the termination आम् in स. ए. व. instead of इ.

प्र. ग्रामणीः ग्रामण्यौ ग्रामण्यः, ष. ग्रामण्यः ग्रामण्याम्, स ग्रामण्याम् ग्रामण्योः –णीषु । सं ग्रामणि ।

(11) The case terminations of आ ending nouns like गोपा, विश्वपा, शङ्खध्मा etc. are directly opplied ro them.

(12) Masc and Fem nouns ending in आ like गोपा, विश्वपा, शंखध्मा with a verb at the end take terminations directly, आ at the end is retained and not dropped before terminations of अंग and पद संज्ञा. (हाहान्–This noun does not end with a verb हाहाः, हाहौ, हाहः, हाहाम्, हाहौ । विश्वपा (पुं. स्त्री.) प्र. सं. विश्वपाः विश्वपौ विश्वपाः । विश्वपाम् विश्वपः । तृ. विश्वपा विश्वपाभ्याम् । च. विश्वपे । पं. ष. विश्वपः विश्वपाम् । स. विश्वपासु । (आतो धातोः–भस्याङ्गस्य लोपः स्यात् ।)

(13) विश्वाह हव्यवाह् भारवह–etc. the nouns ending in the verb वह are turned in to विश्वौह् हव्योह् and so on before terminations of भ संज्ञा (from Acc. Plural vowel terminations) विश्वाट्–ड्–विश्वाहौ विश्ववाहः । द्वि. विश्वाहम् विश्वौहः । तृ. विश्वौहा–ड्याम् । च. विश्वौहे । पं, ष. विश्वौहः–वौहोः, वौहाम् । स. विश्वौहि वाट्सु–वाट्त्सु । (वाह ऊठ् । सम्प्रसारणाच्च)

(14) उशनस्[4] पुरुदसस्[5] and अनेहस्[6] have their nom. sing as उशना, पुरुदसा and अनेहा respectively. The other forms are like चन्द्रमस्. The voc. sing. of उशनस् is उशनः उशन–उशनन् । (ऋदुशनस्पुरुदसोऽनेहसां च)

(14) The स् in तुरासाह[7] becomes ष् before consontal terminrtions Nom voc sins. तुराषाड्–ह तुरासाहौ–

द्वि. तुरासाहम्, तृ. तुरासाहा-ड्भ्याम् च. तुरासाहे, ष. तुरासाहः साहोः-साहाम् । स. तुरासाहि षट्सु-षटत्सु । (सहेः साडः सः)

(16) The nouns अनडुह् and अर्वन् become अनडुत् and अर्वत् respectively from Acc. plural onwards. अनडुह् अर्वन् (अवर्णस्त्रसावनञः) अ अर्वन्-अर्वती (F.) अनडुह्-प्र. अनड्वान् अनड्वाहौ अनड्वाहः । द्वि. अनड्वाहम् अनडुहः तृ. अनडुहा अनडुद्भिः च. अनडुहेः अनडुहो-डुहाम् स. अनडुहि-डुत्सु । सं. अनडवन् । (चतुरनडुहोरामुदात्तः-सावनडुहः) अम् सम्बुद्धौ अर्वन्-(पुं.) प्र. अर्वा अर्वन्तौ द्वि. अर्वन्तम् अर्वतः । तृ. अर्वता-द्भ्याम् ॥ च. अर्वते ष. अर्वतः सं. अर्वन्

(17) The word क्रोष्टु is declined necessarily as क्रोष्टृ in the first five forms and optionally before the vowel terminations beginnig with the Instr. sing (भ संज्ञा) except the Gen plural is क्रोष्टूनाम्.

(तृज्वत्क्रोष्टुः, विभाषा तृतीयादिष्वचि) प्र. क्रोष्टा क्रोष्टारौ क्रोष्टारः । द्वि. क्रोष्टारम् क्रोष्टून्, तृ. क्रोष्ट्रा-क्रोष्टुना, च. क्रोष्ट्रे-क्रोष्टवे ष. क्रोष्टुः-क्रोष्टोः क्रोष्ट्रोः-ष्ट्वोः क्रोष्टूनाम् । स. क्रोष्टरि-क्रोष्टौ क्रोष्टुषु सं. क्रोष्टो । In Fem. it becomes क्रोष्ट्री

(तृज्वत्क्रोष्टुः)-क्रोष्टु-(ऋदुशनस्पुरुदंसोऽनेहसां च) इत्येन अनङादेश जाते -क्रोष्टन्-(अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् 'क्रोष्टा-उद्गातरः क्रोष्टून् 'विभाषा ततीयादिष्वचि)-क्रोष्ट्रा-क्रोष्ट्रे, 'ऋत उत' क्रोष्टु अस्-क्रोष्टुरस् 'रात्सस्य 'क्रोष्टु' क्रोष्टूनाम् । क्रोष्टरि, क्रोष्ट्रोः । 'पक्षे' शम्भुवत्' ।

(18) पपी[1] (the sun) ययी[2] (a way) वातप्रमी[3] (a swift-antelope) nouns have their final ई changed to य् before vowel terminations. In Loc. sing. the final ई does not change to प्र. सं. पपी पप्यौ पप्यः । द्वि. पपीम् पप्यौ पपीन् । च. पप्ये पपीभ्याम् पं. पप्यः ष. पप्यः पप्योः पप्याम् । स पपी पप्योः पपीषु ।

---

(1) The supporter of world. (2) fire (3) The bearer of burden. (4) Shakracharya (5) The name of Indra of time (7) Indra (8) an ox (9) a horse (10) a fox

1. वातप्रमी (M) वातप्रमिमीण असौ वातप्रमी ।) वातप्रमीः म्यौ प्रम्यः ययी is declinced acc to ययी

(18) Nouns derived from roots such as धी, भू, श्री etc. and the noun भ्रू change their final vowel to इय् or उव् before vowel terminations. Fem. nouns of this description (श्री etc) are declincd optionally like नदी in Dat. Abl. Gen. and Loc. singulars and Gen. Plu. while स्त्री take the terminations of नदी necessrily. But the Acc. sing of स्त्री is स्त्रियम् or स्त्रीम् and the Plu. is स्त्रियः or स्त्रीः। प्र. स्त्री स्त्रियौ स्त्रियः । द्वि. स्त्रियम् , स्त्रीम् , स्त्रियः-स्त्रीः । तृ. स्त्रिया च-स्त्रियै, स्त्रियाः स्त्रीणाम् । सं. स्त्रि० । प्र. स. श्रीः श्रियौ श्रियः । द्वि. श्रियम् । तृ. श्रिया. च. श्रियै-श्रिये । श्रियाम्-श्रीणाम् । स. श्रियाम्-श्रियि । धी is also declined like श्री (नेयङुवङ्स्थानावस्त्री-वाऽऽमि)

संस्कृत-वाक्यानि ।

(१) एतस्मादाकाशाद्वायुर्वायोरापोऽद्भ्यः पृथिवी पृथिव्या औषधयः समजायन्त ।

(२) एकस्मिन् पुंसि धियः श्रियः च संगतम् भुवि दुर्लभमस्ति ।

(३) महार्हाणि रत्नानि वासांसि च स्त्रीणाम् अतीव प्रियाणि ।

(४) भारतदेशे बह्व्यः परित्यक्ताः विधवाः च सन्ति । ताः अधुना अन्येन सह विवाहं कुर्वन्ति अतः ताः पुनर्भ्वः भवन्ति ।

(५) पुरोहिताः यज्ञवेदिम् अद्भिः सिञ्चनेन मन्त्राणाम् पठनेन च परिमृजन्ति । (पुनन्ति)

(६) अमेरिकायाम् उदञ्चः दास्यममानुषम् मन्यन्ते तद् उन्मूलयितुम् अवाग्भिः जनैः सह अयुध्यन्त ।

(७) विधवायाः पुनरुद्वाहः सशास्त्र इत्येके शास्त्रविरुद्ध इत्यन्ये, कलौ प्रतिषिद्ध इत्यपरे वदन्ति ।

(८) असुराणाम् आचार्यः उशनाः देवानाम् च आचार्यः बृहस्पतिः नीतिशास्त्रग्रन्थानाम् कर्तृत्वेन प्रसिद्धौ स्तः ।

(९) यूनां बुद्धिः शास्त्रपठनेन शीलेन च संस्क्रियते ।

(१०) ग्रामणीः ग्रामिकानाह्वयत् नृपस्य (राज्ञः) विजयम् उत्कीर्त्यताम् (उद्गीयताम्) इत्यकथयत् ।

(११) ततः वर्षाभ्वः तुरासाहम् उपाह्वयन् तं च शासितारम् नः प्रहिणु इति प्रार्थयन् ।

(१२) तिरश्चाम् स्वरः तथा दिने प्रस्फुटं न श्रूयते यथा नक्तम् श्रूयते ।

(१३) वेदान् पठन्तः ब्राह्मणाः वर्षासु आरटन्तः वर्षाभ्वः इव सन्ति ।

(१४) प्राच्यावाची प्रतीच्युदीची चेति चतस्त्रो दिशः ।
तासां क्रमेणेन्द्रो यमो वरुणः कुबेरश्चेति चत्वारः पतयः परिकीर्तिताः ।

(१५) मृगाः मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरंगैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसने सख्यम् ॥

(१६) वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥

(१७) किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।
अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि दुग्धा ॥

(१८) आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये धर्मोऽपि जानाति नरस्य वृत्तम् ॥

(१९) तस्य पृथिवी प्रसूतेऽर्थं धर्ममर्थः प्रसूयते ।
प्रसौति विजयं धर्मः स च प्रसवति श्रियम् ॥

(२०) चन्दनैश्चर्चितेव द्यौर्दिशः काशैरिव श्रिताः ।
क्षीरेण क्षालितेवोर्वी शर्वरीशे विराजति ॥

(२१)* कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् ॥

(२२) नाधर्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ॥

(२३) सर्वेश्वरं विश्ववाहं भजेन्नित्यं परं प्रभुम् ।
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ॥
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।

(२४) अध्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥

The Charioteer is telling these words to Dushyant.

—: शब्दकोश :—

धी (स्त्री) intelligence बुद्धि
संगत (न.) union संगति
महार्ह-महार्घ (वि.) costly, invaluable अमूल्य
पुनर्भू-(स्त्री.) A widow remarried पुनर्विवाहिता
पुरोहित (पुं.) a sacrificial-priest पुरोहित
यज्ञवेदि (स्त्री.) sacrificial alter यज्ञवेदि
बह्वी (स्त्री.) many बहुत
विधवा-widow विधवा
पू (९. प.) to purify पवित्र करना (परि+मृज्)
अप् (स्त्री.) water पानी
उद्+मूलं् to uproot (१० उ) उखेड़ना
उद्वाह (पुं.) marriage विवाह
सशास्त्र-शास्त्रयुक्त according to religious scriptures
प्रतिषिद्ध-(वि.) prohibited
उशनस्-(पुं.) the name of the preceptor of asuras (demons) शुक्राचार्य
कर्तृत्व-(पु) author कर्ता
युवन् (पु.) young जवान
सम्+कृ (८. उ, संस्क्रियते) to be adorned, to make refined संस्कारी बनाना
ग्रामणी (पु.) the head man of the village गाँवका नेता
ग्रामिक (पु.) a villager गांवका निवासी
उद्+कीर्त (उद्+गै) to celebrate उत्सव मनाना
वर्षाभू (पु.) a frog दादुर
तुरासाह् (पु.) an epithet of indra, इन्द्र
उप+ह्वे-to invoke बुलाना
प्र+हि (५ प.) to send भेजना
प्र+अर्थ (१०. उ.) to seek, to solicit प्रार्थना करना
तिर्यञ्च् (पु.) an animal, a creature (तिरश्च-स्त्री तिर्यश्ची स्त्री.)
पस्फुट (वि.) clear, distinct स्पष्ट
आ+रट् (१. प.) to repeat, to croak रटना
अनु+व्रज़-(१. प.) to follow अनुसरना
सुधी (स्त्री.) wise, clever अच्छी बुद्धिवाला
समानशीलव्यसन (वि.) of similar nature and deeds चारित्र्य आदतमें समान
गो (स्त्री.) cow गैया
परिकीर्तित considered, des-

cribed (परि+कीर्त) मान्य किया
सौहृद (न.) friendehip मित्रता
कृश (वि.) thin, weak, पतला क्षीण
कामसू (वि.) fulfilling all desires इच्छा पूर्ण करनेवाला
मनीषित (वि.) what is desired इच्छित, (ईप्सित)
किमत्र चित्रम्-wonderstruck आश्चर्यकारक
वृत्ते स्थितस्य-behaving righteously धर्मानुसार वर्तना
द्यौ-दिव् (स्त्री.) heaven स्वर्ग
(दुग्धा) दुह्-milked; made to yield (क. भू. कृ.) दोहा हुआ
प्र+सु (१. २. प.) to produce उत्पन्न करना, (प्रसवति, प्रसौति)
प्र+सू (२ ४ आ) to produce उत्पन्न करना, (प्रसूते-प्रसूयते)
श्री (स्त्री.) wealth prosperity लक्ष्मी
काश (पुं. न.) a kind of white flower श्वेत पुष्प
वि+राज् (१ उ.) to shine प्रकाशित होना
शर्वरीश (पुं.) god of night चन्द्र
अनुसारिन् (वि.) follower अनुसरनेवाला
अधिज्य धन्वन् (पु) one whose bow is strung जिसने धनुष की दोरी खिंची है।
पिनाकिन् (पुं.) An epithet of Lord shiva, a wielder of Pinak bow, शंकर
गो (स्त्री. पुं.) cow, a bullock गैया, बैल
आवर्तमान to turn back. (आ+वृत) वर्त. कृदंत आ.) फिरना
गोपा (पुं.) a cowherd
शङ्खध्मा (पुं.) A conch blower
अभि+भू (१. प.) to over power दबाना
द्रवी+भू (१. प.) to be melted पिघल जाना
भव (पुं.) The god Shiva, birth शिव, जन्म
मनोभू (पुं.) The god of love-cupid कामदेव
भस्मसात् (अ.) to turn into ashes भस्मीभूत करना
ह्री (स्त्री.) bashfulness लज्जा
अवमत (अव+मन्) insulted अपमानित
निर्जर (पुं.) god देवा
अजय्य (पुं.) invincible अजयी
कत्थ (१. आ.) to boast शेखी करना
शाकटिक (पुं.) a cartman गाडीवाला
क्लान्त (क्लम्) exhausted थका हुआ

सोमपा–one who drinks Soma-Juice
धूम्रपा–one who inhales smoke
विस्फारित (वि+स्फुर्) wide open खुली हुई
अतिक्रमणीय (वि.) to be trasgrassed उल्लंघन करना
विश्वप (पुं.) protector of the universe विश्वका पालन करनेवाला
दक्षिणतः (त्रि.) on the right side, दायी ओरसे
मन्त्र् (१० उ.) to consult सलाह करना
पपी (पुं.) sun सूर्य
पर्याय (पुं.) alternately एक के बाद
नीलोत्पल (न.) blue lotus नीलकमल
एकतम (त्रि.) one of them बहुतो में एक
मूढधी (पुं.) foolish मूर्ख
मायाविन् (पुं.) deceitful, skilled in magic मायावी
पराभव (पुं.) overthrow, defeat पराजय
सेनानी (पु.) the leader of the army सेना का नेता

(अ) Transiate into Sanskrit.

(1) Having crossed the river by a boat, he saw the collection of bones on the other bank of the river. (2) The death of the brave men is better than fleeing away from the battle-field. (3) The sage Kanva gave blessings to Shakuntala for getting the love of her husband. (4) Having seen the beautiful sight of Kashmir, those People will get the fruit of their eyes. (5) Physicians believe that the cow's milk is beneficial for nourishing the children (संवर्धन). (6) Brahma nominated Kartikeya as the chief-commander of the armies to win the demon Taraka. (7) Learned men do not believe that their experiment of knowledge is complete till their satisfaction. (8) The travellers are terrified on hearing the cry of the jackals in the wild forest. (9) Having seen the man in the pond the frogs

are diving in the pond and they come out of the water when he went away. (10) Go to the king for telling the news of victory after riding this horse. (11) At that time his heart was melted by pity seeing the poor Brahmin suppressed by the tiger. (12) Salutations to Lord Shiva who burnt the cupid by his eye.

(ब) Fill in the blanks with the suitable forms of words given.

(१) दुःशासनेन अवमता द्रौपदी ______ अधः पश्यन्ती ______ च वेपन्ती अतिष्ठत् । (ह्री, भी) (२) ब्रह्मणः वरदानेन तारकः निर्जराणाम् अजय्योऽभवत् ______, ______ चापीडयत् । (भू, दिव्) (३) ______ आत्मगुणान् न कत्थन्ते, किन्तु सदा नम्राः सन्ति । (विद्वस्) (४) यातम् गावौ यातम् शाकटिकोऽवदत् किन्तु क्लान्तौ ______ शकटं वोढुम् असमर्थौऽभवताम् । (गौ) (५) कौशल्या विस्फारिताभ्याम् ______ वनम् प्रति लक्ष्मणेनानुसरन्तं राममपश्यत् । (अक्षि) (६) ______ इच्छा पाल्यताम् यतः केनापि सा न अतिक्रमणीया (विश्वप) (७) ______ दर्शनः दक्षिणतः अशुभमस्ति । (क्रोष्टु) । (८) ______ युधि पराजिताः ______ सह अमन्त्रयन्त । (निर्जर, उशनस्) (९) ______ पर्यायेण ______, ______ च प्रतिवर्षम् दृश्यते । (पपी, उदीची, अवाची) । (१०) अस्मिन् स्थाने अस्माभिःसुखपूर्वकम् व्यतीतः ______ किं त्वं न स्मरसि । (अनेहस्) (११) ______ पञ्चसु एकतमम् शरम् नीलोत्पलम् अस्ति । (मनोभू) (१२) अपत्येषु ______ सहजं ______ लक्ष्यते । (तिर्यञ्च्, प्रेमन्).

(क) Form the compounds of the words given and name them.

(१) परित्यक्ताः विधवाः च (२) रत्नानि वासांसि च (३) अद्भिः सिञ्चनेन (४) मन्त्राणाम् पठनेन (५) पठन्तः ब्राह्मणाः । (६) प्रजानाम् अधिपतेः (७) द्यौः भूमिः आपः च । (८) अस्थनाम् राशिः (९) अक्ष्णाम् फलम् (१०) बालकानाम् संवर्धनाय (११) गोः पयः (१२) सेनान्यः पदे (१३) प्रागहस्य विज्ञातम् (१४) क्रोष्टूनाम् आक्रोशम् (१५) पल्वलम्

आयान्तम् (१६) व्याघ्रेण अभिभूयमानम् (१७) दुःशासनेन अवमता (१८) ब्रह्मणः वरदानेन (१९) भुवम् दिवम् च। (२०) विस्फारिताभ्याम् अक्षिभ्याम् (२१) पराजिताः असुराः ।

(ड) Dissolve the Compounds given below and name them.

(१) दुर्लभम्, (२) सशास्त्रः, (३) शास्त्रविरुद्धः (४) नीतिशास्त्रग्रन्थानाम् (५) शास्त्रपठनेन (६) ग्रामणीः (७) समानशीलव्यसनेषु (८) दीपनाशाय (९) कामसूः (१०) आदित्यचन्द्रौ (११) कृष्णसारे (१२) मृगानुसारिणम् (१३) शचीशः (१४) सोदरः (१५) अग्रणी (१६) मन्त्रकृताम् (१७) कुशाग्राबुद्धेः (१८) उष्णरश्मिः (१९) मनोभवम् (२०) तिर्यक्प्रेम (२१) धीश्रियौ ।

(E) Recognise the following forms given below :-

पुंसि, धियः, स्त्रीणाम्, पुनर्भूः, उदञ्च, अवाग्भिः, उशनाः यूनाम्, ग्रामण्योः, तुरासाहम्, तिरश्चाम्, वर्षाभ्वः, गोभिः, कामसूः, द्यौः, अहः उष्णरश्मेः नावाम्, आशीषम्, क्रोष्टूनाम्, अर्वन्तम्, मनोभुवम्, ह्रिया दिवम्, विश्वपः, निर्जरैः, अनेहसम् ।

(F) Give the forms of words as required below :-

(१) प्र. ए. व-सखी, खलपू, प्रसू, सेनानी, विश्वावाह्, अनेहस् (२) च. ए. च.-गो. पुंस्, श्री, ह्री, पुनर्भू, विश्वपा. तुरासाह, क्रोष्टु (स्त्री.) पपी, (३) ष. ब. व.- अप्, भू, मन्दधी, (स्त्री), प्रधी (न), अग्रणी अनडुह्, क्रोष्टु (पु.) (४) स. ब. वः-धी, वर्षाभू, मनोभू, वीरसू, सुपाद्, अर्वन्, वातप्रमी ।

(G) give the synonyms of the words as given :-

पति, जरा, अस्थि, ग्रामणी, स्पर्धा, प्रतिस्पर्धी, औषध. औषधी, पुनर्भू, नीति, अर्थ, कुशलिन्, विधवा, उशनस्, मायाविन्, उत्पल, पथ्य, संवर्धन, पलायन.

त्रयश्चत्वारिंशः पाठः ।

पञ्चमः गणः ।

In the first part of this series we learnt 1st 4th, 6th and 10th Conjugations of verbs. Now we begin to study the 2nd, 3rd, 5th, 8th and 9th conjugations. The verbs are divided in ten conjugations and all of them are used in the presant tense, imperfect, in the imperative and in potential mood 'and they are in active voice while the passive voice, perfect tense, the future and aorist etc. are formed without the conjugational sign and in these tenses and moods this sign is not any importance

Besides this before some terminations in certain tenses and moods the verb itself undergoes a change and these terminations or endings are regarded or called strong and those that do not cause any change in the verb are known as weak endings.

Strong terminations

परस्मैपद

(१) वर्तमानकाल मि, सि, ति,

(२) आज्ञार्थ :–आनि, आव, आम, तु.

(३) ह्यस्तनभूत :–अम्, स् त्

(४) विध्यर्थ– None

आत्मनेपद

आज्ञार्थ-ऐ, आवहै आमहै

weak terminations

परस्मैपद

वस्, मस्, थस्, थ तस्, अन्ति हि, तम्, त, ताम्, अन्

all the terminations of विध्यर्थ

आत्मनेपद

All the terminations of present, Imperfect and potential and all 2nd and 3rd. P. terminations.

Certain changes that occur in the verbs of this 2nd class.

(a) In the verbs of this 2nd class (2nd, 3rd 5th congugtion etc) the strong terminations cause a change in the final vowel and its penultimate short vowel which takes guna (गुण) (in the conjugational sings also) while the weak terminations keep these vowels unchanged (सार्वधातुकार्धधातुकयोः)

(b) In this 2nd group of roots or verbs the Parsmaipada terminations are the same as those of the 1st group except the potential mood whcre they are entirely different and in Imperative mood and 2nd. sing. person is irregular, where the termination is हि.

(c) In Atmanepada class of present tense, imperfect and imperative, the 3rd person plural forms of verbs न् is dropped and instead of अन्ते अन्त and अन्ताम् the forms end in अते, अत and अताम् ।

(d) In the present tense, imperfect and imperative instead of इ we put आ and we conjugate the verb with terminations. They are not इथे, इथाम्, इताम् but they are आथे आथाम् आताम् ।

परस्मैपद

	वर्तमान			ह्यस्तनभूत		
प्र.	मि	वः	मः ।	अम्	व	मः ।
द्वि.	सि	थः	थ ।	स्	तम्	त ।
तृ.	ति	तः	अन्ति ।	त्	ताम्	अन्॥

आज्ञार्थ			विध्यर्थ		
आनि	आव	आम ।	याम्	याव	याम ।
हि	तम्	त ।	याः	यातम्	यात ।
तु	ताम्	अन्तु ।	यात्	याताम्	युः ।

—आत्मनेपद—

	वर्तमान			ह्यस्तनभू		
प्र.	ए	वहे	महे ।	इ	वहि	महि ।
द्वि.	से	आथे	ध्वे ।	थाः	आथाम्	ध्वम् ।
तृ.	ते	आते	अते ।	त	आताम्	अत ।

आज्ञार्थ			विध्यर्थ		
ऐ	आवहै	आमहै ।	ईय	ईवहि	ईमहि ।
स्व	आथाम्	ध्वम् ।	ईथाः	ईयाथाम्	ईध्वम् ।
ताम्	आताम्	अताम् ।	ईत	ईयाताम्	ईरन् ।

पञ्चमः गणः ।

चि. (उ.) to collect

	परस्मैपद (वर्तमानकाल)	आत्मनेपद
प्र.	चिनोमि चिनुवः चिनुमः ।	चिन्वे चिनुवहे चिनुमहे ।
	चिन्वः चिन्म ।	,, चिन्वहे चिन्महे ।
द्वि.	चिनोषि चिनुथः चिनुथ ।	चिनुषे चिन्वाथे चिनुध्वे ।
तृ.	चिनोति चिनुतः चिन्वन्ति ।	चिनुते चिन्वाते चिन्वते ।

Note :– The terminations mentioned in black rectangles or square are strong and others are weak.

Rules (1) The Sign of the fifth conjugation is नु (स्वादिभ्यः नु). Before strong terminations the नु takes गुण and becomes नो or नव. चिनोमि. (सार्वधातुकार्धधातुकयोः)

Rule : (2) Before terminations beginning with व or म, the sign नु optionally drops its उ and becomes न्, but it should not be preceded by a conjunct consonant. चिन्वः, चिनुवः। (लोपश्चास्यान्यतरस्याम्म्वोः).

Rules (3) When the verb ends in a vowel, before weak terminations beginning with a vowel, the उ of नु is changed to व् e.g. चिनु+अन्ति=चिन्वन्ति (हुश्नुवोः सार्वधातुके).

(1) Before Cons. S. T. चिनु becomes चिनो. चिनोमि.
(2) Before Vowel S. T. चिनु. चिनव्–चिनवानि.
(3) Before Cons. W. T. चिनु remains same. चिनुथः।
(4) Before Vowel S. T. चिनु becomes चिन्व्. चिन्वन्ति।

Nate : V.–Vowel, Cons.–Consonant. S.–Strong. W–Weak.

Rule : (4) When the roots ends in a consonant, the उ of नु bemes उव् before V. W. terminations. अश्नुवते (अचिश्नुधातुभ्रुवांय्वारियङुवङौ).

	आप् (५ प.) to get	अश् (आ) to extend
प्र.	आप्नोमि आप्नुवः आप्नुमः।	अश्नुवे अश्नुवहे अश्नुमहे।
द्वि.	आप्नोषि आप्नुथः आप्नुथ।	अश्नुषे अश्नुवाथे अश्नुध्वे।
तृ.	आप्नोति आप्नुतः आप्नुवन्ति।	अश्नुते अश्नुवाते अश्नुवते।

Here there is a conjunct consonant before नु. therefore उ does not drop.

	परस्मैपद	आज्ञार्थ आत्मनेपद
प्र.	आप्नवानि आप्नवाव आप्नवाम।	अश्नवै अश्नवावहै अश्नवामहै।
द्वि.	आप्नुहि आप्नुतम् आप्नुत।	अश्नुष्व अश्नुवाथाम् अश्नुध्वम्।
तृ.	आप्नोतु आप्नुताम् आप्नुवन्तु।	अश्नुताम् अश्नुवाताम् अश्नुवताम्।

Rule : (5) Before V. S. terminations the उ of नु taking गुण and becomes नव् acc. to samdhi rules. आप्नवानि, अश्नवै.

Rules : (6) In the second section हि is added in आज्ञार्थ द्वि. पु. ए. व. but हि is dropped when there is no conjunct consonant चिनु, सुनु (उतश्च-प्रत्ययादसंयोगपूर्वात्)

(चि) (आज्ञार्थ)

प्र. चिनवानि चिनवाव चिनवाम । चिनवै चिनवावहै चिनवामहै ।
द्वि. चिनु चिनुतम् चिनुत । चिनुष्व चिन्वाथाम् चिनुध्वम् ।
तृ. चिनोतु चिनुताम् चिन्वन्तु । चिनुताम् चिन्वाताम् चिन्वताम् ।

ह्यस्तनभूतकाल ।

प्र. अचिनवम् अचिनुव अचिनुम । अचिन्वि अचिनुवहि अचिनुमहि ।
अचिन्व अचिन्म । अचिन्वहि अचिन्महि ।
द्वि. अचिनोः अचिनुतम् अचिनुत । अचिनुथाः अचिन्वाथाम् अचिनुध्वम् ।
द्वि. अचिनोत् अचिनुताम् अचिन्वन् । अचिनुत अचिन्वाताम् अचिन्वत ।

आप् (प.) अश् (आ).

प्र. आप्नवम् आप्नुव आप्नुम । आश्नुवि आश्नुवहि आश्नुमहि ।
द्वि. आप्नोः आप्नुतम् आप्नुत । आश्नुथाः आश्नुवाथाम् आश्नुध्वम् ।
तृ. आप्नोत् आप्नुताम् आप्नुवन् । आश्नुत आश्नुवाताम् आश्नुवत ।

चि. (प.) विध्यर्थ चि. (आ)

प्र. चिनुयाम् चिनुयाव चिनुयाम । चिन्वीय चिन्वीवहि चिन्वीमहि ।
द्वि. चिनुयाः चिनुयातम् चिनुयात । चिन्वीथाः चिन्वीयाथाम् चिन्वीध्वम् ।
तृ. चिनुयात् चिनुयाताम् चिनुयुः । चिन्वीत चिन्वीयाताम् चिन्वीरन् ।

(१) प्र+हि to send प्रहिणोमि, प्राहिणवम्, प्रहिणवानि । वि+चि to search विचिनोमि व्यचिनवम् व्यचिन्वि । वि+वृ to explain विवृणोमि व्यवृणवम् व्यवृण्वि । आ+वृ to cover आवृणोमि आवृणवम् आवृण्वि । अप+आ+वृ to open अपावृणवम्, अपावृण्वि । सम्+वृ to shut समवृणवम्. समवृण्वि । अक्ष् to extend अक्ष्णोमि आक्ष्णवम्, अक्ष्णवानि ।

संस्कृत-वाक्यानि ।

१. भगवान् विष्णुरखिलम् विश्वम् व्यश्नुते तं च परित्रायते ।
२. बलवान् दनुः हिरण्याक्षः आमूलात् पृथ्वीमधुनोत् लोकान् चाधुनोत् ।
३. ये इमान् वार्ताम् श्रृण्वन्ति तेषाम् हृदयानि तस्य करुणाप्रायैः वर्णनैः द्रवन्ति ।

४. ममोद्याने पुष्पाणि चिनु सर्वेश्वरम् शिवम् च पूजय ।

५. प्रायः भारतीयाः अग्राध्ययनाय स्वपुत्रान् अमेरिकाम् प्रहिण्वन्ति ।

६. प्रायः जनाः मनोधर्मान् जेतुम् न शक्नुवन्ति ।

७. सः स्वसंकल्पम् न विवृणोति यतः सः पापः अस्ति ।

८. कृपणः धनम् संचिनोति किंतु दीनेभ्यः न यच्छति ।

९. दूरदर्शिनः दुष्कराणि कार्याणि सौकर्येण साध्नुवन्ति ।

१०. अहं पाण्डवसेनानाशायालं तत्तस्मिन् विषये युष्माभिश्चिन्ता न कार्या इत्यश्वत्थामा दुर्योधनाय प्रत्यशृणोत् ।

११. संयमिनः कामान् क्रोधम् लोभम् च यत्नैः आवृण्वन् ब्रह्म चिन्तयन्त शाश्वतम् सुखम् च आप्नुवन् ।

१२. पाठशालायाम् अध्यापकाः धर्मस्य तत्त्वानि शिष्येभ्यः विवृण्वन्ति ।

१३. नृपस्य सचिवाः गुप्तचरान् अन्यदेशात् शत्रोः व्यापारान् निरूपयितुम् अन्यदेशम् प्राहिण्वन् ।

१४. किंकराः कुथैः सभाखण्डम् स्तृण्वन्तु ।

१५. दुर्बलाः राजानः बलिनः राज्ञः मा धृष्णुयुः ।

१६. सैषा स्थली यत्र त्वाम् विचिन्वता मया अरण्ये भूमौ नूपुरमेकम् दृष्टम् ।

१७. पुरा सोमयज्ञे ऋत्विजः सोमरसं असुन्वन्

१८. निरागसः पक्षिशावकान् मा दुनुत ।

१९. त्वम् उद्यमेन विना तिलेभ्यः तैलं लब्धुम् न शक्नोषि ।

२०. कुक्कुराः स्वामिनः अग्रे भक्षयितुम् स्वलाङ्गूलम् धुन्वन्ति ।

२१. दुरापमपि लोकेऽस्मिन् यद्यद्वस्त्वभिवाञ्छति ।
तत्तदाप्नोति मेधावी तस्मात्कार्यः समुद्यमः ॥

२२. न दुनोति दयालुत्वाद्वचसा कंचिदप्यासौ
दुरुक्तैरपि दीनानां मनस्तस्य न दूयते ॥

२३. दृष्टं किमपि लोकेऽस्मिन्न निर्दोषं न निर्गुणम् ।
आवृणुध्वमतो दोषान्विवृणुध्वं गुणान्बुधाः ॥

२४. अलक्ष्मीराविशत्येनं शयानमलसं नरम् ।
निःसंशयं फलं लब्ध्वा दक्षो भूतिमुपाश्नुते ॥

२५. तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥

२६. विवृण्वतेव कल्याणमान्तरज्ञेन चक्षुषा ।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते ॥

: शब्दकोश :

अशू (अश्नुते) to get, to enjoy. प्राप्त करना, भोगना,

आप् (प. आप्नोति) to obtaln, to go to. प्राप्त करना

चि (चिनोति-ते) to collect इकट्ठा करना, सम्+चि अव+चि

दु (दुनोति) to give pain. दुःख देना,

धू (उ.-धूनोति,-धूनते) to shake. हिलना,

स्तृ (स्तृणोति-णुते) to cover, to spread. ढाँकना. बिछाना,

उप+अश्-to acquire. प्राप्त करना,

वि+अश्-to pervade to occupy, प्रसारना, कबजा करना.

वि+वृ (उ.) to disclose, to reveal. खुला रखना

हिरण्यकशिपु } names of demons.
हिरण्याक्ष } (पुं.) राक्षसोका नाम

दनु-दानव (पुं.) demon.

करुणाप्राय (वि.) pathetic. करुण,

वर्णन (न.) description. वर्णन,

आमूलात् to its foundation. मूलसहित

अग्र (अ.) further. आगेका

मनोधर्म-passion, मनकी इच्छा, मनका बिकार काम

धृष् (धृष्णोति) to be bold, to be brave. बहादुरी बताना,

वृ (वृणोति, वृणुते) to cover, to ehoose. ढाँकना, पसंद करना,

श्रु (श्रृणोति) to hear. सुनना,

साध् (साध्नोति) to acoomplish. साधना,

सु (सुनोति-नुते) to extract the juice of. रस निकालना,

हि (हिनोति-नुते) - to send, to throw. भेजना, फेंकना (प्रहिणोति-णुते)

आ+वृ-(उ.) to restrain, to conceal, to cover. छिपाना, ढाँकना,

शक् (प.) to be able. सकना,

सम्+वृ to shut. ढाँकना, बंध करना

दूरदर्शिन् (वि.) prudent. दीर्घ-दर्शी, प्राज्ञ,

सौकर्य (न.) with ease, सरलता से;

दुष्कर (वि.) difficult. कठिन,

प्रति-श्रु- to vow, to promise. प्रतिज्ञा करना,

संयमिन् (वि.) restrainer. संयमी

नि+रूप् (१० उ.) to observe. निरीक्षण करना,

कुथ (पुं.) mat. चटाई,
सभाखण्ड (न.) hall सभाखण्ड,
ऋत्विज् (पुं.) Sacrificial Priest. पुरोहित, याज्ञिक,
अलम्-(अ.) enough Competant. पर्याप्त,
दुराप (वि,) difficult to obtain. कठिनतासे प्राप्त होना,
समुद्यम (पुं.) Proper industry. अच्छा उद्योग,
सोम-the name of a plant. सोम नामक पौधा.
शयान (शी-वर्त-कृ) Sleeping.
आन्तरज्ञ Knower of inner of things, soul. (पुं.) अन्तर को जाननेवाला,
स्फुरता-throbbing. स्फुरता हुआ,
वामक left, ill-omens. (पुं.) बाँया,
दाक्षिण्यम्-right, good omens दाँया, शुकन, शच्छा,
चेत (अ.) If, So that. जो कि,
अल्पजीवन (न.) Short life. थोडा जीवन,
ऐश्वर्य (न) divinty, greatness. ऐश्वर्य,
आन्तरचक्षुस्-(न.) internal eye, Spiritual eye. आंतरचक्षु,
दूरी+कृ-(८. उ.) to evade. दूर करना,
कार्पण्यता (स्त्री.) Cowardness. कायरता,
वालि (पुं.) the chief of the monkeys. वानरोंका राजा,
हन् (र. प.) to Kill. मारना,
मुद् (स्त्री.) with zeal. आनंदपूर्वक,
आरोहक (पुं.) ascender. ऊपर चढ़नेवाला,
स्थविर-(पुं.) old man. वृद्धजन,
रणयान (न,) tank for battle. रणगाडी,
पुत्रेप्सु (पुं.) desirous of a son. पुत्रकी इच्छावाला,
क्षित (क. भू. कृ) thrown. डाली हुई,
तृणाग्निज्वाला (स्त्री.) the blaze of the fire of grass. तृणाग्निकी ज्वाला

: स्वाध्याय :

(अ) Translate into Sanskrit.

(1) If you hear my words you will accomplish your benefits (साध्)

(2) I shook some trees and collected some fruits. (अव+चि)

(3) Oh my friend ! why do you give me useless pain(दु) by uttering such words ? (दु) (4) Who will be bold enough to kill you while I am living, that was told by Duryodhana to Jayadhrath. (घुष्) (5) Dasharath sent (प्र+हि) Sumantra to bring back Rama, Lakshmana and Seeta from the forest. (6) A man has to collect (सम्+चि) merits by performing good actions in a short life. (7) O Lord of the universe, (जगन्नायक) Man is not able (शक्) to see your splendour, (ऐश्वर्य) with his own physical eyes but he can see with his own internal eyes. (8) Arjuna shows his own (वि+वृ) cowardness (कार्पण्य) to evade his grief before Krishna. (9) Sugreeva promised (प्रति+श्रु) Rama for Killing Vali to search Seeta. (10) O cuckoo ! we are hearing your song, pleasing to the ears joyfully.

(ब) Fill in the blanks with suitable forms of verbs.

(१) धीमन्तः जनाः आत्मनः मत्या बलेन च सर्वकार्यम् ______ (साध्). (२) यः स्थविराणां बोधं न ______ स दुःखभाग् भवति । (श्रु) (२) केचिदारोहकाः हिमालयस्य शिखरम् न आरोढुम् ______ किंतु द्वौ आरोहकौ तं आरोढुम् ______ । (शक्). (४) यदा युद्धे शूराणाम् शत्रुभिः रणयानानि नष्टानि अभवन् तदा ते अन्यानि ______ पुनरयुध्यन्त । (आप्) (५) नन्दिनी पुत्रेप्सुम् दिलीपम् पुत्राय ______ (प्रति+श्रु) । (७) यः वनस्पतेरपक्वानि फलानि ______ सः केवलं रसम् न ______ किंतु तेभ्यो बीजानि अपि विनश्यन्ति । । (प्र+चि, आप्) (८) अन्धः शिरसि क्षिप्ताम् स्रजम् अहिशङ्कया ______ । (धु) (९) खलु तृणाग्निज्वाला समुद्रजलं तापयितुम् न ______ । (शक्) (१०) यदि त्वम् पंचदिनेषु इदम् कार्यम् ______ तर्हि भूरि धनं ______ । (साध्, चि).

(क) Form the Compounds of the following words and name them.

(१) बलवान् दनुः (२) दुष्कराणि कार्याणि (३) कामान् क्रोधम् लोभम् च (४) नृपस्य सचिवाः (५) अन्यः देशः (६) धर्मस्य तत्त्वानि (७) स्वामिनः अग्रे (८) आत्मनः मतिः (९) स्थविराणां बोधः (१०) हिमालयस्य शिखरम् (११) नीलाः मेघाः ।

(ड) Dissolve the following compounds and name then.

(१) करुणाप्रायैः (२) अग्राध्ययनाय (३) मनाधर्मान् (४) स्वपुत्रान् (५) पाण्डवनाशाय (६) सभाखण्डम् (७) पक्षिशावकान् (८) श्वलाङ्गूलम् (९) दुरापः (१०) समुद्यमः (११) दुरुक्तेः (१२) निर्दोषम् (१३) निर्गुणम् (१४) निःसंशयम् (१५) आन्तरज्ञेन (१६) सर्वकार्याणि (१७) दुःखभाग् (१८) कर्णप्रियम् (१९) अहिशङ्कया (२०) समुद्रजलम् (२१) पञ्चदिनेषु (२२) तृणाग्निज्वाला (२३) चर्मचक्षुषा (२४) जगन्नायक

(इ) Recognise the following forms given :-

व्यश्नुते, अधुनोत्, अदुनोत्, शृण्वन्ति, चिनु, प्रहिण्वन्ति, विघृणोति, संचिनोति, प्रत्यश्रृणोत्, आप्नुवन्, प्राहिण्वन्, स्तृण्वन्तु धृष्णुयुः, असुन्वन्, दुनुत, शक्नोषि, विचिन्वताम्

(ई) Give the forms of the following roots.

(१) वर्तमान तृ. पु. ए. व.–साध्, श्रु, क्षि, स्तृ, आ+वृ.
(२) आज्ञार्थ द्वि. पु. ए. व.–आप्, अश् धु, वि + वृ, प्र + हि.
(३) ह्यस्तनभूत द्वि. पु. ब.–व. शक्, स्तृ, अश्, वि + धु, धृष्.
(४) विध्यर्थ तृ. पु. ए. व.–सु, सम्+वृ, आ+राध्, क्षि, दु.

(उ) Give synonyms of the following words.

लोक, व्यापार, रस, तैल, कुथ, गुप्त, चर, अलस, दाक्षिण्य, राज्यतन्त्र.

चतुश्चत्वारिंशः पाठः ।

अष्टमः गणः ।

The conjugational sign of the eighth गण is उ to be added to the roots. Before appending उ of this conjugation certain changes take place as in the fifth गण.

(1) The conjugational sign of 8 th conj. is उ. तन्+उ.=तनु। (तनादिकृञ्भ्यः उ)

(2) and it takes गुण before S. T. just as तनोमि, तनोषि, तनवानि etc. (सार्वधातुकार्धधातुकयोः)

(3) Before व and म् it becomes तन्वः–तनुवः। तन्मः–तनुमः। Before V.W. T. उ becomes व् =तन्वन्ति। In आज्ञार्थ द्वि, पु. ए. व. हि is dropped in the absence of संयुक्त व्यंजन। The Sutras are the same as in 3rd conj.

(4) The verb कृ (to do) takes गुण before S. T. and becomes कर् while it is कुर् before W. T. e. g. करोमि कुर्व.। (अत उत्सार्वधातुके)

(5) The conj. sign is dropped before terminations beginning with व, म and य constantly कुर्वः, कुर्मः, कुर्याम्। (नित्यं करोतेः)

तन् (उ) To spread

वर्तमानकाल

परस्मैपद			आत्मनेपद		
प्र. तनोमि	तनुवः	तनुमः।	तन्वे	तनुवहे	तनुमहे।
	तन्वः	तन्मः।		तन्वहे	तन्महे।
द्वि. तनोषि	तनुथः	तनुथ।	तनुषे	तन्वाथे	तनुध्वे।
तृ. तनोति	तनुतः	तन्वन्ति।	तनुते	तन्वाते	तन्वते।

आज्ञार्थ

प्र. तनवानि	तनवाव	तनवाम।	तनवै	तनवावहै	तनवामहै।
द्वि. तनु	तनुतम्	तनुत।	तनुष्व	तन्वाथाम्	तनुध्वम्।
तृ. तनोतु	तनुताम्	तन्वन्तु।	तनुताम्	तन्वाताम्	तन्वताम्।

ह्यस्तनभूतकाल

प्र. अतनवम्	अतनुव	अतनुम।	अतन्वि	अतनुवहि	अतनुमहि।
	अतन्व	अतन्म।		अतन्वहि	अतन्महि।
द्वि. अतनोः	अतनुतम्	अतनुत।	अतनुथाः	अतन्वाथाम्	अतनुध्वम्।
तृ. अतनोत्	अतनुताम्	अतन्वन्।	अतनुत	अतन्वाताम्	अतन्वत।

विध्यर्थ

प्र. तनुयाम् तनुयाव तनुयाम । तन्वीय तन्वीवहि तन्वीमहि ।
द्वि. तनुथाः तनुयातम् तनुयात । तन्वीथाः तन्वीयाथाम् तन्वीध्वम् ।
तृ. तनुयात् तनुयाताम् तनुयुः । तन्वीत तन्वीयाताम् तन्वीरन् ।

परस्मैपद — वर्तमानकाल — आत्मनेपद

प्र. करोमि कुर्वः कुर्मः । कुर्वे कुर्वहे कुर्महे ।
द्वि. करोषि कुरुथः कुरुथ । कुरुषे कुर्वाथे कुरुध्वे ।
तृ. करोति कुरुतः कुर्वन्ति । कुरुते कुर्वाते कुर्वते ।

— आज्ञार्थ —

प्र. करवाणि करवाव करवाम । करवै करवावहै करवामहै ।
द्वि. कुरु कुरुतम् कुरुत । कुरुष्व कुर्वाथाम् कुरुध्वम् ।
तृ. करोतु कुरुताम् कुर्वन्तु । कुरुताम् कुर्वाताम् कुर्वताम् ।

— ह्यस्तनभूतकाल —

प्र अकरवम् अकुर्व अकुर्म । अकुर्वि अकुर्वहि अकुर्महि ।
द्वि. अकरोः अकुरुतम् अकुरुत । अकुरुथाः अकुर्वाथाम् अकुरुध्वम् ।
तृ. अकरोत् अकुरुताम् अकुर्वन् । अकुरुत अकुर्वाताम् अकुर्वत ।

— विध्यर्थ —

प्र. कुर्याम् कुर्याव कुर्याम । कुर्वीय कुर्वीवहि कुर्वीमहि ।
नि. कुर्याः कुर्यातम् कुर्यात । कुर्वीथाः कुर्वीयाथाम् कुर्वीध्वम् ।
तृ. कुर्यात् कुर्याताम् कुर्युः । कुर्वीत कुर्वीयाताम् कुर्वीरन् ।

करोमि -- कृ + उ + मि = कर् + ओ = करोमि ।
करवाणि - कृ + उ + आनि = कर् + ओ + आनि=कर + अव् + आणि करवाणि । कृ + उ + याम् = कुर्याम् ।

-- वर्तमानकृदंत --

(8) The present participle of roots of the fifth and eighth conjugations is formed in Parasmaipada by adding अत् and in the second group of Atmanapada by adding आन to the verb, e. g. आप्नुवत्, श्रृण्वत्, चिन्वत् तन्वत्, कुर्वत् and अश्नुवान्, चिन्वान, तन्वान, कुर्वाण etc.
पुं. प्र. सं. कुर्वन् कुर्वन्तौ कुर्वन्तः । कुर्वन्तम् कुर्वन्तः । नपुं. प्र. सं. कुर्वत् कुर्वती कुर्वन्ति । स्त्री. कुर्वती.

—संस्कृत–वाक्यानि—

१ जनोऽयं न शक्नोति भारं वोढुमतः कुर्वस्मै साहाय्यम् ।

२ पुरा नृशंसो दनुः हिरण्याक्षः जनाश्चादुनोत् । ततो विष्णुर्वराहरूपं धृत्वा स्वेन दन्तेन तं दानवमक्षिणोत् । तेन वसुधा भयात् रक्षिता । पश्चात् तस्य भ्राता हिरण्यकशिपुः स्वशासनं त्रैलोक्ये व्यस्तृणोत् । सः साक्षाद् यमदेवमधृष्णोत् । यः तं नियन्तुं नाशक्नोत् । अतो विष्णुः नृसिंहरूपमादाय तं खण्डशः अकरोत् ।

३ कः त्वाम् न प्रशंसति लोके तव कीर्तिम् च न तनोति ।

४ एवम् कुर्वन्तः यूयम् आत्मनः लघुताम् न आविष्कुरुथ ।

५ यदा विश्वामित्रः तपोवने यज्ञमतनुत तदा ताटका तम् तन्वानमभ्यगच्छत् ।

६ रामः रावणस्य वक्षसि बाणेनाक्षिणोत् ।

७ मुदिताः कवयः राज्ञाम् यशांसि सर्वासु दिक्षु प्रतन्वन्ति ।

८ कार्यारम्भं कुर्वता नरेण परिणामश्चिन्तनीयः ।

९ किमहं तेषाम् विरोधं वितन्वन्तम् स्वकार्यम् साध्नुयाम् ।

१० क्रुद्धाः वानराः विहगानाम् वृक्षेषु स्थितान् नीडान् खण्डशोऽकुर्वन् ।

११ अमृताः कथाः शृण्वता मया न तृप्तिरनुभूयते ।

१२ भूतानाम् अङ्गानि दुःखसंतापेन पच्यन्ते इव, हृदयम् उत्क्वथ्यते इव, दृष्टिः प्लुष्यते इव इति अनुभूयन्ते । अतः भूताः प्राप्तकालमुचितं कुर्वन्तु ।

१३ कुलीनैः सह संपर्कं सज्जनैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति ॥

१४ श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥

१५ कुर्वन्नपि व्यलीकानि यः प्रियः प्रियः एव सः ।
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥

१६ पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत्कुर्याद्येनामुत्र सुखं वसेत् ॥

१७ सुवर्णपुष्पां पृथ्वीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

—: शब्दकोश :—

कृ (करोति-कुरुते) to do, करना
वशी+कृ–to conquer, जीतना
अङ्गी+कृ–to betake one self, to accept, स्वीकार करना
आविस्+कृ–to lay bare, to open, आविष्कार करना
(आविष्करोति) to find out, प्राप्त करना
तिरस्+कृ–to despise, तिरस्कार करना
प्रति+कृ–to retaliate, to resist, प्रतिकार करना
उप+कृ–to help, उपकार करना
सहाय (पुं.) helper, सहायक
वराहरूप–form of a boar, वराह का रूप
नृशंस (वि.) cruel, क्रूर
त्रैलोक्य (पुं.) three worlds, तीनलोक
नि+यम् (१. प.) to restrain, नियमन करना, वशमें (नियन्तुम्) रखना
नृसिंह (पुं.) the form of a man-lion, नर और सिंहका रूप
दनु (पुं.) demon, राक्षस
खण्डशः-to cut into pieces, टुकडा करना
परिणाम (पुं.) result, परिणाम
चिन्तनीय-(वि) previously thought out, विचार करके
तृप्ति-(स्त्री.) satisfaction, तुष्टि, संतोष
दुःखसंताप (वि) afflicted with pain, दुःख से पीडित
उद्+क्वथ् (१. प.) to boil, उबालना
तन्-(तनोति-नुते) to spread, to perform sacrifice प्रसारना यज्ञ करना (प्र+तन्)
वन्-(वनुते) to beg, याचना, करना
क्षिण्-क्षण् (क्षिणोति-क्षणोति) to wound, to kill, घायल करना मारना
परि+कृ, अलम् + कृ (परिष्करोति, अलंकरोति-कुरुते)
to adorn, to clean, सुशोभित करना
मन् (मनुते) to believe मानना
प्लुष् (१. प) to burn, जलना
प्राप्तकाल-(पुं.) according to time, समयानुसार
कुलीन (पुं.) person of a noble family, कुलीन
मुदित-(वि.) pleased joyous, खुश होकर
अपराह्णिक (वि.) afternoon, पीछेका प्रहर

पूर्वाह्न (पुं) forenoon, प्रथम प्रहर
सुवर्णपुष्प (न.) the flower in the form of gold, सुवर्णरूपी पुष्प
कृतविद्य-(पुं.) one who is learned, जिसने विद्या प्राप्त की है
दुर्वृत्ति (स्त्री,)-misconduct, दुराचारण
दुर्गति (स्त्री.) adversity misfortune, दुर्गति, दुःख
पांशु (पुं.) dust, धूलि
मेल (पुं.) to make friendship, संबंध
गृहिणी (स्त्री.) household woman, गृहिणी
भाव (पुं.) feeling, ऊर्मि
श्वःकार्य (न.) tomorrow's duty or work, कलका कार्य
वल्लभ-(वि) dear, प्रिय
व्यलीक (न.) falsehood, झूठा
अमुत्र-(अ.) in the other world, परलोक
दुष्ट (वि.) blemish, दूषित
सुखभाज् (वि.) happy, सुखी
भाव (पुं) ऊर्मि, भावना
व्योमन् (न.) sky, आकाश
शासन-आधिपत्य (न.) sway, command, शासन
संवृद्ध (वि.) increased, बढ़ा हुआ
आय (पुं) income, आय
व्यय (पुं.) expenditure, खर्च
संपर्क (पुं.) contact, संपर्क
बुध् (४ आ) to know, जानना
संकट-(न.) hardship, संकट
अनुराग-(पुं.) affection, स्नेह

— स्वाध्याय —

(अ) Translate into Sanskrit.

(1) one who does evil deed, suffers adversity at last (2) The Pandavas performed sacrifices on the banks of the Ganges. (3) If I am not a culprit then why do you pain (hurt) me. (4) That girl found out the mother's necklce lying in the dust (5) The house-wife should keep the house clean before the arrival of the guest. (6) Just as the sky is adorned by the stars, the man should adorn his body with ornaments, intellect by pure knowledge, mind by pure ideas.

(determinations). (7) The chataka bird does not beg water form others except the cloud. (8) When Rama was ruling, the subjects were happy. (9) O foolish-man, you have not done a good thing by acting against with your brothers. (10) A little pervaded fire burnt the whole village to ashes.

(ख) Fill in the blanks with the suitable forms of the verbs given.

(१) सज्जनाः परेषाम् ____ अतः ते पुण्यानि____। (उप+कृ, सम्+चि) (२) प्रयत्नं सततं ____संपदं लभते नरः। (कृ) (३) विहगाः वने जालं____व्याधं अपश्यन्। (वि+तन्) (४) बुधः लेखेन विना व्यवहारं सदा न____। (कृ)। (५) अथ प्राणिनाम् मरणमवश्यमेव अतः यूयम् किमर्थम् मुधा स्वयशः मलिनं____। (कृ)। (६) प्रायः जनाः स्वसंकटानि नष्टुम् राज्यतन्त्रेऽनुरागम्____। (आविस्+कृ). (७) मा____बलवन्तम् शत्रुम्। (तिरस्+कृ)। (८) यदि त्वम् किमपि कार्यं भारं मन्यसे तर्हि त्वम् किंचिदपि अस्मिन् जगति न____(आप) (९) कः त्वाम् न प्रशंसतु कीर्तिम् च न____। (तन्) (१०) आयात् अधिको व्ययः____किम् स निर्धनो न भवति। (कृ)

(ग) Form the compounds of the following words and name them.

(१) नृशंसो दनुः (२) स्वेन दन्तेन। (३) तस्य भ्राता (४) आत्मनः लघुताम् (५) मुदिताः कवयः (६) क्रुद्धाः वानराः (७) अमृताः कणाः (८) भूतानाम् अङ्गानि (९) नद्याः तटे (१०) प्राणिनाम् मरणम्।

(ड) Dissolve and name the compounds.

(१) वराहरूपम् (२) दुःखसंतापेन (३) प्राप्तकालेन (४) अमुत्र (५) दुर्वृत्तिम् (६) दुर्गतिम् (७) निर्मूलज्ञानेन (८) शुद्धसंकल्पैः (९) सुखभाग् (१०) संबुद्धः (११) राज्यतन्त्रम् (१२) सर्वग्रामम् (१३) सुवर्णपुष्पम् (१४) कृतविद्यः।

(इ) Recognise the following forms of the verbs.
कुर्वतः, अक्षिणोत्, प्रतन्वन्ति, अकुर्वन्, आविष्कुरुत, अशक्नोत् कुर्वाणः, कुर्यात्, अतन्वन्, परिष्कुरुत, अलंकरोति, अदुनोत्।

(ई) Give the required forms of the verbs given.

(१) वर्तमान तृ. पु ब. व.–सम्+चि. परि+कृ, तन्, शक्.
(२) आज्ञार्थ द्वि. पु. ए. व.–अव+चि, मन्, उप+कृ, क्षिण्, आप्.
(३) ह्यस्तनभूत तृ. पु. ब. व.–सम्+चि, अलं+कृ, वि+तन्
(४) विध्यर्थ प्र. पु. व. व.–परि+कृ, क्षिण, वन्
(५) वर्तमान कृ. प्र. ए. व.–कृ. (स्त्री) तन् (पुं.) सम्+चि (पुं.) आप् (स्त्री.)

(फ) Give the synonyms of the following words.

यज्ञ, संताप, पूर्वाह्ण, अमुत्र, शूर, दुर्गति, हार, चातक, वृद्धि, ब्राह्मण।

पंचचत्वारिंश पाठ।

नवमः गणः ।

(1) The sign of the ninth conjungation is ना added to the roots. The strong terminations take ना before them. But it becomes नी before weak terminations beginning with consonants and before these weak terminations beginning with vowels नी drops its final ई and become न्. (क्र्यादिभ्यः श्ना)

(१) क्री+ना+मि=क्रीणामि । (२) क्री+ना+वः=क्री+नी+वः=क्रीणीवः (ईहल्योघः)–here the आ of ना ia changed to ई (उ) क्री+ना+अन्ति =क्रीणन्ति (श्नाभ्यस्तयोरात) the आ of ना is dropped here.

क्री (उ) to buy

वर्तमानकाल

	परस्मैपद			आत्मनेपद		
प्र.	क्रीणामि	क्रीणीवः	क्रीणीमः ।	क्रीणे	क्रीणीवहे	क्रीणीमहे ।
द्वि.	क्रीणासि	क्रीणीथः	क्रीणीथ ।	क्रीणीषे	क्रीणाथे	क्रीणीध्वे ।
तृ.	क्रीणाति	क्रीणीतः	क्रीणन्ति ।	क्रीणीते	क्रीणाते	क्रीणते ।

आज्ञार्थ

प्र.	क्रीणानि	क्रीणाव	क्रीणाम ।	क्रीणै	क्रीणावहै	क्रीणामहै ।
द्वि.	क्रीणीहि	क्रीणीतम्	क्रीणीत ।	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम् ।
तृ.	क्रीणातु	क्रीणीताम्	क्रीणन्तु ।	क्रीणीताम्	क्रीणाताम्	क्रीणताम् ।

ह्यस्तनभूतकाल

प्र. अक्रीणाम् अक्रीणीव अक्रीणीम । अक्रीणि अक्रीणीवहि अक्रीणीमहि ।
द्वि. अक्रीणाः अक्रीणीतम् अक्रीणीत । अक्रीणीथाः अक्रीणाथाम् अक्रीणीध्वम्
तृ. अक्रीणात् अक्रीणीताम् अक्रीणन् । अक्रीणीत अक्रीणताम् अक्रीणात ।

विधध्यर्थ

प्र. क्रीणीयाम् क्रीणीयाव क्रीणीयाम । क्रीणीय क्रीणीवहि क्रीणीमहि ।
द्वि. क्रीणीयाः क्रीणीयातम् क्रीणीयात । क्रीणीथाः क्रीणीयाथाम् क्रीणीध्वम् ।
तृ. क्रीणीयात् क्रीणीयाताम् क्रीणीयुः । क्रीणीत क्रीणीयाताम् क्रीणीरन् ।

The verb ज्ञा (to know) becomes जा, the forms are जानामि, जानीवः, जानीमः । (ज्ञाजनोर्जा–ज्ञा–जन् is substituted to जा) but ज्या is changed जि. जिनामि.

(3) The penultimate nasal of a verb of this conjugation is dropped e,g. बन्ध्, ग्रन्थ्, स्तम्भ्, मन्थ्–बध्ना–बध्नी, ग्रथ्ना ग्रथ्नी ।

(4) verbs ending in consonant form their Imperative 2nd pers sing. by the termination आन instead of adding हि. बंध्–बधान, ग्रथान, ग्रहाण । (हलः परस्य श्नः शानज्झौ)

(5) The twenty four ninth–conjugation verbs पू, लू, स्तृ, कॄ, वृञ्, धू, शॄ, पॄ, वृ, दॄ, जॄ, झॄ, धॄ, नॄ, कॄ, ॠ, गॄ, ज्या री, ली, व्ली, प्ली, प्वादीना ह्रस्वः shorten their final vowel before ना. पू–पुनामि–पुने । लू–लुनाति–लुने । ॠ–ॠणामि आर्णम्–आर्णीव–आर्णीः । ॠणानि ॠणीयाम् । कॄ–कृणामि–कृणे–अकृणाम्–अकृणि, कृणानि–कृणै ।

(b) In the case of the verbs क्षी, भ्री, and व्री optionaly shorten their vowel क्षी–क्षिणामि–क्षीणामि । प्रिणामि–प्रीणामि । व्रिणामि–व्रीणामि ।

(व) भ्रिणामि–भ्रीणामि, अभ्रिणाम्–अभ्रीणाम्, भ्रिणानि–भ्रीणानि व्री–व्रिणामि–व्रीणामि ।

(७) अश्, क्लिश्, क्षम् etc. The forms of verbs ending cons. are अश्-अश्नामि-आश्नाम। अश्नानि-अशान-अश्नीयाम्। क्षुभ्-क्षुभ्नामि, अक्षुभ्नात्-क्षुभ्नानि, क्षुभान-क्षुभ्नीयाम्। Here न् is not changed is ण. ग्रन्थ्-ग्रथ्नामि-अग्रथ्नाम्-ग्रथ्नानि-ग्रथान-ग्रथ्नीयाम्। ग्रह -गृहणामि-गृह्णे अगृह्णाम्-अगृह्णि, गृह्णानि-ग्रहणै, खच्-खश्नामि-अखश्नाम्-खश्नानि-खश्नान।

(8) These verbs are of 5th and 9th स्कु (उ.) स्तम्भ्, (प.) स्कम्भ्, (प.) स्कुम्भ्, (प) स्तुम्भ् (स्तन्यु-श्नुश्च) स्कुनोति-नुते, स्कुनाति-नीते, स्तम्भनोति-नाति, स्कभ्नोति-नाति। स्तुभ्नोति-नाति। स्तभान। स्तुम्भनाति।

(9) Roots with Prefixes अनुजानामि-जाने, अन्वजानाम्-अन्वजानि। निगृह्णामि-निगृह्णे। न्यगृह्णाम्-न्यगृह्णि। संगृणामि। समगृणाम्। Root क्री is आत्मनेपदी when it is with परि, वि, अव (परिव्यवेभ्यः क्रियः।) परिक्रीणे-पर्यक्रीणि। विक्रीणे-व्यक्रीणि। अवक्रीणे-अवाक्रीणि। अनुगृह्णामि-अनुगृह्णे। अन्वगृह्णाम्-अन्वगृह्णि। अभिजानामि-अभिजाने। अभ्यजानाम्-अभ्यजानि। आस्तृणामि-आस्तृणे।

संस्कृत-वाक्यानि।

१ केचित् प्राणिनः तृणम् केचित् च मांसमश्नन्ति।
२ गुणलुब्धाः संपदः स्वयमेव विमृश्यकारिणं वृणते।
३ सैनिकाः चौरस्य हस्तौऽश्नन् कारागारम् चानयन्।
४ व्यर्थानि पुस्तकानि मा क्रीणीहि।
५ वाल्मीकिः रामायणम् अग्रथ्नात् यस्मिन् सः रामस्य गुणान् पराक्रमान् चावर्णयत्।
६ भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि तेन वत्स वरं वृणीष्व।
७ विष्णुः शत्रूणाम् भयात् मुक्त्वा देवेषु मुनिषु नरेषु च अन्वगृह्णात्।
८ गोपाः मथुराम् गत्वा क्षीरम् नवनीतम् च व्यक्रीणत।
९ हिरण्याक्षहिरण्यकश्यपू समर्थौ भूत्वा समस्तजीवान् अक्लिश्नीताम्।
१० यदा देवाः असुराः च समुद्रम् अमथ्नन् तदा ते विषेण सहामृतमलभन्त।

११ ब्राह्मणाः प्रथमम् भूमिम् पुनीयुः पश्चात् यज्ञम् कर्तुम् प्रारभन्ताम्।

१२ सायंकाले अनिलः वृक्षाणाम् पर्णानि धुनाति।

१३ ये धनम् मुष्णन्ति राजपुरुषाः तान् दण्डयन्ति।

१४ एकादश्याम् दिने वयमन्नम् नाश्नीमः किंतु उपवासं कुर्मः।

१५ अस्मिन् देशे चिरम् स्थिताऽस्मि अतः स्वदेशम् प्रति गन्तुम् अनुजानीहि।

१६ यदा पापकृतः देवान् स्मरन्ति पूजयन्ति च तदा ते पुनन्ति।

१७ उद्याने बालाः एतानि रम्याणि कुसुमानि विलुनन्तु स्त्रजं ग्रथ्नन्तु च।

१८ आपणात् कियता मूल्येन इदम् पुस्तकमक्रीणात्।

१९ रोगात् तव देहम् प्रतिदिनम् क्षीयते अतः मे चित्तम् क्षुभ्नाति।

२० धूनोति चम्पकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणुः
तत्कानने धुवति चन्दनमञ्जरीश्च॥

२१ बाणावलिं किरत्याजौ करोति शरमण्डपम्।
कृणाति करिणः शत्रोः स कृणाति हयान्वरान्॥

२२ प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं
यदे तत्त्रयं जगति पुण्यकृतो लभन्ते॥

२३ स्तम्भते पुरुषः प्रायो यौवनेन धनेन च
न स्तभ्नाति क्षितीशोऽपि न स्तभ्नोति युवाप्यसौ॥

२४ स्तृणोति बाणजालैः स रणे वीरवरूथिनीम्।
तच्छिरोभिस्तृणात्युर्वीं तृणराजफलैरिव॥

२५ स्वप्नेऽपि नानृतां वाणीं संगृणाति स भूपतिः।
यस्य संगिरते किंचित्तस्मै तत्प्रतिपादयेत्॥

क्री-(उ) to buy खरीदना
परि, अव+क्री
प्री (उ) to please to love
खुश करना चाहना,
श्री (उ) to cook पकाना
ज्ञा-जा (उ) to know जानना
मी (उ) to destroy नाश करना
ज्या (प) to be old वृद्ध होना
प्ली (प) to go जाना
री (उ) to go जाना
ली (प) to melt पिघलना
व्ली (प) to choose पसंद करना
धू (उ) to shake हिलना
पू (उ) to purify पवित्र करना
लू (उ) to cut काटना
ॠ (प) to go जाना
कॄ (उ) to kill मारना
गॄ (प) to speak बोलना
जॄ (प) to be old वृद्ध होना
दॄ (प) to tear चीरना
नॄ (प) to lead मार्ग बताना
पॄ (प) to fill भरना
स्तॄ (उ) to cover ढाँकना
भॄ (प) to support सहाय करना, आश्रय देना ॥
मॄ (प) to kill मारना
वॄ (उ) to choose पसंद करना
शॄ (उ) to tear चीरना
स्तॄ (उ) to cover ढाँकना
क्षी (प) to kill मारना
भ्री (प) to fear भयभीत होना

व्री (प) to choose पसंद करना
अश् (प) to eat खाना
क्लिश् (प) to torture कष्ट देना
खष् (प) to come forth (खश्नामि) बाहर आना
श्रन्थ् (प) to loosen ढीला करना
कुन्थ् (प) to suffer pain दुःख सहन करना
स्कु (उ) to lift, to go by leaps उँचकना, कूदना
अनु+ग्रह् (उ) to favour अनुग्रह करना
वि+ग्रह् (उ) to war against युद्ध करना
गुणलुब्ध (वि) attracted by the virtues गुणोंसे लोभायमान
संपद् (स्त्री.) wealth संपत्ति
पराक्रम (पुं) exploit पराक्रम
विमृश्यकारिन् (पुं.) thoughtful, cautious विचारशील
अनुकम्पा (स्त्री) Mercy दया
नवनीत (न.) butter मक्खन
समस्त (वि.) all सब
भूतजात (न.) living-being जीवमात्र
स्फुटित (भू. कृ.) opened विकसित
अतिमुक्त (न.) name of a flower पुष्पका नाम
क्षुभ् (प.) to agitate क्षुब्ध होना

ग्रन्थ् (प.) to put, to-gether बाँधना,
बन्ध् (प.) to tie बांधना
स्तम्भ् (प.) to stop रोकना
मन्थ् (प.) to be haughty, to churn मथना
ग्रह् (उ.) to take लेना
पुष् (उ.)to nourish पोषण करना
प्लुष् (प.) to burn जलना
मुष् (प.) to steal चोरी करना
मृद् (प.) to pound चूर्ण-करना
स्कम्भ् (प.) to hinder रोकना
स्कुम्भ (प.) to stop to hold रोकना धारण करना
स्तम्भ् (प.) to stop to expel रोकना
नि+ग्रह् (उ.) to curb काबूमें रखना
आ+स्तृ (उ) to spread फैलाना
प्रति+बन्ध् (प.) to obstruct
रेणु (पुं.) pollen रज, धूलि
कॄ (६. प.) किरति, (to pour) to scatter बिखरना
पर (पुं.) foe शत्रु
शरमण्डप (न.) bower of arr-ows बाणोंका मण्डप
हय (पुं.) horse घोडा
सुचरित (न.) good action सदाचरण
समक्रिय (वि) even handed doing, equally समदृष्टिसे करना
पुण्यकृत् (वि.) doer of meri-tious deeds अच्छा काम करने-वाला
मञ्जरी (स्त्री.) blossom, sprout कलि
आवलि (पुं.) row हारमाला
आजि (पुं. स्त्री.) battle युद्ध
कलत्र (न.) wife पत्नी
तृणराज (पुं.) a palm tree ताड़का वृक्ष
वीरवरूथिनी (स्त्री.) army of warriors वीरोंकी सेना
प्रति+पद् to make over, to give देना, पालना
गॄ (ध. प.) to swallow निगलना (गिरति)
सम+गृ (६. आ.) (संगिरते) to promise वचन पालना
क्रयविक्रयक (पुं.) trader, deale सोदागर
यंत्र (न.) machine यंत्र
दैशिक-Countryman अपने देशके लोग
वैदिशिक (पुं.) foreigner विदेशी
उपार्जन (न.) acquisition प्राप्त करना
जलनलिका (स्त्री.) water pipe पानीकी नली

विस्रस्त (भू. कृ.) loosened, शिथिल हुआ
कियत् (वि.) कितना
उत्पथम् (अ.) to go astray बुरा मार्ग
शुचि (वि.) holiness पवित्रता
धू (१. उ.) to shake हिलाना
प्राञ्जलि (पुं.) by joining the hands हाथ जोड़कर
नाल (पुं.) stem नाला, दण्ड
परिपालन (न.) Protection रक्षण करना
सुरसंघ (पुं.) mass of gods देवताओं का समूह
ऊर्मि (स्त्री.) wave तरंग, लहरी
गृहस्थी (पुं.) householder गृहस्थी
जाल्म (पुं.) wicked person दुष्टव्यक्ति
निर्+भर्त्स् (१० आ.) to reprove
प्रति+आ+दिश्–to prevent रोकना
प्रति+बन्ध् (प.) to obstruct
वि+धू (धून्) (१० उ) विधूनयति

—: वर्तमान कृदंत :—

पुं. जानन् जानन्तौ जानन्तः। न. जानत् जानती जानन्ति। स्त्री. जानती।

— स्वाध्याय —

Q. 1. Translate into Sanskrit.

(अ) (1) Merchants buy machineary from foreign lands and sell them in their native country. (2) People of this country and also of other countries purified their souls by having a look at Mahatma Gandhi. (3) That woman binds her dishevelled hair with her own hands. (4) To protect the wealth obtained is more painfal to men than to obtain it. (5) One should please their guests coming to one's house by offering them food and water etc. (6) At present men fill water in every house through pipes. (7) Once Kalidas sat on a tree-branch and tried to cut this very branch. (8) Even intelligent persons should accept good words spoken by children. (9) Men have been able to gain this human body by paying its price of good meritious deeds. (10) Do you know in what direction

that wicke person has gone? (11) when tigers roam about the town, they carry away animals and tear up men into pieces.

(2) Fill in the blanks with the proper verb forms

(१) कामाः मनुष्यान् वारंवारम् उत्पथम् नयन्ति किन्तु ये तान् ____ते संयमिनः कथ्यन्ते । (नि ग्रह्) (२) आपत्सु मित्रम्____ युद्धे शूरम् ऋणे शुचिम् । भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् (ज्ञा) (३) शासितारः अमुम् लोकम् वत्समिव____ । (पुष्) । (४) अमी हि त्वाम् सुरसंघाः विशन्ति केचिद्भीताः प्राञ्जलयो____ । (गॄ) (५) कमलस्य नालाः____अपि तस्य तन्तवः परस्परम्____। (लू, ग्रन्थ्) (६) पद्मावती पवित्रतपोवनस्य दर्शनेन स्वजीवनम्____। (पू) (७) यान् यान् जनान् मिलथ तान् सर्वान् मधुरया वाचा ____ (प्री) (८) निशायाम् पर्णानि मा____च (धू, लू) (९) अस्मिन्नणु-युगे कोऽपि देशों युद्धम् न ____ । (वृ) (१०) इन्द्रः तस्य शत्रुम् वृत्रम् ब्राह्मणम्____ । (मृद्) (११) येषां हृदयम् संसारस्य रागद्वेषौ ____तेषां मनांसि शान्ति नानुभवन्ति । (ली) (१२) यथा समुद्रोर्मयो नदीं____तथा जगतः विपदो जनानाम् चेतः____। (धू, क्षुभ्) (१३) यदि अहम् गोपालम् अस्मात् कार्यात्____तर्हि शिक्षकः माम् ____ । (स्तम्भ्, निर्+भर्त्स्)

(3) Form the compounds of the following words.

(१) व्यर्थानि पुस्तकानि (२) शत्रूणाम् भयात् (३) देवेषु नरेषु च (४) क्षीरम् नवनीतम् च (५) अपराधिनाम् शीर्षाणि (६) एतानि रम्याणि (७) कियता मूल्येन (८) वृक्षस्य शाखायाम् (९) शोभनानि वचनानि (१०) महत् पुण्यम् (११) क्षीणेषु वित्तेषु (१२) कमलस्य नालाः (१३) मधुरया वाचा (१४) तेषाम् मनांसि (१५) जनानाम् चेतः ।

(4) Dissolve the following compounds and name them.

(१) गुणलुब्धाः (२) विमृश्यकारिणम् (३) हिरण्याक्षहिरण्यकशिपू (४) समस्तजीवान् (५) राजपुरुषाः (६) पापकृताः (७) चम्पकवनानि (८) स्फुटितातिमुक्तम् (९) चम्पकपुष्परेणून् (१०) चन्दनमञ्जरीः (११) बाणावलिः (१२) शरमण्डपम् (१३) सुचरितैः (१४) समक्रिया (१५) पुण्यकृतः (१७) क्षितीशः (१७) वीरवरूथिनीसेना (१८) तृणराजफलैः (१९) गृहस्थाः

(२०) उत्पथम् (२१) सुरसंघाः (२२) पवित्रतपोवनस्य (२३) रागद्वेषौः (२४) समुद्रोर्मयः (२५) तत्कानने (२६) महात्मागान्धीः

(E) Recognise the following forms given.

अश्नन्ति, वृणते, क्रीणीहि, अग्रश्नत्, अन्वगृह्णात्, प्रारभन्तु, धुनाति, मुष्णन्ति, अश्नीमः अनुजानीहि, पुनन्ति, विलुनन्तु, ग्रथ्नन्तु, क्षुभ्नाति, कृणाति, धुवति, लुनन्, अपुनात्, वृणीयात् ।

(F) Give the required forms of roots mentioned. below.

(१) वर्तमान द्वि. पु. प. व-क्लिश्, सम्+गॄ, मुष्, जॄ ।

(२) आज्ञार्थ तृ. पु. व. व-अव+ज्ञा, मृद्, वृ, श्रन्थ्,

(३) ह्यस्तनभूत तृ. पु. प. व-वि+क्री, दॄ नि+ग्रह्, लू

(४) विध्यर्थ द्वि. पु. व. व-पू, अनु+ज्ञा, मन्थ्, ली,

(५) वर्तमान कृ. प्र. प. व. प्री (पुं.) ग्रह् (न) क्री (स्त्री) क्षुभ्, (पुं.)

(G) Give the synonyms of the words given

लुब्ध, नवनीत, उपवास, स्वदेश, स्फुट, तृणराज, नालिकेर, पूग खर्जूर, वराह, चूर्णम्, यात्रा, वैदेशिक, अर्जित, आकम्पित, अतिथि-पूजा, शुश्रूषा, पर्यटनम्, जाल्म, मृणाल, उत्पक्षः,

षट्चत्वारिंशः पाठः ।

द्वितीयः गणः

या = (र. प.) To Go

	वर्तमानकाल			आज्ञार्थ		
प्र.	यामि	यावः	यामः ।	यानि	याव	याम ।
द्वि.	यासि	याथः	याथ ।	याहि	यातम्	यात ।
तृ.	याति	यातः	यान्ति ।	यातु	याताम्	यान्तु ।

	ह्यस्तनभूत			विध्यर्थ		
प्र.	अयाम्	अयाव	अयाम ।	यायाम्	यायाव	यायाम ।
द्वि.	अयाः	अयातम्	अयात ।	यायाः	यायातम्	यायात ।
तृ.	अयात्	अयाताम्	अयुः ।	यायात्	यायाताम्	यायुः ।

In the second conjugation the terminations are directly appended to the verb. There is no conjugational sign whatsoever. (अदिप्रभृतिभ्यः शपः)

८

(2) In the third person plural of Imperfect if roots ending in आ of 2nd conj. is formed by adding उस् optionally instead of अन् and so it is अयान् and अयुः. Before adding उस्, the final आ is dropped.

(२) नु (२. प.) To praise

वर्तमान			आज्ञार्थ		
प्र. नौमि	नुवः	नुमः ।	नवानि	नवाव	नवाम ।
द्वि. नौषि	नुथः	नुथ ।	नुहि	नुतम्	नुत ।
तृ. नौति	नुतः	नुवन्ति ।	नौतु	नुताम्	नुवन्तु ।

ह्यस्तनभूतकाल			विध्यर्थ		
प्र. अनवम्	अनुव	अनुम ।	नुयाम्	नुयाव	नुयाम ।
द्वि. अनौः	अनुतम्	अनुत ।	नुयाः	नुयातम्	नुयात ।
तृ. अनौत्	अनुताम्	अनुवन् ।	नुयात्	नुयाताम्	नुयुः ।

(३) शी (२ आ) To sleep

वर्तमानकाल			आज्ञार्थ		
प्र. शये	शेवहे	शेमहे ।	शयै	शयावहै	शयामहै ।
द्वि. शेषे	शेयाथे	शेध्वे ।	शेष्व	शयाथाम्	शेध्वम् ।
तृ शेते	शयाते	शेरते ।	शेताम्	शयाताम्	शेरताम् ।

(लङः शाकटायनस्यैव) In this way स्ना (to bathe) रा (to give), ला (to take), पा (to protect), ख्या (to tell), मा (to measure), भा (to shine), सा (to eat), श्रा (to cook), दा (to cut), प्रा (to fill) द्रा (to abandon) thery are all conjugated like या.

(3) Before consonant ending strong terminations the ending उ of the roots becomes औ. e.g. नौमि, नौतु, अनौत् (उतो वृद्धिः लुकि हलि)

(4) But before vowel ending weak terminations of the इ or उ roots ending इ or उ become इय् or उव् . So we have नुवन्ति अनुवन् (अचिश्नुधातुभ्रुवांय्वोरियङुवङौ) नु+अन्ति=नो+

आनि=नवानि । In this way कु (to make noise), शु (to catch) क्ष्णु (to sharpen), धु (to attack), यु (to join), सु (to show excellence) स्नु (to fall down), ह्नु (to conceal) रु (to cry) ह्नु वर्त ह्नुवे ह्नुमहे, ह्नुषे आज्ञा-ह्नवै, ह्नवावहै ।

ह्यस्तनभूत	विध्यर्थ
प्र. अशयि अशेवहि अशेमहि ।	शयीय शयीवहि शयीमहि ।
द्वि. अशेथाः अशयाथाम् अशेध्वम् ।	शयीथाः शयीयाथाम् शयीध्वम् ।
तृ. अशेत अशयाताम् अशेरत ।	शयीत शयीयाताम् शयीरन् ।

(5) In root शी the ending vowel takes गुण before all terminations and र् is rdded in तृ. पु. ब. व.

शये-शी+ए=शे-शय्+ए=शये । शेरते-शी+अते=शे+र्+अते=शेरते ।

अशयि-अ+शी+इ=अ+शे+इ अ शय् इ+अशयि । (शीङः सार्वधातुके गुणः, शीङो रुट्).

(४) स्तु. (२. उ.) To pray

(6) ई is added before cons. terminations optionally in तु, रु and स्तु. (तुरुस्तुशम्यमः सार्वधातुके).

स्तु (प.) वर्तमानकाल

प्र. स्तौमि-स्तवीमि स्तुवः-स्तुवीवः स्तुमः-स्तुवीमः । द्वि. स्तौषि -स्तवीषि स्तुथः-स्तुवीथः स्तुथ-स्तुवीथ । तृ. स्तौति-स्तवीति स्तुतः-स्तुवीतः स्तुवन्ति ।

(अ) स्तु+मि-स्तौ+मि=स्तौमि । (ब) स्तु+ई+मि=स्तव्+ई+मि=स्तवीमि । (क) स्तु+ई+वः=स्तुव्+ई+वः=स्तुवीवः ।-

वर्त. (आ)

प्र. स्तुवे स्तुवहे-स्तुवीवहे स्तुमहे-स्तुवीमहे । द्वि. स्तुषे-वीषे स्तुवाथे स्तुध्वे-वीध्वे तृ. स्तुते-वीते स्तुवाते स्तुवते ।

(Before Conseonant w. term. उ becomes उव् ।)

(आज्ञार्थ)

प्र. स्तवानि स्तवाव स्तवाम । स्तवै स्तवावहै स्तवामहै ।
द्वि. स्तुहि स्तुतम् स्तुत । स्तुष्व स्तुवाथाम् स्तुध्वम् ।
स्तुवीहि स्तुवीतम् स्तुवीत । स्तुवीष्व स्तुवीध्वम् ।
तृ. स्तौतु स्तुताम् स्तुवन्तु । स्तुताम् स्तुवाताम् स्तुवताम् ।
स्तवीतु स्तुवीताम् स्तुवीताम्

— ह्यस्तनभूतकाल —

प्र. अस्तवम् अस्तुव अस्तुम । अस्तुवि अस्तुवहि अस्तुमहि ।
अस्तुवीव अस्तुवीम । अस्तुवीवहि अस्तुवीमहि ।
द्वि. अस्तौः अस्तुतम् अस्तुत । अस्तुथाः अस्तुवाथाम् अस्तुध्वम् ।
अस्तवीः अस्तुवीतम् अस्तुवीत । अस्तुवीथाः अस्तुवीध्वम् ।
तृ. अस्तौत् अस्तुताम् अस्तुवन् अस्तुत अस्तुवाताम् अस्तुवत ।
अस्तवीत् अस्तुवीताम् अस्तुवीत

— विध्यर्थ —

प्र. स्तुयाम्-वीयाम् । द्वि. स्तुयाः-वीयाः तृ. स्तुयात्-वीयात् ।

आत्मनेपद प्र. स्तुवीय-वीवहि । स्तुवीथाः-वीयाथाम् । स्तुवीत-वीरन् ।

(1) Before Consonant S. T. अस्तौत्-अस्तवीत् । (2) Before Vowel S. T. स्तवानि. (3) Before Cons. W. T. स्तुवीहि-स्तुहि-स्तुत-स्तुवीत. (4) Before Vowel W. T. स्तुवन्तु-अस्तुवत ।

(५) रु (प.) To cry loudly

वर्तमान-रौमि-रवीमि, रुवः-रुवीवः । रौषि-रवीषि ।
आज्ञार्थ-रवाणि, रुहि-रुवीहि, रुतम्-रुवीतम् । रौतु+रवीतु ।
ह्यस्तनभूत-अरवम् अरुव-अरुवीव अरवः ।
विध्यर्थ-रुयाम्-रुवीयाम् । रुयाः-रुवीयाः । रुयात्-रुवीयात् ।

(६) ब्रू (उ) To say

(7) Before Cons. S. T. ई is added to ब्रू

(अ) ब्रू+ई+मि=ब्रो+ई+मि=ब्रव्+ई+मि=ब्रवीमि ।

वर्तमानकाल			आज्ञार्थ		
प्र. ब्रवीमि	ब्रूवः	ब्रूमः ।	ब्रवाणि	ब्रवाव	ब्रवाम ।
द्वि. ब्रवीषि	ब्रूथः	ब्रूथ ।	ब्रूहि	ब्रूतम्	ब्रूत ।
तृ. ब्रवीति	ब्रूतः	ब्रुवन्ति ।	ब्रवीतु	ब्रूताम्	ब्रुवन्तु ।

ह्यस्तनभूतकाल			विध्यर्थ		
प्र. अब्रवम्	अब्रुव	अब्रुम ।	ब्रूयाम्	ब्रूयाव	ब्रूयाम ।
द्वि. अब्रवीः	अब्रूतम्	अब्रूत ।	ब्रूयाः	ब्रूयातम्	ब्रूयात ।
तृ. अब्रवीत्	अब्रूताम्	अब्रुवन् ।	ब्रूयात्	ब्रूयाताम्	ब्रूयुः ।

ब्रू (आ)

वर्तमान-ब्रुवे ब्रूवहे । ब्रूषे ब्रुवाथे । ब्रूते ब्रुवाते ।
आज्ञार्थ-ब्रवै ब्रवावहै । ब्रूष्व ब्रूध्वम् । ब्रूताम् ब्रुवाताम् ।
ह्यस्तनभूत-अब्रुवि । अब्रूथाः । अब्रूत-अब्रुवन् ।
विध्यर्थ-ब्रुवीय, ब्रुवीवहि । ब्रुवीथाः । ब्रुवीत ।

(७) सू (आ) to Give birth

वर्तमानः प्र. सुवे सूवहे—। सूषे सूध्वे । सूते-(सुवाते)
आज्ञार्थ सुवै सुवावहै—। सूष्व—। सूताम्—
ह्यस्तनभूत असुवि असूवहि—। असूथाः—। असूत असुवाताम्—
विध्यर्थ सुवीय—। सुवीथाः—सुवीत—सुवीयाताम् ।

इ+अन्ति यन्ति There is no गुण before weak stem.

The forms of the verb ब्रू of तृ पु. are आह आहतुः आहुः । द्वि. पु. आत्थ आहथुः— are optionelly made

(8) Before S. T. of the verb सू गुण does not take (भूसुवोस्तिङि) but it becomes उव before vowel Term. (अचिश्नु)

(८) इ (प.) to go

Before V. W. T. the verb इ is changed to य् an exception of इय्, उव्

वर्त:-एमि इवः इमः एषि-इथः । एति इत यन्ति ।

आज्ञार्थ : अयानि अयाव—। इहि-इत । एतु इताम् यन्तु ।

ह्यस्तन : आयम् ऐव ऐम । ऐः ऐत । ऐत् ऐताम् आयन् ।

विध्यर्थ-आयम्-आ+इ+अम् आ ए+अम् आ+अय्+अम् आयम् ।

(२) आयन्-आ+इ+अन्-आ य् अन् आयन् । (इ is changed to य्।
Thus the forms of अनु+इ अव+इ take plaee

(९) अधि+इ (२ आ) To Learn

(अधि+इ+ए=अधि+इय्+ए=अधीये ।

(ख) अधि+इ+ए-अधि+ए+ए=अधि+अय+ए=अध्ययै ।

(क) अधि+आ+इ+इ=अधि+आ+इय्+इ इ is changed to इय्) अधि+ऐ+य्+इ=अध्यैयि

	वर्तमान			आज्ञार्थ	
प्र. अधीये	अधीवहे	अधीमहे ।	अध्ययै	अध्ययावहै	अध्ययामहै ।
द्वि. अधीषे	अधीयाथे	अधीध्वे ।	अधीष्व	अधीयाथाम्	अधीध्वम् ।
तृ. अधीते	अधीयाते	अधीयते ।	अधीताम्	अधीयाताम्	अधीयताम् ॥

	ह्यस्तनभूत			विध्यर्थ	
प्र. अध्यैयि	अध्यैवहि	अध्यैमहि ।	अधीयीय	अधीयीवहि	अधीयीमहि ।
द्वि. अध्यैथाः	अध्यैयाथाम्	अध्यैध्वम् ।	अधीयीथाः	अधीयाथाम्	अधीयीध्वम् ।
तृ. अध्यैत	अध्यैयाताम्	अध्यैयत ।	अधीयीत	अधीयाताम्	अधीयीरन् ।

(१०) अस् (२. प.)

The अ० of अस् before W. T. is dropped (श्नसोरल्लोपः) स्तः सन्ति ।

Before Vowel W. T. इ is changed to इय् and उ to उव्

(1) (B) In Imperative 2nd P. Sing. अस् becomes एधि (घ्वसोरेद्धावभ्यासलोपश्च) स is changed to ए and अ is dropped, हि is turned to धि. (हुझल्भ्यो हेर्धिः')

(12) In Imp. 2nd and 3rd p. sing. the cons. termi-

nations ई is added before स् and त्, आसीः and आसीत् are the forms. (अस्तिसिचोऽपृक्ते)

वर्तमानः- अस्मि स्वः स्मः । असि स्थः- । अस्ति स्तः सन्ति ।
आज्ञार्थः- असानि असाव- । एधि स्तम्- । अस्तु-सन्तु ।
ह्यस्तः- आसम् आस्व । आसीः-आस्त । आसीत्-आसन् ।
विध्यर्थः- स्याम् स्याव- । स्याः स्याताताम्- । स्यात्-स्युः ।
आसम् :-अस् + अम् = आ + अस् + अम् = आसम् ।

(अस्) आत्मनेपद

वर्त :-हे स्वहे स्महे । से साथे ध्वे । स्ते साते सते ।
आज्ञार्थ :-असै असावहै-। स्व साथाम् ध्वम् स्ताम् साताम्-।
ह्यस्तन :-आसि आस्वहि-। आस्थाः आसाथाम्-। आस्त-।
विध्यर्थ :-सीय सीवहि-। सीथाः सीध्वम् । सीत सीयाताम्-सीरन्।

(13) In present tense of प्र. ए. व. (आ.) स् is changed to ह and स् is dropped before ध् आध्वम्.

(११) आस् (आ)

वर्त :-आसे-आस्महे । आस्से-आध्वे । आस्ते-आसते ।
आज्ञा :-आसै आसामहै-। आस्स्व-आध्वम् । आस्ताम्-आसताम् ।
ह्यस्तन :-आसि आस्वहि-। आस्थाः आसाथाम्-। आस्त-आसत ।
विध्यर्थ :-आसीय-आसीमहि । आसीथाः आसीयाथाम् आसीध्वम् ।
आसीत-आसीरन् ।

वस् (२ आ.) to put on, similarly conjugated वसे वस्वहे-। वस्ते-वसते etc.

(१२) रुद् (२. प.)

(14) रुद् श्वस्, स्वप्, अन् and जक्ष् (all are Parsm.) take इ before all consonantal term. except य् and in Past. imperfeet 2nd and 3rd sing. ई is added optionally.

(१) रुद् + इ + मि = रोदिमि, श्वसिमि, स्वपिमि, अनिमि जक्षिमि are forms. (२) अरुद् + स्-अरोदः-अरोदीः-त् । ('रुदादिभ्यः सार्व-धातुकेवलादेः सार्वधातुकस्येट् स्यात् ।' 'रुदश्च पञ्चभ्यः-अपृक्तस्य ईट, स्यात् ।' (अड् गार्ग्यगालवयोः).

वर्त :-रोदिमि-रुदिमः । रोदिषि-रुदिथ । रोदिति-रुदन्ति ।
आज्ञार्थ :-रोदानि रोदाम । रुदिहि-रुदित । रोदितु-रुदन्तु ।
ह्यस्तन :-अरोदम्-अरुदिम । अरोदीः-दः अरुदितम्-। अरोदीत्-दत् -अरुदन् ।
विध्यर्थ :-रुद्याम्-रुद्याम । रुद्याः-रुद्यात । रुद्यात्-रुद्युः ।

(२) अन्-अनिमि-अनन्ति । आनीः-नः आनीत्-नत् । अन्याम्-अन्युः । अस्वपीत्-पत् । स्वपिहि । प्र+अन्-प्राणिति ।

(१३) जक्ष् (२. प.) to eat, to laugh.

जक्ष्, जागृ, दरिद्रा, शास् इङ्, वीङ्, चकास्

(15) These seven verbs are called अभ्यस्तसंज्ञा । (अ) In the case of 3rd. p. Plu. न् is dropped before these verbs (अदभ्यस्तात्-जक्षति) (व) In Imperfect 3rd. p. Plu. अन् is changed to उस् । (सिजभ्यस्तविदिभ्यश्चझेर्जुस्) अजक्षुः, अचकासुः ।

वर्त : जक्षिमि-वः मः । जक्षिषि-थः -थ । जक्षिति तः जक्षति ।
आज्ञार्थ : जक्षाणि-व-म । जक्षिहि-तम्-त । जक्षितु-जक्षतु ।
ह्यस्तनभूत : अजक्षम्-क्षिव-क्षिम । अजक्षीः-क्षः-त् । अजक्षीत्-क्षत्-अजक्षुः ।
विध्यर्थ : जक्ष्याम्- । जक्ष्याः- । जक्ष्यात्-जक्ष्युः ।

— संस्कृत-वाक्यानि —

(१) राजा नलः सर्वशास्त्राणि सर्वकलाः च अध्यैत । सः च कात्स्न्येन अश्वविद्यां पाकशास्त्रं च अवैत् । सः तस्य पत्नी दमयन्त्याः सह सुखेनावसत् तथा च सा द्वौ पुत्रौ असूत । तौ स्वभ्रात्रा छलेन विवासितौ स्वदेशात् निरगच्छताम् नदीषु अस्नाताम्, सूर्यमुपास्यताम् भक्त्या च अस्तुताम् । कालान्तरेण सा नलात् व्यपेत्य वने चिरमभ्रमत् । हे कान्ते, मा रुदिहि, समाश्वसिहि, त्वम् तव पतिना सह सद्य समेतीति दैववाणी तामब्रवीत् ।

(२) बालाः सत्यम् ब्रुवन्तु, स्वपितॄणामाज्ञामनुरुध्यन्ताम्, पाठशालायाम् यत्नतः अधीयन्ताम् ।

(३) कण्वऋषेराश्रमे शकुन्तला वल्कलमवस्त किंतु सा सौन्दर्येण महिष्याः अपि अत्यशेत ।

(४) यदि अहम् तदा हस्तिनापुरे स्याम् तर्हि अहम् धृतराष्ट्रम् ब्रूयाम् 'पाण्डवाणाम् धनम् कपटद्यूतेनापहर्तुम् न युक्तमिति' कृष्णः पाण्डवानब्रवीत् ।

(५) प्रातः सायम् च शकुनयः तरुकुञ्जरेषु रुवन्ति ।

(६) यान् यान् मिलसि तान् तान् शोभनानि नम्राणि च वचांसि ब्रूहि ।

(७) युधिष्ठिरस्य वचनेन वञ्चितः द्रोणाचार्यः शस्त्राण्यत्यजत् अर्जुनस्य च शस्त्रैः प्रहतः भूमौ अशेत ।

(८) धेनुः कीदृशः प्राणी अस्ति इति अस्मान् ब्रूहि ।

(९) क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ।

(१०) रिक्तहस्तस्तु नोपेयाद्राजानं दैवतं गुरुम च ।

(११) धार्तराष्ट्राः पाण्डवैः सहादिव्यन् तेषाम् सर्वम् धनमपाहरन् च । पाण्डवाः तदारण्यम् आयन् । तत्र बहवः ब्राह्मणाः तान् अन्वायन् । तदा युधिष्ठिरः तानब्रवीत् यूयमस्मान् नान्वीयात ।

(१२) सगरस्य भार्या षष्टिसहस्राणि पुत्रान् असुवत ।

(१३) त्वम् तव मित्रम् च पाठशालायाम् कान् विषयानधीयाथे ।

(१४) कृष्णे मथुरायाम् गते वज्राङ्गनाः उच्चैः अरुदन् ।

(१५) श्रवणस्य पितरौ दशरथाय प्राहतुः 'नयतु अस्मान् यत्र अस्माकम् प्रियपुत्रः मृतः अस्ति' ।

(१६) रात्रावुदयते चन्द्रो दिवोदयति भास्करः । उदेति सः सदैवोग्रं नोदीयन्ते च विद्विषः ।

(१७) प्राणिनामुपकाराय प्राणिति प्रियदर्शनः प्राण्यते पुण्यपुरुषः श्रेयसे यशसे च सः ।

(१८) ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथम् ।
वाणी गुणान्स्तौति कथां शृणोति श्रोत्रद्वयं ते भवमुत्तरन्ति ॥

(१९) भूमौ शेते दशग्रीवो महार्हशयनोचितः ।
नेक्षते विह्वलं मां च न मे वाचं प्रयच्छति ॥

(२०) समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतः ।
लोकत्रयपतिर्भ्राता यस्य मे स्वपिति क्षितौ ॥

(२१) रोदिम्यनाथमात्मानं बन्धुना रहितस्त्वया ।
प्रमाणं नोपकाराणामवगच्छामि यस्य ते ॥

(२२) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ।
शेते निपद्यमानस्य चराति चरतो भगः ॥

(२३) गाधोदके मत्स्य इव सुखं विन्देत कस्तदा ।
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवम् ॥

(२४) जातमेवान्तकोऽन्ताय जरा चान्वेति देहिनम्
अनुषक्ता द्वयेनैते भावाः स्थावरजङ्गमाः ॥

(२५) यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य व्यपेयातां तद्वद्भूतसमागमः ॥

(२६) सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

—: शब्दकोश :—

अन् (प.) to breathe सांस लेना (प्र + अन्)

अस् (प.) to be, होना

आस् (आ.) to sit, बैठना

उप+आस्-to worship, to adore, उपासना करना

इ (प.) to go, जाना

उप+इ-to submit, शरणमें जाना (उपैति)

अभि+इ-to go forward, सामने जाना

आ+इ-to come, आना

अव+इ-to know, जानना

उद् + इ-to rise, to flourish. ऊगना, उदय होना

अधि+इ (आ.) to study, अभ्यास करना

अनु+इ-(प.) to follow, अनुसरना

जक्ष् (प.) to eat. खाना

दा (दाति) to cut, काटना

नु (प.) to praise, प्रशंसा करना

पा (प.) to protect, रक्षण करना

प्सा (प.) to devour, भक्षण करना

ब्रू (उ) to tell, कहना

वि+अप+इ-to separate (व्यपेति)

सम्+इ (प.) to gather इकट्ठा) होना,

भा (प.) to shine, to appear प्रकाशना
या (प.) to go जाना
यु (प.) to join जोडना
रा (प.) to give देना
रु (प.) to make noise to cry loud आवाज करना, रोना
ला (प.) to give, to take देना, लेना
वस् (आ) to dress पहनना
वा (प.) to blow लाना
शी (आ.) to lie down, to sleep सो जाना
अति+शी to surpass आगे होना
श्रा (प.) to cook पकाना
श्वस् (प.) to breathe श्वास लेना
नि+श्वस् (प.) to believe, to confide (श्वसिति)
सम्+आ+श्वस् to calm one self शांत-करना
वि+श्वस् to believe to confide विश्वास करना
सू (आ) to give birth जन्म देना
स्तु (उ.) to praise
स्नु (प.) to drop टपकना
स्वप् (प.) to sleep सोना
ह्नु (आ) to conceal छिपाना
अप+ह्नु, नि+ह्नु
कात्स्न्येन (अ.) perfectly, wholly सपूर्णतासे

पाकशास्त्र (न.) the science of cooking
विवासित (भू. कृ.) to be expelled बाहर निकालना
यथाकालम् (अ) at a proper time समयानुसार
दैववाणी (स्त्री.) divine speech देवो की वाणी
नम्र (वि.) humble
प्राहत (प्र+हन्) wounded घायल हुआ,
रिक्तहस्त (वि.) with an empty hand खाली हाथसे
क्षमावत् (वि.) forbearer क्षमावान्
निराकार (पुं.) आकार रहित Formles
सगर (पुं.)the name of a king
पुण्य (न.) holy
व्रजाङ्गना- the lady of vraja
उग्र (वि.) fomidably.
विद्विष (पुं.) enemy शत्रु
प्रियदर्शन (पुं.) a man of handsome face रमणीय पुरूष
जन्मभाज् (वि.) one who has got birth जिसने जन्म लिया है
भव (नं.) world संसार
कपटद्यूत (न.) dishonest gambling कपट से जुआ खेलना
विश्वनाथ (पुं.) the lord shiva. शंकर
श्रोत्रद्वयम् (न) ears दो कान

दशग्रीव (पुं.) Ten necked रावण

महार्हशयनोचित (वि.) accustomed to costly beds किम्मती शयन के उचित,

विह्वल (वि.) overwhelmed व्यथित

दुर्गत (वि) distressed miserable दुःखी

प्रमाण (न.) measure, extent नाप, संख्या

आसीन (व. कृ.) sitting बैठा हुआ

भग (पुं.) luck भाग्य

चराति-(चरति) to move

नि+पद् (निपद्यमान) (आ.) lying down सोया हुआ

गोष्पदक-(न.) shallow water छीछारा पानी

अनवाप्त (अव+आप्) unobtained प्राप्त नहीं होना

अनुषक्त (अनु+सज्) accompnied जुटा हुआ

नीतिनिपुण (वि.) proficient in politics, very prudent नीतिमें निपुण

सम्+आ+विश् to attain प्राप्त होना

यथेष्टम् (अ.) accoarding to one's will इच्छानुसार

युगान्तर (न.) another age दूसरे युगमें

प्र+वि+चल् (१. प.) to move from ones aim चलित होना

काष्ठ-(न.) wood लकड़ी

भूतसमागम (पुं.) union of animals or beings प्राणिओका समागम।

शस्त्रविद्या-(स्त्री.) science of missilies

उपनयन-(न.) the thread ceremony of a brahmin boy उपनयन संस्कार

विप्रलब्ध (भू. कृ.) deceived ठगा हुआ

सन्निहित (अ.) beside, in the vicinity नजदीक

आ+शास् (१. आ.) to expect, to bless आशा रखना, आशीर्वाद देना

वितरण-(न.) a gift a present दान, बक्षीस

धार्तराष्ट्र- sons of Dhrutrashtra धृतराष्ट्र के पुत्र

अर्ज् (१. प.) to obtain प्राप्त करना

प्रति+आ+ख्या-(२. आ.) to refuse इन्कार करना

परिश्रम (न.) effort परिश्रम

पुरोहित (पुं.) preceptor पुरोहित

जनस्थान (न.) the name of the forest, where Rama

lived many years in दण्डकारण्य

आर्यचरित (न.) act of a nobleman

स्थाली (स्त्री.) Cooking utensil थाली, बर्तन

दल (१. प) to split or open खिलना, फट जाना

करुणकरणैः–करूणाजनक pitiable or doleful

(अ) Translate into Sanskrit :-

(1) The Pandaves learnt the science of using weapons from Dhronacharya, Rama and Lakshamana learnt from Vishvamitra, Krishna learnt from Samdipani and Karna learnt from Parshurama. (2) The Brahmans should not study Vedas without having not performed the intiative ceremony. (3) After being once deceived by a man, we should not trust him. (वि+श्वस्) (4) Poets praise God in their poetic works. (5) The Pandavas, while they lived in the forest wore bark garments, they used to sleep on bare ground and ate fruits and roots. (जक्ष्) (6) We give you blessings for a long life for having satisfied all those who expected a gift from you. (आ+शास्) (7) O Chakrawaka, why do you cry futile) believing your beloved far a way who is nearest to you. (वि+रु) (8) Those women whose husbands are dead should lie on bare ground and giving up ornaments, live a holy life for six months. (9) A cunnig fellow conceals facts in his mind by smiles. (अप+ह्नु) (10) Astawakra excelled Janaka in knowledge and intellect (11) He is praiseworthy who does not praise the miser with the hope of getting wealth but remains silence.

(ब) Fill in the blanks with suitable forms of verbs given.

(१) प्रातरुत्थाय ब्राह्मणः वेदान् (अधि+इ). (२) कवीन्दुं _____ वाल्मीकिं यस्य रामायणकथाम् । (नु) चन्द्रिकामिव _____ चकोराः इव साधवः । (चि.) (३) कविः _____ पद्यानि लालत्युत्तमो जनः । (कृ)

तरुः ______ पुष्पाणि मरुत् वहति सौरभम् (प्र+सू) (४) ब्राह्मणाः तदा ______ अस्माकम् अन्नम् अर्जितुम् शक्ताः ______ (ब्रू, अस्) (५) दिवा मा ______ इत्यहं पुनः पुनः अकथयमपि त्वम् दिवा किम् ______ । (शी, स्वप्) (६) युधिष्ठिरः तदा तस्य पुरोहितमपृच्छत् अहम् किं ______ (कृ) इति । सः तम् सूर्यम् ______ (स्तु) (७) सूर्ये च तुष्टे तस्मात् सः स्थालीमलभत । यस्यास्ते सर्वदा यथेष्टमन्नम् ______ (आप्) (८) शून्ये जनस्थाने करूणैरार्यचरितैरपि ग्रावापि ______ (रूद्) वज्रस्य हृदयम् दलति च । (९) हे देव, त्वम् स्थावरजङ्मानामन्तकः ______ त्वया जगत् (अस्, प्र+अन् (१०) पक्षिणः तरुषु मधुरं ______ वायुश्च शीतलो ______ तस्माद्रम्यमिदं स्थानम् । अत्रैव वृक्षमूले शिलाम् ______ (रु, वा, अधि +आस् ।

(क) Form the compounds of the following words and name them.

(१) शोभनानि नम्राणि च (२) युधिष्ठिरस्य वचनेन वञ्चितः (३) उपकाराणाम् प्रमाणम् (४) काव्यनाम् प्रबन्धैः (५) वहुभिः वितरणैः (६) दीर्घम् आयुः (७) षड्मासानाम् पर्यन्तम् (८) शुचि जीवनम् ।

(ड) Dissolve following Compounds :-

(१) सर्वशास्त्राणि, (२) सर्वकलाः (३) पाकशास्त्रम् (४) स्वदेशात् (५) कालान्तरेण (६) दैववाणी (७) कपटद्यूतेन (८) पितरौ (९) प्रियपुत्रः (१०) पुण्यपुरुषः (११) जन्मभाजः (१२) जीवलोकः (१३) विश्वनाथः (१३) महार्हशयनोचितः (१५) लोकत्रयपतिः (१६) गाधोदकम् (१७) नीतिनिपुणाः (१८) महोदधिः (१९) भूतसमागमः (१२) स्थावरजङ्गमानाम् ।

(इ) Recognise the forms given below :-

असूत, अधीयन्ताम, अब्रवीत्, रुदन्ति, शेरते, उपेयात्, उदेति, उदीयते प्राण्यते, अन्वेति, समाश्वसिमि, स्वपिति, रोदिमि, आस्ते अभ्येति स्तुवन्तु समेयाताम्, व्यपेयाताम्, आहथुः, यन्ति ।

(ई) Give the required forms of the verbs given.

(१) वर्तमान :–तृ. पु. ब. व.–अस्, अधि+इ, नि+श्वस्, सू.

(२) आज्ञार्थ :–द्वि. पु. ए. व.–स्नु, अप+ह्नु, दा, जक्ष्.

(३) ह्यस्तनभूत :–तृ. पु. ए. व.–पा. अव+इ, अति+शी, ब्रूस्, स्तु

(४) विध्यर्थ :–प्र. पु. ब. व.–इ, नु, रुद्, ब्रू, शी.

(F) give the synonyms of the following words.

(ઙ) નીચે આપેલા શબ્દોના પર્યાય શબ્દો આપો.

धूतम् , युक्तम् , आज्ञा, जन्म, जाति, व्यक्ति, महार्ह, विह्वल, व्याकुल, वञ्चित, प्रतिबद्ध, चपल, सुन्दर, भगम् , संयुक्त, प्रियम् , अधम, मलिन, प्रबन्धकल्पना, प्रहेलिका, समाहृति, किंवदन्ती, वितरणम् पितृदानम् , रहस्यम् , सौरभम् , इष्टम् , पूर्तम् ।

Additional forms of the seven conjugation.

नि + युज् (उ.)

वर्तः-नियुनज्मि-नियुञ्जे । आज्ञाः-नियुनजानि-नियुनजै । ह्य. भू. न्ययुनजम् न्ययुञ्जि विध्यर्थ-नियुञ्ज्याम्—नियुञ्जीय ।

उद् + विज् (प.)

वर्तः—उद्विनज्मि आज्ञाः—उद्विनजानि ।
ह्य. भू. :—उदविनजम् विध्यर्थ :—उद्विञ्ज्याम् ।

वि+शिष् (प.)

वर्त :—विशिनष्मि आज्ञा :—विशिनषाणि ।
ह्य. भू. :—व्यशिनषम् विध्यर्थ :—विशिंष्याम् ।

सम+पृच् (प.)

वर्त :—संपृणच्मि आज्ञा :—संपृणचानि ।
ह्य. भू. :—समपृणचम् विध्यर्थ :—संपृञ्च्याम् ।

Additional forms of Third conjugation.

(१५) सृ(to go) ससर्मि-ससर्षि-सस्रति । ससराणि ससृहि-सस्रतु।

(१६) अससरम्-अससरुः । सस्रयाम् । भस् (to abuse) वर्त-बभस्मि बप्स्वः बास्मः । बभस्सि बब्धः बब्ध । बभस्ति-बप्सति ।

आज्ञा. बभसानि- । बब्धि-बब्धम् । बभस्तु । बब्धाम्-बप्सतु ।

ह्य. भू. - अबभसम्-प्स्व । अबभः-त् - द् अबब्धम् । अबभत्-अबब्धाम् अबप्सुः ।

विध्यर्थं-बप्स्याम्-स्याव-स्याम ।

(५८) एरनेकाचोऽसंयोगपूर्वस्य ।

(१) भस्=बभस् व=बप्सवः The penultimate अ of भस् is dropped before W. T. and स् is dropped before त् and थ् except व and म् and changes are made acc to संधि.

(२) भस् थ=बभस् थः = बभधः=तुतु बब्धः

(१७) तुर् (५) to make haste तुतोर्मि तुतूर्वः तुतुरति ।

आज्ञा :-तुतूर्हि । ह्य. भू. :-अतुतुरुः । विध्यर्थ :-तुतूर्याम्

(१८) धिष् (प) to make sound

वर्त :-दिधेष्मि दिधेक्षि दिधिष्ठः-दिधिषति ।

आज्ञा : दिधिषाणि—दिधिड्ढि दिधेष्टु-दिधिषत । विध्यर्थ :-दिधिष्याम्

(१९) धन् (प) to produce

वर्त :-दधन्मि दधन्वः-दधंसि-दधन्ति दधन्ति दधनति ।
आज्ञा : दधनानि-। दधन्हि दधन्तम् । दधन्तु ।
ह्य. भू. :-अदधनम्-अदधन्व अदधन् -अदधत्-अदधन्ताम्-अदधनुः

(२०) जन् (प) to produce

जन्, सन्, खन् change their न् to आ when followed by W. T. except before व and म्

वर्त :-जजन्मि जजन्वः । जजंसि जजाथः-थ । जजन्ति जजातः जजनति ।

आज्ञा :-जजनानि । जजन्हि जजातम् जजात । जजन्तु जजातम् जजक्त ह्य. भू. :-अजजनम्-न्व । अजजन् अजजातम् । अजजन्-अजजनुः । विध्यर्थ : जजन्याम् ।

(२१) गा (प) to sing

गा=गागा-जगा-जिगा जिगी-जिग् । जिगुः ।
वर्त : जिगामि जिगीवः । जिगाति-जिगति । आज्ञा :-जिगीहि ।
ह्य. भू. : अजिगाम्-अजिगुः ।

(D) Give the synonyms of the following words.

धूतम्, युक्तम्, आज्ञा, जन्म, जाति, व्यक्ति, महार्हं, विह्वल, व्याकुल, वञ्चित, प्रतिबद्ध, चपल, सुन्दर, भगम, संयुक्त, प्रियम्, अधम. मलिन, प्रबन्धकल्पना, प्रहेलिका, समाहृति, किंवदन्ती, वितरणम, पितृदानम्, रहस्यम्, सौरभम्, इष्टम्, पूर्तम्.

सप्तचत्वारिंशः पाठः ।

द्वितीयो गणः ।

(१४) अद् (२. प.) To eat

वर्तमान				आज्ञार्थ		
प्र. पु.	अद्मि	अद्वः	अद्मः ।	अदानि	अदाव	अदाम ।
द्वि. पु.	अत्सि	अत्थः	अत्थ ।	अद्धि	अत्तम्	अत्त ।
तृ. पु.	अत्ति	अत्तः	अदन्ति ।	अत्तु	अत्ताम्	अदन्तु ।

(1) Here द् is followed by hard consonant, त् is replaced for it and अत्ति and अत्सि are formed.

अद् + धि = अद्धि.-Before consonant-ending verbs धि is replaced for हि in Imp. 2nd. Per. sing.

ह्यस्तनभूत				विध्यर्थ		
प्र. पु.	आदम्	आद्व	आद्म ।	अद्याम्	अद्याव	अद्याम ।
द्वि. पु.	आदः	आत्तम्	आत्त ।	अद्याः	अद्यातम्	अद्यात ।
तृ. पु.	आदत्	आत्ताम्	आदन् ।	अद्यात्	अद्याताम्	अद्युः ।

अ is added in the root अद् before स् and त् of imperfect. (आदः आदत्) (अदः सर्वेषाम)

(16) Changes which occur in roots ending in consonants :

(A) Terminations स् and त् of imperfect 2nd and 3rd. P. sing. are dropped before roots ending in consonants. The first or third letter of that class

is optionally placed in its place if it is not a nasal of that class This स् and त् are called अपृक्त consonants. (हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्, झलांजशोऽन्ते ।)

(B) The त् or द् of the root is replaced by a visarga or द् optionally before the termination स् of imperfect. (अवेः–अवेत्-द्) (दश्च)

(C) The final स् of a root is dropped before terminations beginning with ध्. आस्-आध्वे । (धि. च.)

(D) If there is the fourth consonant of any class is before the termination त् or थ्, it is changed to ध् (दोग्धि) (झषस्तथोर्धोऽधः)

(E) If there is ह् at the end of a root, which is followed by any consonant or nothing execpt a nasal or a semivowel, it is changed to ढ् (लेढि) (होढः) ढो ढे लोपः ।

(F) If ढ् follows ढ् the preceding ढ् is dropped and if any vowel except ऋ precedes it, it is lengthened. (लीढः)

(G) If स् is followed by ष् and ढ्, it is changed to क् (लेक्षि) (ढ्रलोपे पूर्वस्य दीर्घोऽणः) (षढोः कः सि)

(H) If a root begins with द and if there is ह् at its end followed by any consonant except a nasal or a semivowel, it is changed to घ् (दादेर्धातोर्घः)

(I) If there is the fourth letter of class at the end of a root and there is only one vowel in a root and the first letter of it is the third letter of the class (i. e. ब्, ग्, ड्, द्), followed by the termination स्, ध्व or nothing, is replaced by the fourth letter of that class-(धोक्षि) (एकाचो बशो भष् झषन्तस्य स्ध्वोः)

(J) According to Sandhi rules स् is changed into ष् (आदेशप्रत्ययोः)

(K) According to Sandhi Rules the consonant of त् class and स् are changed into च class and श्, and also into ट् class and ष्. (स्तोः श्चुना श्चुः, ष्टुना ष्टुः)

(15) विद् (२. प.) To know

(1) The present tense of विद् is optionally formed by terminations of perfect tense with आम् (1) विद् + मि= वेद्मि । अ + विद् + स् = अवेः त्-द्.

(17) चकास्, जक्ष्, जागृ, दरिद्रा, विद् and शास् are the verbs that take उस् in 3rd pers plural of Imperfect. Before उस् the last vowel of the verbs takes गुण But विद् is an exception of अभ्यस्तसंज्ञा । (अविदुः) ।

विद्–वर्तमानकाल

प्र. पु.	वेद्मि–वेद	विद्वः–विद्व	विद्मः–विद्म ।
द्वि. पु.	वेत्सि–वेत्थ	वित्थः–विदथुः	वित्थ–विद ।
तृ. पु.	वेत्ति वेद	वित्तः–विदतुः	विदन्ति–विदुः ।

आज्ञार्थ

प्र पु.	वेदानि–विदांकरवाणि	वेदाव–विदांकरवाव	वेदाम–विदांकरवाम ।
द्वि. पु.	विद्धि–विदांकुरु	वित्तम्–विदांकुरुतम	वित्त–विदांकुरुत ।
तृ. पु.	वेत्तु–विदांकरोतु	वित्ताम् विदांकुरुताम्	विदन्तु–विदांकुर्वन्तु ।

	ह्यस्तनभूत			विध्यर्थ		
प्र पु.	अवेदम्	अविद्व	अविद्म ।	विद्याम्	विद्याव–	
द्वि. पु.	अवेः–त–द्	अवित्तम्	अवित्त ।	विद्याः	विद्यातम्–	
तृ. पु.	अवेत्–द्	अवित्ताम्	अविदुः ।	विद्यात्	विद्याताम्	विद्युः ।

(१६) लिह् (२. उ.) To lick

	वर्तमानकाल (प.)			वर्तमानकाल (आ.)		
प्र. पु.	लेह्मि	लिह्वः	लिह्मः ।	लिहे	लिह्वहे	लिह्महे ।
द्वि. पु.	लेक्षि	लीढः	लीढ ।	लिक्षे	लिहाथे	लीढ्वे ।
तृ. पु.	लेढि	लीढः	लिहन्ति ।	लीढे	लिहाते	लिहते ।

(१) लेक्षि-लिह् + सि =लेढ्+सि । (Acc. to rule 16)
लेक् + सि = लेक्षि (ट) लेक् + षि = लेक्षि ।

(२) लीढः = लिह्+थस् = लिढ्+थस्=लिढ्+धस् (16 G).
(56) The final इ or ई of a root, if preceded by a conjunct consonant is changed to इय् and if not so preceded, to य् before V. W. T. (अचिश्नुधातुभ्रुवाम्)

(१८) कि (प.) to know

वर्त :- चिकेमि-किवः । चिकेषि । चिकेति-चिक्यति ।

आज्ञा :- चिकयानि-याव । चिकिहि-तम् । चिकेतु-चिक्यतु ।

ह्य. भू. :- अचिकयम्-किव । अचिकेः-तम् । अचिकेत्-अचिक्युः ।

विध्यर्थम् :- चिकिया - ......

(१) चिक्यति = चिकि + अति = चिक् इ अति = चिक्यति ।

(२) अचिक्युः – अचिकि + अन् = अचिकि + उस् = अचिक् + य् + उस् = अचिक्युः ।

(57) If there is no conjunct consonant and more than one vowel in a root then the इ and उ become य् and व् respectively.(एरनेकाचोऽसंयोगपूर्वस्य)

(58) Present Participles of the roots of the third conjugation are made by adding अत् and आन to them.

ददत्, दधत्, बिभ्रत्, पिपुरत, नेनिजत, जुह्वत्, जहत्, जिह्यत् ददान्, बिभ्राण, नेनिजान जिहान, मिमान are declined like शासत् and जाग्रत् ।

प्र. सं. (पु) बिभ्रत – तौ तः । (न) बिभ्रत् बिभ्रती बिभ्रति – भ्रन्ति । (स्त्रीः) बिभ्रती ।

For additional roots of this conj. see on page 127

संस्कृत – वाक्यानि

१. आपत्सु जनाः हृदि धैर्यम् निधाय जीविताशां च न जहतु !

२. क्षत्रियाणाम् जीवनम् निरर्थम् भवति यदि ते स्वपराक्रममित्र मुकुटं न बिभ्रति, लोकान् न रक्षन्ति देवेभ्योऽग्नौ हवींषि न जुह्वति, दीनेभ्यो ब्राह्मणेभ्यः च विपुलदक्षिणाम् न ददति तथा यशः च न प्राप्नुवन्ति ।

३. स चित्तप्रशमं व्यजहात् स्वराज्यम् च प्रत्याहर्तुम् स्वपराक्रमम् व्यदधात् ।

४. किम् त्वम् मृत्योः बिभेषि न तु अयशसः ।

५. वयम् शत्रुन् मित्राणि विदध्मः । इदं कृत्वा वयम् वंशस्य कीर्तिम् प्रत्याहरामः ।

६. राजमन्दिरमागतस्य विश्वामित्रमुनेः पादौ राजा दशरथः अवानेनेक्, पश्चात् तस्मै आसनमददात् ।

७. नाभिवर्धनात् प्राग्जातकर्म विदधीरन् इति मनुना स्वस्मृतौ कथितम् ।

८. महापुरूषाणां मृत्योः पश्चात् तेषां न केवलं जीवितानि यशांस्युदजिहत स्वर्गम् ।

९. पुरा भारतदेशे सायं प्रातः आहिताग्नयः पावके समिधः उदजुहुवुः ।

१०. हे बाल । त्वम् कस्मात् बिभेषि । आगच्छ, किमर्थं कम्पसे । अग्नौ वलिम् जुहुधि ।

११. शेषः स्वमस्तके सकलपृथिव्याः भारम् बिभर्ति, तथापि भगवान् विष्णुः तस्य वपुषि शेते ।

१२. पुनः पुनः एवं कुर्वन् प्रतिषेध्यसे किंतु असत्यकथनेन त्वम् किम् न जिह्रेषि ।

१३. ये मलिनानि वासांसि परिदधति ते लोके सन्मानम् न लभन्ते ।

१४. यस्मिन्कन्यामलंकृत्य वरमाहूय तस्मै तां ददति स ब्राह्मो विवाह उतमफलकः ।

१५. यतयः कमण्डलूम् जलेन नद्याम् पिप्रति हस्तपादम् च अवनेनिजति, पश्चाद् सन्ध्यावन्धनम् कुर्वन्ति ।

१६. ददाति द्रविणं भूरि दाति दारिद्र्यमर्थिनाम् ।
सोऽवदायति कीर्तिं च शिरोऽवद्यति विद्विषाम् ।।

१७. न जहाति सदाचारं स सदा चारणस्तुतः ।
उज्जिहीते जगज्जित्वा तस्य कीर्तिः सुरालयम् ।।

१८. न्यायप्रवृत्तो नृपतिरात्मानमपि च प्रजाः ।
त्रिवर्गेणोपसंधत्ते निहन्ति ध्रुवमन्यथा ।।

१९. यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ।।

२०. न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ।।

२१. ग्रहाणां चरितं स्वप्नोऽनिमितान्युपयाचितम् ।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ।।

२२. जहीहि शोकं वेदिहि प्रीतये धेहि मानसम् ।
रावणे जहिहि द्वेषं जहाहि प्रमदावनम् ।।

२३. मितं भुङ्क्ते संविभज्याश्रितेभ्यो मितं स्वपित्यमितं कर्म कृत्वा ।
ददात्यमित्रेष्वपि याचितः संस्तमात्मवन्तं प्रजहत्यनर्थाः ।।

२४. पापान्निवारयति योजयते हिताय, गुह्यं च गूहति गुणान्प्रकटीकरोति ।
आपद्‌गतं न च जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति तज्ज्ञाः ॥

२५. ददतु ददतु गालीर्गालिमन्तो वयमपि तदभावाद्‌गालिदानेऽसमर्थाः ।
जगति विदितमेतद् दीयते विद्यमानम् न हि शशकविषाणं कोऽपि कस्मैददाति ॥

:- शब्दकोशः :-

(Roots of 3rd. Conj.)

दा (ददाति – दत्ते – उ.) – to give देना

धा (दधाति – धत्ते – उ.) to hold to put धारण करना

निज् (नेनेक्ति – निक्ते – उ.) to wash साफ करना, (अव + निज्)

पृ – पॄ (पिपर्ति उ.) to protect, to fill भरना (पिपृवः, पिपूर्वः)

भस् (प.) to abuse, गाली देना ।

कि (चिकेमि–प.) to know जानना

विज् (वेवेक्ति – वेविक्ति उ.) to separate, अलग होना

हा (जहाति प.) to abandon, (उद् + हा) त्याग करना

उद् + हा – to rise, ऊँचे चढना

हा (जिहीते आ,) जाना

हु (प.) to perform sacrifice यज्ञ करना,

ह्री जिह्रेति. प.) to be ashamed लाज रखना

भी (बिभेति – प) to fear, to be afraid भयभीत होना

भृ (बिभर्ति, बिभृते – उ.) to support, to bear

मा (मिमीते – आ) to measure नापना

हृ (प) to snatch हिंसा से लेना (जिहर्मि)

सृ (ससर्ति प.) to move चलना

अपि (पि) + धा to close बंध करना

अव + धा – to attend, ध्यान देना

परि + धा – to put on, पहनना

ऋ (इयर्मि प.) to go, जाना

निरर्थम् (अ) fruitless, निकम्मा

चित्तप्रशम (पुं) contentment मन की शान्ति, संतोष

प्रति + आ + हृ (१. प.) to regain पुनः प्राप्त करना,

नाभिवर्धन् (न.) cutting of the upper part of the navel

विष् (वेवेष्टि – ष्टे) उ – to pervade फैलना

आ + दा – to take, to receive लेना

नि + धा (निदधाति प.) to hold to place सामने रखा

वि + धा – to do, to make करना, बनाना

श्रध् + धा = to confide in, to trust करना, बनाना,

सम् + धा – to make peace with (संदधाति) संधि करना जोडना

अंतड् + धा to keep in mind छिपना

अति + सम + धा – to cheat छलना

चारण (पुं.) bard सूत, चारण

त्रिवर्ग (पुं.) righteousness, wealth & desire धर्म, अर्थ, काम,

विशष्ट, (त्रि.) specific विशिष्ट best among the classes

सम + पद् (४. आ.) to beeome होना

अनिमित्त (न) an ill omen अपशुकन,

प्रमदावन (न.) Ashok garden specially for ladies अशोकवन

cumbibical cord नाभिके अग्र भागका काटना

जातकर्मन् (न.) जन्म के समयका संस्कार a ceremony performed at the time of birth.

कमण्डलु-(पुं) gourd कदुडु, तूंबा

ब्राह्मो विवाह – best type of marriage cercmony among brahmins उत्तम प्रकारका विवाह,

उत्तमफलक excellent fruit (न.)

सन्ध्यावन्दन – (न) one type of morning prayer

दा. (२. प.) to cut. to destroy काटना

दै (१. प.) to purify शुद्ध करना (अप + दं)

दो (४ प.) to cut काटना

मित (मा-क. भू. कृ.) measured नापित, नियमित, थोडा

परम (वि.) great, बडा

वरासन (न.) best seat श्रेष्ठ आसन

सर्वङ्कषा (वि) Pervader and destroyer सर्वव्यापक और सर्वनाशक

भवितव्यता (स्त्री.) fate, goddess of fortune भाग्यदेवी

जन्तु (पुं) every being प्राणी,

काच (पुं.) glass

उपयाचित (न) a request to a deity for the fulfilment of desire इच्छापूर्ण करनेके लिये देवकी प्रार्थना

तनुबुद्धि (वि.) a man of little intellect अल्पबुद्धि

काकतालीयम् (अ) accident अचानक

अमित्र (न.) दुश्मन, foe

आत्मवत् (वि) जितेन्द्रिय, wise, composed

नि + वृत् (१०. उ) to evade दूर करना

प्रकटी + कृ–to manifest प्रकट करना

तज्ज्ञ (पु.) a learned man विद्वान

गालि–(स्त्री) abuse, usage of bad language गाली

शशकविषाण (न) born of a hare शशकके सींग

नैशम् (अ.) night रात्रि

द्युति (स्त्री.) lustre

कल्पित (भू. कृ.) desired इच्छित,

कामधुक् (स्त्री) wish yielding cow कामधेनु

रस (न.) sipid, water रस, जल

स्वर्भानु (पु.) the planet named Rahu, राहु

कृताह्निक–(वि.) one who has already performed daily rites नित्य विधिसे उपराम हुआ

नि. + ष्ठिव् (१. प) to spit निष्ठीवति थुकना

शेष (पुं.न.) शेष rest remainder

राजर्षि (पुं) royal Sage राजर्षि,

उद् + हृ (१. प.) rising (उद्धरत) ऊगता हुआ

रुज् (स्त्री) disease रोग

जरस् (स्त्री) old age वृद्धावस्था

(A) Translate into Sanskrit.

(1) Good people abandon their happiness wealth and their life like the straw. (2) One should not do any act (वि + धा) without distinguishing a good and a bad thing like a swan because indiscrmination is the place of great troubles. (3) Wash (निज्) the feet of elderman and give them best seat. (4) The goddess fortune is of generally beneficial to all beings and also evades the obstacles of them (5) glass bears (धा) the lustre of emerald with the contact of gold. (6) The

sun takes (आ + दा) water for giving it back in thousand times. (7) Krishna held a disc (भृ), Arjuna a bow (named) gandiva, Duryodhan, Bhima a mace, while all other soldiers held (used) common bows. (8) Shakuntala told that she was ashamed (ह्री) to go to her husband along with the preceptor. (10) The wife should not abandon her husband as well as the husband to her wife disgusted by the disease and old age. (11) Parvati the wife of Lord Shiva, killed Mahishasura as he terrified the gods. (9) You should not measuse your life by long life but by good conduct.

(B) Fill in the blanks with the suitable form of the words given in the bracket.

(१) मूढ ______ धनागमतृष्णां, ______ तनुबुध्दे मनसि वितृष्णाम् (हा, कृ) (२) अहम् तुभ्यम् ह्यः यत्पुस्तकम् ______ त्वम् कुत्र (दा, नि + धा) (३) प्रातःकाले नद्यास्तीरे पुण्यशीलाः प्रथमम् स्वहस्तौ पादौ च ______ तथा स्नानान्तरम् स्वपात्राणि तीर्थजलेन ______ (अव + निज्, पृ) (४) यदा कोऽपि जनः तुभ्यम् गालीः ______ तदा त्वम् तव कर्णौ ______। (दा, अपि + धा) (५) कल्पद्रुमः कल्पितमेव ______ सा कामधुक् कामितमेव ______। चिन्तामणिश्चिन्तितमेव ______ सतां हि सङ्गः सकलं ______। (सू, दुह्, दा, प्र + सू) (६) ______ सूर्यः स्वकिरणैः नैशम् तमः नाशयति। (उद् + इ) (७) यदा जनकपुर्याम् रामे गतेस्तदा तेन शिवस्य ______ नामिते जनकः तस्य दुहितरम् सीताम् तस्मै ______। (धनुस्, दा) (८) यः सर्वभूतेभ्योऽभयं दत्वा प्रव्रजति तस्माद्यतेर्भूतानि न ______ स च तेभ्यो न ______ (भी, भी) (९) ये द्वे कालं ______ ते महती ज्योतिषी ______। (धि + धा, स्तु) (१०) शत्रून् आयातो दृष्टवा क्षत्रियौ इषूं च धनुषी ______ (सम् + धा) (११) राजर्षिः यः बहुरत्नाति ______ भानुरिव महाद्युत्या ______। (वि + धा, वि + भ्राज्) (१२) यश्च काष्ठमयो हस्ती यश्चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नाम ______ (भृ).

(C) Dissoive the following compounds and name them.

जीविताशा, विपुलदक्षिणाम्, स्वराज्यम्, स्वपराक्रमम्, चित्तप्रशमम्, जातकर्म आहिताग्नयः, त्रिवर्गः, शशकविषाणम्, परहिताय, स्वसुखानि, तनुवुद्धे, स्वकिरणैः, महाद्युत्या, आपद्‌गतम्, तज्ज्ञाः, न्यायप्रवृत्तः, हस्तपादम्, सदाचारः।

(D) Form the compounds of the following words :

राज्ञः मन्दिरम्, सुराणाम् आलयम्, प्रमदानाम् वनम्, प्राणानाम् त्यागम् वरम् च तद् आसनम्, काञ्चनस्य संसर्गात्, मारकती द्युतिम्, सहस्राणाम्, गुणानाम्, महिषश्चासौ असुरश्च, सताम् सङ्गः। सर्वेभ्यः भूतेभ्यः।

(E) Recognise the following forms :

जहन्तु, जुह्वति, व्यदधात, अवानेनेक्, उदजिहत, जुहुधि, जिह्रेषि, पिप्रति, उज्जिहीते, संधत्ते, बिभ्यति, जहति, विदधाति, धत्ते, आदत्ते, अबिभरुः, जिह्रेमि, मिमीष्व, जह्यात्, न्यदधात, उज्जहरन्, बिभ्रतः, व्यभ्राजत।

(F) Give the required forms of the verbs :

(१) वर्त. द्वि. पु. ए. व. – दा (आ), धा (प.) भृ, हा, ऋ.

(२) आज्ञार्थ तृ पु. ए. व. – निज्, विष्, ही, पृ, भि.

(३) ह्य स्तनभूत तृ. पु. ए. व – सम् + धा, भो, हा (आ), गा, परि + धा.

(४) विध्यर्थ तृ. पु. व. व. मी. नि + धा, श्रध् + धा, अपि + धा, हा (to go), मा.

(G) Give the synonyms of the words given :

आशा, विक्रमः, बलात्कारः, छलम्, उत्पातः, आक्रमण, तिरोहित, दारिद्र्यम्, विद्वेष, पश्चात्ताप, गाली, शशविषाण, विश्लेषण, पुण्यशील, नमस्कारः।

पञ्चाशः पाठः।

तुलनात्मक – विशेषणाः।

(Comparision of adjectives)

(1) Ordinarily to express comparative adjectives तर is added and तम is added to show excellence of

adjectives and then feminine forms are made by adding आ to them. (तराम्, and तमाम् are added to form the adverbial forms)

प्रिय – प्रियतर – प्रियतरा (dearer), प्रियतम – प्रियतमा (dearest) गुरू – गुरुतर – गुरुतरा (heavier), गुरुतम – गुरुतमा (heariest) similarly धनिन् – धनितर, धनितम, बृहत् – बृहत्तर, वेदविद् – वेदवित्तर – त्तम, उदर्चिस् – उदर्चिष्टर, ष्टम्, प्राच् – प्राक्तर, प्राक्तम, गुरुतर – अतितर, उत्तर – उत्तम etc.

(2) The above mentioned तर and तम are not added merely to adjectives, but they are also applied to some nouns, pronouns, verbs, adverbs and even to indeclinables e. g. पचतितराम् (he cooks well) पचतितमाम् (he cooks best) अतिराम् अतिमाम उच्चैस्तराम् – उच्चैस्तमाम् । but in adjective sense उच्चैस्तर – तम । and in adverbial sense नितराम – तमाम, सुतराम् – तमाम् ।

(3) The long ई or ऊ is optionally shortened in orginal words श्रीतरा – श्रितरा, श्रीतमा – श्रितमा, धेमूतरा – धेमुतरा – धेमुतमा – मुतमा more lame.

(4) तर and तम are added to किम्, अन्य and एक in a particular sense. In the same way we have अन्यतर (any one of two) and अन्यतम (any of many), also कतर (which of the two) कतम (which of many) एक, एकतर, एकतम (one of many) कतर, कतम etc. are declined like अन्य ann सर्व ।

	प्र. ब व.	च. ए व.	ब. व, व.	प्र. ए. व.
(पुं)	अन्यतरे	अन्यतरस्मै	अन्यतरेषाम् ।	अन्यतरत् (न.)
(स्त्री.)	अन्यतरा:	अन्यतरस्यै	अन्यतरासाम् ।	"

(१) अतिशयने तमबिष्ठनौ । द्विवचनं विभज्योपपदे । तरबीय सुनौ । तिङश्च । तरप्तमपौ ।

(पुं)	कतरे	कतरस्मै	कतरेषाम् ।	कतरत् (न.)
(स्त्री.)	कतराः	कतरस्यै	कतरासाम् ।	,,
(पुं)	एकतरे	एकतरस्मै	एकतरेषाम् ।	एकतरम् (न.)
(पुं.)	एकतमे	एकतमस्मै	एकतमेषाम् ।	एकतमम्
(स्त्री.)	एकतमाः	एकतमस्यै	एकतमासाम् ।	,,

(5) Certain comparative and superlative forms of certain adjecties take ईयस् and इष्ठ in masculine and ईयसी and इष्ठा in feminine. The final vowel and consonants and penultimate vowel are also dropped too, स्थूल, दूर, ह्रस्व, क्षिप्र and क्षुद्र drop their final vowel with the preceding consonant before ईयस् and इष्ठ and in the case of पृथु. मृदु, भृश, कृश (much) दृढ and परिवृढ. ऋ is changed to र

The ऋ of पृथु, मृदु, भृश्, कृश्, दृढ् and परिवृढ् are changed to र.

पटु	- पटीयस्	पटिष्ठ ।	कृश	- क्रशीयस्	क्रशिष्ठ ।
महत्	- महीयस्	महिष्ठ ।	दृढ	- द्रढीयस्	द्रढिष्ठ ।
पाप	- पापीयस्	पापिष्ठ ।	ऋजु	- ऋजीयस्	ऋजिष्ठः ।
क्षिप्र	- क्षेपीयस्	क्षेपिष्ठ ।	क्षुद्र	- क्षोदीयस्	क्षोदिष्ठ ।
गुरु	- गरीयस्	गरिष्ठ ।	ऊरू	- वरीयस्	वरिष्ठ ।
अल्प	- अल्पीयस्	अल्पिष्ठ ।	कृश	- क्रशीयस्	क्रशिष्ठ ।
पृथु	- प्रथीयस्	प्रथिष्ठ ।	भृश्	- भ्रशीयस्	भ्रशिष्ठ ।
तप्त	- त्रपीयस्	त्रपिष्ठ ।	दीर्घ	- द्राघीयस्	द्राघिष्ठ ।
मृदु	- म्रदीयस्	म्रदिष्ठ ।	परिवृढ	- परिव्रढीयस्	परिव्रढिष्ठ।
दूर	- दवीयस्	दविष्ठ ।	प्रशस्य	- श्रेयस्	श्रेष्ठ ।
युवन्	- यवीयस्	यविष्ठ ।	वृद्ध	- ज्यायस्	ज्येष्ठ ।
वृद्ध	- वर्षीयस्	वर्षिष्ठ ।	युवन्	- कनीयस्	कनिष्ठ ।
प्रिय	- प्रेयस्	प्रेष्ठ ।	साधु	- साधीयस्	साधिष्ठ ।
वृन्दारक	- वृन्दीयस्	वृन्दीष्ठ ।	स्थिर	- स्थेयस्	स्थेष्ठ ।

स्थूल – स्थवीयस् स्थविष्ठ । स्फिर – स्फेयस् स्फेष्ठ ।
ह्रस्व – ह्रसीयस् ह्रसिष्ठ । स्थूल – स्थवीयस् स्थविष्ठ ।
बहुल – बंहीयस् बंहिष्ठ । अन्तिक – नेदीयस् नेदिष्ठ ।
some adjectives also take तर and तम also.

(6) Possessive adjectives ending in मत्, वत् and विन् locse their terminations मत्, वत् and विन् before ईयस and इष्ठ. (स्त्रज् + विन्) अ, आ, and ई are dropped and उ takes गुण.

स्रग्विन् – स्रजीयस्, स्रजिष्ठ । यशस्विन् – यशसीयस् यशसिष्ठ ।
वसुमत – वसवीयस् – विष्ठ । कर्तृ–करीयस्, करिष्ठ ।
बलवत् – बलीयस् – बलिष्ठ । दोग्ध्री – दोहीयसी, दोहिष्ठ ।
गरीयस् (पु) गरीयान् गरीयांसौ गरीयांसः ।
गरीयांसम् – गरीयोभ्याम् – गरीयसे । गरीयसी (स्त्री,) acc. to नदी गरीयः गरीयसी गरीयांसि (न.) । मायाविन्, मेधाविन्, तेजस्विन् तपस्विन् ।

(7) Words in the comparative degree are construed with the Ablative and those of the Superlative degree are construed with the genitive and locative. नृणां नृषु वा द्विजः श्रेष्ठः तेषामेकतमः अन्यतमः कतमः । पांण्डवानां पाण्डवेषु वा युधिष्ठरो ज्येष्ठः सहदेवश्च कनिष्ठः ।

(8) Sometimes तर and तम are used to express Superiority in qualities गुरुतर, गुरुतम (more heary) नीचतर, नीचतम, (lowerest) प्रेयान् (dearer) श्रेष्ठ (more praiseworthy) sometimes too comparative and superlative terminations ईयस् and इष्ठ are used with adjectives even if a sense of comparission is not meant and तर and तम to express better or superrior qualities श्रेष्ठतर, श्रेयस्कर, etc.

(9) Abstract nouns are formed by adding terminations like त्व and ता to adjectives and the word भाव is

appended for some purpose. गुरु, गुरुत्व (न.) गुरुता (स्त्री.) सुभगत्वम्, सुभगत्व, सुभगभाव. sometimes these terminations are added to nouns and pronouns to express abstractness नृपत्वम्, नृपता, नृपभाव: (the quality of being a king.) देवत्वम् (divinity), तत्त्वम्, तत्ता, तद्भाव: (existence) व्याघ्रत्व (quality of being a tiger), मानवता, मनुष्यत्वम् (humanity)

(10) Sometimes the neuter termination or sign म् is added to adjectives and it is then used as an adverb मन्द मन्दम् त्वरित (quick) त्वरितम् (quickly) साधु-साधु (in a better way) मधुर-मधुरम् । (sweetly) in a sweet tone (मधुरस्वरम्)

(11) तुल्य, सदृश, सम and संकाश etc. are used with genitive or instrumental cases of nouns with which they are compared कृष्णेन or कृष्णस्य तुल्य or सदृश etc. सत्यभामा कृष्णस्य प्रियतरा ।

(12) दृश, दृश् - दृशी (Fem.) are used with pronouns to express similarityअस्मादृश - अस्मादृश् (अस्मद्), ईदृश - ईदृश् (इदम्), एतादृश - श् (एतद्), कीदृश - श् (किम्) तादृश - श् (तद्) युष्मादृश - श् (युष्मद्). अस्मादृश, ईदृश etc. are अकारान्त and अस्मादृश् are व्यंजनान्त इदृक्-ग् etc. ईदृशी-कीदृशी (स्त्री.) Fem. are declined like नदी, in neuter इदृक्-ग् - ईदृशी ईदृशि etc.

(13) The forms of verbs कृ, भू and अस् at times are attached to nouns and indeclinables to express the sense of verbs or the like कृष्ण+करोति = कृष्णीकरोति, धनीकरोति - धनीभवति, प्रत्यक्षीकरोति, स्वीकृत, गङ्गीभवति, दोषाभूतमहः (The day turned into night) दिवाभूता रात्रिः (the night turned into day), शुचीभवति, प्रटुभवति, मात्रीभवति, मात्री करोति, ब्राह्मीभवति, उन्मनी स्यात्, विचेतीकरोति,

रहीकरोति, e.g. :– न कृष्णः अकृष्णः, अकृष्णः कृष्णः संपद्यते, तं करोति कृष्णीकरोति । न धनम्–अधनम् , अधनम् धनम् संपद्यते तन् करोति – धनीकरोति । अमाता माता संपद्यते, तां करोति । मात्रीकरोति । न उन्मनाः अनुन्मनाः, अनुन्मनाः उन्मनाः संपद्यते, उन्मानी स्यात् ।

(14) The word ending अ or आ are changed into ई (except indeclinable) and इ and उ are turned into ई–ऊ, and ऋ into री.

संस्कृत–वाक्यानि

१. कौसल्या दशरथस्य तिसृषु भार्यासु ज्येष्ठा आसीत् कैकेयी च कनिष्ठा (यविष्ठा) प्रियतमा चासीत् ।

२. सीतायाः आकृतिः रुक्मिण्याः तनीयसी आसीत् ।

३. विद्रवणे अश्वः सर्वेषाम् प्राणिनाम् आशुतमः ।

४. सद्गुणवन्तः (पुण्यवन्तः) सुखिनो भवन्ति आदरमर्हन्ति च ।

५. चन्द्रगुप्तः सर्वेषाम् नृपाणाम् ओजस्वितमः (ओजिष्ठः) आसीत् चाणक्यः तं राज्येऽभ्यसिञ्चत् ।

६ शकटानाम् धूर्षु नियुक्ताः वृषभाः अन्यवृषभेभ्यः पीवतरतराः सन्ति ।

७ दमयन्ती सर्वासाम् देवाङ्गनानामपि चारुतमा नलराज्ञि अनुरक्ततमा भक्ततमा चासीत् ।

८ नैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा न जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ।

९ न श्रेयस्सततं तेजो न नित्यं श्रेयसी क्षमा ।
तस्मान्नात्युत्सृजेत्तेजो न च नित्यं भवेन्मृदुः ।

१०. ज्येष्ठो दशरथस्यायं पुत्राणां गुणवत्तमः ।
अहं च कनीयान्भ्रातास्य लक्ष्मणो नाम नामतः ॥

११. सर्पाद् विलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः ।
अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैतु धर्मात् ॥

१२. दासीभूता सर्पाणां जनन्याः कद्र्वाः सेवां कुर्वती स्वमातरम् विनताम् गरुडः बन्धनादमुञ्चत् ।

१३. प्रियतमस्य पुण्डरीकस्य मरणेन सशोकया महाश्वेतया तिरस्कृता विषया दूरीकृतो बाधन्व्रजनः स्वीकृतं चारण्येऽवस्थानम्।

१४. तपश्चरन्रावणः स्वीयानि नव शिरांसि शिवायोपायनीमकरोत् इति शृणुमः।

१५. अथ निःश्रेयसाय कर्मणः ज्ञानमार्गः साधीयान्। श्रेष्ठस्तु सर्वेषां भक्तिमार्गः।

'शब्दकोशः

विशेषणाः।
गुरु – heavy, भारी
दूर – distant, दूर
बहुल – monifold, विविध
बाढम् – अच्छा, good
वृन्दारक – great बड़ा
स्थूल – big, fat मोटा
स्फिर – large विशाल
ह्रस्व – short छोटा
पृथु – उरु – broad बड़ा, चौडी, large
भृश – much बहुत
परिवृढ – ample अधिक
क्षिप्र – quick चपल
धनिन् – wealthy धनी
स्रग्विन् – Wearing a garland हारको धारण करनेवाला
युवन् (वि.) young little युवा, छोटा
धर्मबुध् – knowing duty कर्तव्यका ज्ञाता
नितराम् – wholly सारा
नितमाम् – in many respects बहुत तरह से

विद्रवण (न.) running, दौड
नियुक्त (नि + यु ज् – क. भू. कृ.) – fastened बाँधा बुआ जकडा
जीजीविषामः – wishing to live more जीनेकी इच्छा वाले
कृपाणधारा – (स्त्री.) edge of a sword तलवारकी धार
विलय (न.) destruction नाश
मनाग् – (अ.) a little bit जरा भी
दासीभूत – to become a maid servant
अवस्थान – (न.) resIde ce रहनेका ठिकाना
निश्रेयस् – (वि.) ultimate good salvation चरम कल्याणकारक
उपायनीम् – (वि.) to act as a gift वक्षीसकी तरह
आमयाविन् (वि) diseased, रोगी
ब्रह्मवर्चस् (वि.) illumined by the practice of vedic rites वेदोंको जाननेवाला ब्रह्मज्ञानी
राजसभा-(स्त्री)royal assemblyराजसभा
राजधानी (स्त्री.) capital राजधानी

उचैस् (वि.) tall ऊंचा
उचैस् (क्रि, वि.) highly उँचेसे
विजयतराम् – gets more success
अधिक विजय प्राप्त करना
दोग्ध्री (स्त्री.) milking cow
दूध देनेवाली गाय
अनुकम्पिन् (वि.) दयालु, merciful
मुम्बापुरी (स्त्री.) Bombay बम्बई
पुण्यपत्तन (न.) Poona
सूर्यपुर (न.) the city named Surat सुरत
वटपुर (न.) Baroda वडोदरा
भूतिकामः – (पु.) desirous of prosperity ऐश्वर्यकी इच्छारखनेवाला
कथमपि (अ.) with difficulty कठिनतासे
सुधातः – like nectar अमृत जैसा
पुरतः – (अ.) before आगेको
धार्तराष्ट्र (पु) the sons of dhratrashtra धृतराष्ट्रके पुत्र
यादव – (पु) the son of yadu यदुका पुत्र
ध्यायन् (ध्यै, वर्त. कृ) to meditate upon ध्यान करते हुए
निर्वाणपदवी – the state of salvation
आर्द्री+भू – merciful melted कारुणिक होना

हीन (वि.) wretched बुरी दशा,
भीरु (पु.) coward डरपोक
लघु (वि.) light हल्का
तूल (पु.) cotton रुई
वि. + ग्रह (९. प.) to war, to fight युद्ध करना
कृत्स्नेन – शाठ्येन with all his craft शठतासे पूर्ण (cunningness)
सुदुःसह – (वि) unbearable, gross पीडाजनक
भयदः (पु.) terrific भयकारक
आतृप्ति –(स्त्री) till satisfaction तुष्टि पर्यंत
रज्जुकृत – to take it as a rope रस्सी मानना
अनुशिष्ट – advised सलाह देना
गरीयसी (वि.) heavy, भारी
दवियसी (वि) distant, दूर
अवश – (वि.) helpless लाचार
कथमपि (अ.) with difficulty कठिनतासे
शकुनि –(पु) name of a a maternal uncle of Duryodhan
सहाय (पु) an ally, help
क्रियताम्
वृत्तांत (न.) happenings

(A) Translate into Sanskrit.

(1) The good use of wealth is greater (महत्) than hoarding it, but renouncing it is the best of all actions.

(2) The friend's work is much valuable (महत्) to good people than their own (3) A weak man desiring for prosperity should not go against the powerful man even by the mind (4) The chataka bird spent the long (दीर्घ) days of summer in great trouble while thinking of clouds. (5) Oh Bhagirathi ! your waters sweet like nectar drunk satisfactorily and joyfully by people mocks that absolute bliss of salvation. (6) This is Ganga, That is Jumna, Of the two Ganga is long and broad (उरु), while Jumna is small (अल्प) and lean (कृश) (7) Bombay is far from Surat but Baroda is nearer than Bombay, and Poona is the farthest from Surat. (8) A serpent is far better (साधु) than a wicked person because the serpent is once dangerous, while the wicked person is always danagerous. (भयद:) (9) By the aid of Krishna, the Pandavas became stronger than Kauravas, but the Kauravas army becomes bigger (गुरु) by the help of Yadava's forces. (10) Tulsidas climbed the upstairs of her beloved's house with the help of a serpent believing as a rope hanging from the window. (11) The merciful hearts of great persons became melted by hearing the misgivings (दुःख) of unhappy persons.

(12) He who performs (अनु+स्था). sacrifices according to vedic rites (यथाविधि), he becomes father of progeny (प्रजावान्) master of animals (पशुमान्) Brahminic lusterous (ब्रह्मवर्चस्) and renowed (यशस्विन्)

(B) Fill in the blanks with the appropriate forms of the words given in the bracket.

(१) दुर्योधनोऽब्रवीत्______अहम् न तु मनागपि पाण्डवेभ्यो बिभेमि, "यतोऽहम् भीमात् ______ (बलवत्), युधिष्ठिरात् ______ (गुणवत्), अर्जुनात् ______ (पटु) अस्त्रविद्यायाम , माद्र्याः सुतौ माम् प्रति किंचिद् न स्तः, कृष्णः खलु पाण्डवानम्______(प्रिय) मित्रमस्ति किंतु सः

कृत्स्नेन शाठ्येन माम् जेतुम् न शक्नोति, यत ______ (शूरा कर्णे नाहम् रक्ष्ये, ______ (प्राज्ञवत्) शकुनिनानुशिष्टः च । पाण्डवैरहम् ______(शक्तिमत्) ज्ञायते अतः ते शान्त्या अवशा मूढा इव — (सदुःसह) अवमानानि सहन्ते । तेषाम् ______(प्रिय) द्रौपदी राजसभायाम् प्रसभमानीयत तथापि तैः किंचिदपि न प्रत्युक्तम् । कौरवाणाम् राजाधान्याः विवासिताः ते द्वादशवर्षपर्यन्तम् वनेषु ______ (हीन) कापुरुषाः इवावसन् । :अधुना ते पञ्चा ग्रामान् याचन्ते तथा ते च तुष्टाः यदि पञ्चेषु ______ (एक) ग्रामो तेभ्यो दीयते मम कोपः ______(शीघ्र) वायुः इव पाण्डवाः च ______(लघु) तूलः इव । यदि ते मां विगृह्णानाः सपदि विनश्येयुः । (वसुधायाम् क्षणमपि न जीवेयुः)

(C) Dissolve the following compounds and name them.

नलाराज्ञि, कृपाणधारा, सशोक्या, वित्तसंचयात् , हीनवलाः, द्रांघीयवासरान् , आतृप्ति, निर्वाणपदवीम् , यज्ञकर्माणि; युधिष्ठिरः, राजधानीविवासिताः, कापुरुषाः, पञ्चग्रामान् ·

(D) Form the compounds and name them

तिसृषु भार्यासु, सीतायाः आकृतिः, सर्वेषाम् प्राणिनाम्, सर्वेषाम् नृपाणाम्, शकटानाम् धूर्षु, सर्वासाम् देवाङ्गनानाम् , श्येनस्य मुखात् , तपसः प्रभावेण, निशिततमैः दन्तैः, शकुनिना अनुशिष्टः ।

(D) Recognise the following forms.

हीनतमाः, दासीभूताम्, स्त्रीकृतम्, एकतमा, शीघ्रतरः, लघुतरः, नेदिष्ठः, क्षेपीयः , क्षुद्रतर, वर्षीयस् , भूयस् , एकतमस्मै, दोहीयसी, साधीयान् , दविष्ठम् , वलीयान् ।

(E) Give the comparative and superlative forms of the following adjectives.

तनु, आशु, ओजस्विन् , बलवत्, शक्तिमत् , दुःसह, उरु, भृश, स्थूल, बहु, दीर्घ , ऋजु, प्रज्ञावत् , उदर्चिस् , स्रज् ।

(F) Give the synonyms of the following words.

विद्रव, याचना, आदर, स्निग्ध, सप्रेमन् , मसृणा, श्रीमान् , यौवनम् , शैशवम्, स्थविरम्, अभिप्रायः; इङ्गितम्, निशितम्, उद्धतम्, वेष्टितम्, रुग्णम् , वर्तुलम् , क्षमा, राजसभा ।



[३] गद्य—विभागः (Section III)

(१) ध्रुवभक्तिः

पुरा किल उत्तानपादस्य राज्ञःसुनीतिः सुरुचिः चेति पत्न्यौऽभवताम्। ध्रुवस्य माता सुनीतिः आसीत् सुरुचिः च तस्य विमाताऽसीत्। सुनीतेः पुत्रः ध्रुवः सुरुच्याः पुत्रः च उत्तमोऽभवताम्। एकदा ध्रुवस्य पितोत्तानपादः सभायाम् सिंहासने उपाविशत्। तस्याङ्कम् ध्रुवस्य भ्रातोत्तमोऽध्यास्त। तदा ध्रुवः तत्रायात् पितुरङ्के च उपवेष्टुमैच्छत्। अथ यावत् स समीपं गत्वा पितुरङ्कमारोहति तावदुत्तमस्य माता सुरुचिः सहसैव तत्रागत्य तं ध्रुवम् भर्तुरङ्कादपाकर्षत् परुषं वचनं चाभाषत। 'यदि त्वम् नृपस्याङ्क उपवेष्टुमिच्छसि तर्हि मम कुक्षौ जायस्व' इति साचष्ट। तेन खिन्नो ध्रुवो स्वमात्रे सुनीत्यै सर्वं वृत्तान्तं न्यवेदयच्च – मातः, विमात्रा तिरस्कृतोऽहं नातः पितुः राज्ये स्थातुमिच्छामि।

ततः सा स्नेहेन तं परामृश्याब्रवीत् च "नावां पर्याप्तपुण्यानाप्नुव अतः त्वम् पितुरङ्के सिंहासने च उपवेष्टुम् नार्हसि। अतः प्रीणय परमेश्वरं परमभक्त्या, आप्नुहि तं पुण्यमुग्रेण तपश्चरणेन। येन आवयोः दुःखम् नश्यति।' ध्रुवः तमुपदेशमेकाग्रचित्तेनाश्रृणोत्। ततः ध्रुवः ईश्वरस्यानुग्रहमाप्तुम् घोरं काननं प्रातिष्ठत्। मार्गे देवर्षिर्नारदः तममिलत् मन्त्रमेकमुपादिशत् च। घोरकानने वृक्षतले स नारायणम् एकाग्रचित्तेन अध्यायत। स षण्मासपर्यन्तम् तत्रोग्रं तपश्चर्यामाचरत्। तस्य तपश्चर्यया प्रसन्नो भूत्वा विष्णुस्तस्य पुरः आविरभवद्वरं वृणीष्वेति चाचष्ट। ध्रुवः अञ्जलयोः कृत्वा परमभक्तया नारायणमस्तौत्। किंतु किमपि तस्मै नायाचत। भगवान् प्रसन्नो भूत्वा तस्मै ध्रुवस्थानं तथा षड्त्रिंशत्सहस्त्रवर्षपर्यंतम् धर्मपूर्वकम् राज्यम् करोतु इति द्वौ वरौ तस्मैऽददात्। पश्चात् ध्रुवः स्वगृहम् प्रतिन्यवर्तत अनेकवर्षपर्यन्तम् च राज्यमकरोत्। अधुनापि तस्य निश्चलस्थानमाकाशे वयम् प्रतिदिनम् उत्तरदिशि पश्यामः। अन्ते बालध्रुवः स्वर्गे ध्रुवस्थानमाप्नोत्।

ईश्वरं भक्तिमार्गेण ये भजन्ति विपत्तिषु।
जायतेऽनुग्रहस्तेष बालभक्ते ध्रुवे यथा॥

—शब्दकोशः—

विमाता-step mother-सौतीली माँ, अनु+स्था-to perform-आचरना,
अधि + आस्-to sit, बैठना तपश्चर्या Penance (स्त्री.)
ध्रुवस्थान-permanent place निश्चित स्थान

: स्वाध्याय :

(अ) प्रश्नाः- (१) ध्रुवस्य मातुः विमातुः च के नाम्नी आस्ताम्? (२) एकदा समायाम् ध्रुवः किमैच्छत्? (३) सभायाम् तस्य विमाता तस्मै किमब्रवीत्? (४) तस्य माता तस्मै किमुपादिशत्? (५) वनमार्गे कः तममिलत्? तेन किमुपदिष्टः (६) घोरकानने ईश्वरानुग्रहार्थम् तेन किम् कृतम्? (७) नारायणः तस्मै कौ वरौऽददात्? (८) अधुना ध्रुवस्य स्थानम् कुत्र वर्तते?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् : विमाता, परमभक्त्या, अनेकवर्षपर्यन्तम् उत्तरदिशि, भक्तिमार्गेण, बालभक्तः।

(क) निम्नलिखितरूपाणां योग्यप्रकारः प्रदर्शयत।
अध्यास्त, आप्नोत्, अशृणोत्, आचष्ट, वृणीष्व, अददात्।

(ड) पर्यायशब्दाः दीयन्ताम् : ध्रुवः, वरः, कुङ्कुमम्, पर्यन्तभूः, सेतुः, वल्मीकम्।

(२) पितृभक्तः श्रवणः

पुरा श्रवणो नाम कुमारोऽयोध्यायाम् न्यवसत्। तदा दशरथो नाम राजाऽसीत्। तस्य पितरावन्धौ वृध्दौ चाभवताम्। स मातुः पितुश्च परमो भक्तः। स परमश्रद्धया तावसेवत। एकदा स स्कन्धवाहिन्याम् तौ उपवेश्य बहूनि तीर्थान्यवेक्षमाणो संरयूतीरमुपागच्छत्। तत्र ते सर्वे सरय्वास्तीरेऽश्रमम् कृत्वा न्यवसन्।

एकदा रात्रौ तस्य पितरौ पिपासू अभवताम्। अतः स घटमादाय जलमानेतुं सरयूतटमगच्छत्। तस्मिन्नेव समये युवराट्-दशरथो मृगयायै वने इतस्ततोऽभ्रमत्। तं घोषं वारणस्येव नर्दतः मन्यमानः[२] स शब्दवेधी तं शब्दं प्रति शरममुञ्चत्। तेन तस्य घटस्य पूर्यतः निशितेन शरेण श्रवणो विद्धश्च तस्य मर्मणो व्यथितो भूत्वा भूमौ पतितः। तत्क्षणे तस्य व्यथितां मानुषीं वाणीं श्रुत्वा दशरथो तं देशमुपैत्। तं नृपं दृष्ट्वा श्रवणोऽचष्ट

'हे राजन् ! वने निवसता मया किं तवापकृतम् । त्वयैवैकेन खलु बाणेन ममि मर्माण्यभिहते मम द्वावन्धौ वृद्धौ पितरौ निहतौ । तृषार्तौ तौ मां प्रतीक्षमाणौ स्तः । शरस्यासह्यवेदनया पीडितोऽहम्[1] अतः हृदयात् शरमुद्धर[2]-दशरथः तस्य शरमुदहरत् श्रवणश्च स्वप्राणान् त्यक्त्वा स्वर्गमुपैत् । ततो नृपो वारिपूर्ण घटमादायाश्रमं गतः ।

आश्रमे दशरथस्य पदरवं श्रुत्वा मुनिराचष्ट । किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ।

(१) यदि व्यलीकं कृतं पुत्र मात्रा ते यदि वा मया।
न तन्मनसि कर्तव्यं त्वया तात तपस्विना ॥

(२) त्वं गतिस्त्वगतीनां च चक्षुस्त्वं हीनचक्षुषाम्।
समासक्तस्त्वयि प्राणाः कथं त्वं नाभिभाषसे ॥

एतत्तस्य वचनं श्रुत्वा दशरथो एवमाह 'अहं क्षत्रियो दशरथो नाहं तव पुत्रो महात्मनः । अज्ञानेन मया युवयोः पुत्रो द्विपोऽयमिति मत्वा बाणेनाभिहतो मया '। तच्छ्रुत्वा तौ करुणं व्यलपताम् । ततः दशरथः तौ तं स्थान नीत्वा यत्र श्रवणः पतितः । तत्र तौ श्रवणं स्पृष्टवास्य शरीरे पतितौऽक्रन्दत् च । ततः शोकार्तः तस्य पिताऽचष्ट । यथाहं पुत्रशोकेनाधुना म्रिये तथैव त्वमपि अन्तकाले पुत्रस्य वियोगेन म्रियेथाः इति । एवं नृपं शप्त्वा तौ दम्पती मृतपुत्रेण सह स्वदेहं चितामारोप्य स्वर्गमैताम् ।

: शब्दकोश :

स्कन्धवाहनी–a little swinging cot–डोली,

मृगया–(स्त्री.) hunting–शिकार करना,

पूर्यत् (पृ-वर्त. कृ) filling भरना,

निशित–(वि.)sharp–तीक्ष्ण,

विद्ध–(व्यध्-भू. कृ.) pierced बिधा हुआ,

मर्मन् (न.) parts of the body हृदयका भाग,

चिरायसि–(चिर-नाम धातु) to delay–विलंब करना,

असह्य (वि.) unbearable –असह्य,
व्यलीक (न.) false, wrong झूठा,
तत्क्षण–(पुं). at that time, तत्क्षण
वि+लप्–(१. प) to lament –विलाप करना,

: स्वाध्याय :

(अ) प्रश्ना : (१) श्रवणस्य पितरौ कीदृशौ आस्ताम् ? (२) ते कुत्रावसताम् ? (३) तस्मिन् समये दशरथः कीदृशम् घोषम–श्रृणोत् ? (४) तत्क्षणे तेन किम् कृतम् ? (५) श्रवणः तं किमुक्तवान् ? (६) दशरथस्य पदरवं श्रुत्वा मुनिः तस्मै किमाचष्ट ? दशरथेन किमुक्तम् ? (८) ततः तस्य पिता शोकार्तेन दशरथो किम् शप्तः ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् :—
स्कन्धवाहिनी, सरयूतटम्, शब्दवेधी, वारिपूर्णं, पदरवम्, अगतिः हीनचक्षुषाम्, शोकार्तः, दम्मती, मृतपुत्रः, पुत्रशोकः ।

(क) निम्नलिखितरूपाणां योग्यप्रकारः प्रदर्शयत :—
अपेक्षमाणः, आचष्ट, उपैत् उद्धर, आह, व्यलपताम् ।

(ड) पर्यायशब्दाः दीयन्ताम्:–मृगया, वेदना, चिता ।

(३) कृष्णसुदाम्नो :

सुदामा कृष्णस्य प्रियमित्रम् किन्तु स दरिद्रः आसीत् । स भार्यया सहोटजे न्यवसत् । तस्यै दरिद्रता न रोचते । सा कुचैलस्य क्षुत्क्षामा पतिव्रताजाया, एकस्मिन् दिने म्लायता वदनेन स्वपतिं प्राह–'ननु ब्रह्मन् तव सखा साक्षाच्छ्रीपतिः भगवान् ब्रह्मण्यश्च शरण्यश्चास्ति । अतः त्वम् तमुपैहि द्वारवत्यां कृष्णप्रासादम् तथा च तस्मै धनं याच्यताम् । एवं भार्यया विप्रो बहुशः मृदु प्रार्थितो स मनसि इत्थमचिन्तयत् अहं न तु धनं वाञ्छामि किंतु परमो लाभः भवति इति निश्चित्य किञ्चिदुपायनम् तस्मै दातुम् स्वगृहिण्यै याचितवान् । स चैलखण्डेन पृथुकतण्डुलान् बद्ध्वा स्वमार्गे प्रायात् ।

यदा सुदामा कृष्णस्य प्रासादस्यद्वारेऽयात् तदा स द्वारपालान् स्वागमनस्य कृष्णाय निवेदयितुमाचष्ट । कृष्णोऽपि तम द्वारे तिष्ठन् दृष्ट्वा दूरात् कृष्णः प्रिया-रुक्मिणीपर्यङ्कात् सहसोत्थाय तम् चाभ्येत्य स्वदोर्भ्याम् आश्लिष्टः । पश्चात् सः स्वपर्यङ्के तमुपवेश्य प्रीत्या पुष्करेक्षणाभ्याम् अश्रुबिन्दून् व्यमुञ्चत् तस्य पादावभ्यर्चयत् च दिव्यगन्धेन च चन्दनागरु-कुङ्कुमैः तस्याङ्गेषु व्यलिम्पत् तथा च धूपैः सुरभिमिः प्रदीपावलिभिर्मुदा अर्चित्वा, ताम्बूलं च दत्वा स्वागतम् इत्यब्रवीत् । इत्थं कुचैलं मलिनं क्षामं धमनिसंततम् च द्विजं देवी रुक्मिणी पर्यचरत् । अन्तःपुरजनः कृष्णेन प्रीत्या सभाजितम् (पूजितं) अवधूतं च दृष्टवा बिस्मितोऽभवत् ।

तदा कृष्णोऽब्रवीत्—अपि नौ स्मर्यते गुरुकुले निवसन्तौ गुरुदारैः प्रेरितौ आवाम् इन्धनानयने वने गतौ वातवर्षमभवत् तेन आवाम् महासङ्कटे पतितौ तथा च सूर्येऽस्तं गते आवाम् दिशोऽजानन्तौ परस्परं वने गृहीतहस्तौ आतुरौ रात्रौ पर्यभ्रमाव । प्रातःकाले सान्दीपनिगुरुः शिष्यैः सहान्विष्यन् वनेऽऽवामातुरौऽपश्यत् । ततः गुरुणा इत्थमाचक्ष्यत

अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः ।
आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ।। १ ।।

तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः सन्तु मनोरथाः ।
छन्दास्ययातयामानि भवन्त्विह परत्र च ।। २ ।।

इत्थं विधानान्यनेकानि वसतां गुरुवेश्मसु ।
गुरोरनुग्रहणैव पुमान् पूर्णः प्रशान्तये ।। ३ ।।

इत्थं तौ पूर्वं गुरुकुले ललिताः स्वगाथाः परस्परं स्मरन्तौ, परस्परं करौ गृहीत्वा आह्लादमन्वभवताम् । ततः कृष्णः स्मयमानः तस्मैऽऽचष्ट ' किमुपायनम् ब्रह्मन् त्वया गृहातू आनीतम् ' किंतु सुदामा अवाङ्मुखः भूत्वा किंचिदपि नोक्तः । तदा कृष्णः तम् प्रियसखायम् मत्वा तथा च तस्मै अमर्त्यदुर्लभाः संपदः दातुम् द्विजन्मनः वसनाच्चीरबद्धात् एक-मुष्टीः पृथुकतण्डुलानपाहरत् । तस्य भक्षणेन स्वसंपत्तिः तस्य गृहेऽऽयात् । यदा सः स्वगृहं प्रतिन्यवर्तत तदा सः स्वोटजस्य स्थाने रत्नजटित-प्रासादमपश्यत् । तदा तस्य पतिव्रता पत्नी स्वपत्यागमनम् श्रुत्वा महेन्द्रभवनेन सदृशम् स्वप्रासादात् तूर्णम् दासीभिः परिवृता साक्रामत् । तदा तस्य पत्युः स्वागतम् कृतवान् पश्चाद् सुदामा प्रीतमनाः पत्न्या सह

निजमन्दिरम् प्रविष्टः । ततः सुदामा स्वपत्नी तथा च स्वबालकैः सहानन्दपूर्वकम् प्रियसखाकृष्णस्य कृपाम् बहुशः स्मृत्वा दिवसान् नीतवान् ।

:– शब्दकोश –:

कुचैलस्य (न) dirty or worn out clothes– मेले और फटे हुए कपडेवाले,
ब्रह्मण्य -(पुं) worshipper of Brahmans–ब्राह्मणों के भक्त
द्वारवती-(स्त्री.) the name of the city of Lord Krishna–द्वारका,
उत्तम श्लोक–(पुं) the best of man–उत्तम पुरुष,
चैलखण्ड–(पुं.) a Piece of cloth–वस्त्र का टुकडा,
पृथुकतण्डुल (पुं.) Pounded rice–चिऊडा,
पुष्कर–(न.) lotus–कमल,
धमनिसततम्–(न.) ribs of the body seen–पंसलियोंका दिखाई देना,
क्षाम (वि) weak–दुर्बल,
दोस् (पुं.) hand–हाथ,
अगरु–(पुं.) incensed aloe-wood–अगरजा,
छंदस्–(न.) Veda–वेद,
अयातयामानि–ever remained at the tip of the tongue–वेदोंका पाठ हंमेशा याद रहना,
कुङ्कुम (पुं.) Saffron–केसर,
सभाजित (भज्) Propitiated पूजित,
क्रम्–(१. ऊ.) to step foreward आगे चलना, (क्रामति)
गुरुकुल (पुं.) school of the preceptor–गुरुकुल,
श्रेष्ठ (प्रिय–वि.) extremely lovable–अत्यंत प्रिय,
सत्–fulfil पूर्ण होना,
विधानानि – come fruitful घटित होना,
अवाङमुख–turn one's face sidewards–मुँह फेरना
रत्नजटित–set with jewels रत्नोंसे जुटा हुआ,

: स्वाध्याय :

(अ) प्रश्ना :–(१) एकदा सुदाम्नः पत्नी तस्मै किमाचष्ट ? (२) तस्य पत्नी तस्मै कृष्णस्य दातुम् किमुपायनम् प्रादात् ? (३) कृष्णः सुदाम्नः स्वागतम् कथमकरोत् ? (४) कृष्णेन गुरुकुलस्य का वार्ता कथिता ? (५) कृष्णः तस्य वसनात् किमपाहरत् ? पश्चात्

तेन किम् कृतम् ? (६) यदा स स्वगृहं प्रतिन्यवर्तत तदा तेन किम् दृष्टम्? (७) तस्य पत्नी स्वागतम् कथं कृतवती ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम्ः—
प्रियमित्रम्, श्रीपतिः, क्षुत्क्षामा, कुचैलस्य, पृथुकतण्डुलान् स्वदोर्भ्याम्, अन्तःपुरजनः, चन्दनागरुकुङ्कुमैः, वातवर्षा, प्रियसखा, रत्नजटितप्रासाद, निजमन्दिरम् ।

(क) निम्नलिखितरुपाणां योग्यप्रकारः प्रदर्शयत :—
पर्यग्रहीत्, अभ्यर्चयत्, पर्यभ्रमताम्, अक्रामत, नीतवान्, उपैहि ।

(ड) पर्यायशब्दाः दीयन्ताम् :—पृथुक् व्रीहि शालिः, मुष्टिबन्धः ।

(४) नीलवर्णस्य शृगालस्य ।

अस्तित्यरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्नोलीभाण्डे पतितः । पश्चात्ततः उत्त्थातुमसमर्थः प्रातरात्मनं मृतवत्संदृशः स्थितः । अथ नीलीमांडे स्वामिना मृत इव ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वापसारितः तस्मात् पलायितः । ततोऽसौ वनं गत्वा स्वकीयमात्मानं नीलवर्णमवलोक्याचिन्तयत् । अहमिदानीमुत्तमवर्णः । तदाहं स्वकीयोत्कर्षं कि न साधयामि इत्यालोच्य शृगालानाहूय तेनोक्तम् । अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः । शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टांङपातं प्रणम्याब्रुवन् । यदाज्ञापयति देवः । इत्यनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्याभवत् । ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम् । ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान्प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञाय स्वज्ञातयः सर्वे दूरीकृताः । ततो विषण्णान्शृगालानवलोक्य केनचिद्वृद्धशृगालेनैतत्प्रतिज्ञातम् । मा विषीदत । यदनेनानभिज्ञन नीतिविदो मर्मज्ञा वयं स्वसमीपात्परिभूतास्तद्वयं यथा नश्यति तथा विधेयम् ततोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिम मंन्यन्ते । तद्यथायं परिचितो भवति तथा कुरुत । तत्र चैवमनुष्ठेयम् । अद्य सर्व संध्यासमये तस्य संनिधाने महारवमेकदैव कुरूत । ततस्तं शब्दमाकर्ण्य जातिस्वभावात् तेनापि शब्दः कृतः ततस्तथानुष्ठिते सति तद्वृत्तम् ततः शब्दादभिज्ञाय स व्याघ्रेण हतः ।

'यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः । श्वा यदि क्रियते राजा स किं नाश्नात्युपाहनम्

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ॥
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥

शब्दकोशः

उपान्त (अ.) in the vicinty of–पास में,

नीलीभाण्ड– indigo vessel नील का पात्र,

अपसारित (अप + सृ) driven away–फेंक दिये,

साष्टांगपात–to bow down touching the earth with eight limbs–साष्टांग प्रणाम करना,

अव+ज्ञा–to insult–अपमानित करना,

तद्वृत्तम्–(वृत्) resulted in the same way–उसी प्रकार हुआ,

आवृत्त–(आ + वृत्) surrounded by–चारो ओर छिपा हुआ

विषण्ण–(वि + सद्) sorrowful–खिन्न हुआ.

प्रति + ज्ञा–to vow–प्रतिज्ञा करना.

परिभूता–insulted-अपमानित हुआ,

दुरतिक्रम-difficult to overcome–कष्ट से साध्य

स्वाध्याय

(अ) प्रश्ना :–(१) प्रातःकाले नीलीमांडस्वामिना भांडे पतितो शृगालः किम् कृतम्? (२) ततोऽसौ शृगालः स्वकीयमात्मनं नीलवर्णमवलोक्य किमचिन्तयत्? (३) तस्य विशिष्टवर्णमवलोक्य शृगालाः तं प्रणम्य किमब्रुवन्? (४) सदसि शृगालानवलोक्य तेन लज्जामानेन किम् कृतम्? (५) केनचिद् वृद्धशृगालेन किम् प्रतिज्ञातम्? (६) तेन कीदृशमुपायम् कथितम्? (७) तस्य शृगालत्वं ज्ञापयितुम् सर्वैः शृगालैः किम् कृतम्? (८) नीलशृगालः किमकरोत्?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् :—
नीलीभांडस्वामिना, उत्तमवर्णः, साष्टांगपातम्, वृद्धशृगालेन, नीतिविदः, अनभिज्ञः, मर्मज्ञाः, वर्णमानविप्रलब्धाः महारवम्, जातिस्वभावात्।

(क) निम्नलिखितरूपाणां योग्यप्रकारः दर्शयतः—
अब्रुवन्, अनुष्ठेयम्, क्रियते, विषीदत, विषण्णान्।

(ङ) पर्यायशब्दाः दीयन्ताम् :–नील, भाण्डम्, नृत, परिचय, परिचित, विषण्ण, अग्रेसरः ।

(५) त्रयाणां धूर्तानाम्

अस्ति कस्मिंश्चदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्र-परिग्रहः प्रत्यवसत् । स कदाचिन्माघमासे सौम्यानिले प्रवाति गगने मन्दं मन्दं वर्षति पर्जन्ये पशुप्रार्थनार्थं किञ्चिद् ग्रामान्तरं गतः । कश्चिद्यजमानो तेन प्रार्थितः । भो यजमान, अहम् तु आगामिन्याममावास्यायां यज्ञम् यष्टुम् इच्छामि । तद्यजनाय पशुमेकं समर्पय । अथ तेनातीव पीवरतनुः पशुः प्रदत्तः : । सोऽपि समर्थस्तं पशुमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा स्वपुराभिमुखं प्रस्थितः । अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः संमुखा अब्रुवन् । तैस्तादृशं पीवरतनुं पशुं स्कन्धे कृत-मालोक्य मिथोऽभिहितम् । भो अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते बुभुक्षा च शाम्यते । तदेनं वञ्चयित्वास्य सकाशाद् गृह्यते । अथ तेषामेकतमो वेषपरिवर्तनं विधाय संमुखो भूत्वापरमार्गेण तमाहिताग्निं प्राह । भो भो बालाग्निहोत्रिन् किमेवं जनविरुद्धहास्यकार्यमनुष्ठीयते यदेष सारमेयोऽपवित्रः स्कन्धाधिरुढो नीयते उक्तं च—

"श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः ।
रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत् ।"

ततश्च तेन कोपाविष्टेनाभिहितम् । अहो किमन्धो भवान्यत्पशुं सारमेयं प्रतिपादयसि । स आह । ब्रह्मन् न कोपः कार्यः । यथेच्छं गम्यताम् । अथ यावत्किञ्चिद्वनान्तरं गच्छति तावत् द्वितीयो धूर्तः संमु-खमभ्युपेत्य तमाह । भो ब्रह्मन् कष्टं कष्टम् । यद्यपि बल्लभोऽयं मृत-वत्सस्तथापि स्कन्धे आरोपयितुमशक्यः । उक्तं च ।

'तिर्यञ्चं मानुषं वापि यो मृतं संस्पृशेत्कुधीः ।
पञ्चगव्येन शुद्धिः स्यात्तस्य चान्द्रायणेन वा ॥'

अथासौ सकोपमाह । भोः किमन्धो भवान्यत्पशुं मृतवत्सं वदसि । सोऽब्रवीत् । भगवन् मा कोपं कुरु । अज्ञानान्मयामिहितम् । तत्त्वमात्मनः उचितेन समाचरेति । अथ यावत्स्तोकं वनान्तरं गच्छति तावत्तृतीयो धूर्तः सम्मुखमुपेत्य तमब्रवीत् । भो अयुक्तमेतद्यद्रासभं स्कन्धाधिरुढं नयसि, तत्त्यज्यतामेषः उक्तं च ।

'यः संस्पृशद्रासभ मर्त्यो ज्ञानादज्ञानतोऽथवा ।
सचैलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥'

तत्त्यजैनं यावत्कोऽपि न पश्यति । अथासौ तं पशुं रासभं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहं प्रति पलायितुमारब्धः । ततस्तेऽपि त्रयो मिलित्वा पशुमादाय यथेच्छं भक्षयितुमारब्धाः ।

शब्दकोश

अग्निहोत्रपरिग्रह (पुं.) one who keeps fire to perform sacrifices-अग्नि होमका व्रत रखनेवाला,
सौम्य (वि.) gentle-शांत, मन्द,
पीवर-(वि.)-fat-तगड़ा,
बुभुक्षा-(स्त्री.) hunger-भूख,
बाल (पुं.) foolish-मूर्ख,
कुधीः-(पुं.) a cunning fellow-दुष्ट
प्रति+पद्-(१० उ) to state -प्रतिपादन करना,
स्तोकम् (अ.) little far-थोडा दूर.

-: स्वाध्याय :-

(अ) प्रश्नों : (१) मित्रशर्मा ग्रामान्तरं किमर्थं गतः ? (२) मित्रशर्मा स्वपशुम् स्कन्धे किमर्थम् निहितम् ? (३) तस्य गच्छतो मार्गे के संमुखाः अभवन् ? (४) त्रयो घूर्ताः मिथो किमभिहितवन्तः ? (५) तेषामेकतमो धूर्तो तस्य संमुखे भूत्वा किम् प्राह ? (६) द्वितीयो धूर्तो तं प्रति किमाह ? (७) तृतीयो धूर्तो तं प्रति किमाह ? (८) अन्ते किं मन्यमानेन ब्राह्मणेन किम् कृतम् ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम्ः

अग्निहोत्रपरिग्रहः, सौम्यानिलः, मेधाच्छादिते, पशुप्रार्थना, पीवरतनु, हिमपातः, स्कन्धारुढः, श्वानकुक्कुटचाण्डालाः, कोपाविष्टः, वनान्तरम् मृतवत्सम्, कुधीः ।

(क) निम्नलिखितरुपाणां योग्यप्रकारः प्रदर्शयत :

गृह्यते, अभिहितम्, अधिरूढम्, संस्पृशेत्, आदाय ।

(ङ) पर्यायशब्दाः दीयन्ताम् : संमुख, आरम्भः शठ, अन्ध, प्रतिकूलम्, रेतः, मूच्छित ।

(६) शिबिपरीक्षा।

पुरा उशीनरो नाम राजा यमुनातीरे यज्ञमतनोत्। तेन यज्ञेन वासवादधिकम् पुण्यमलमत । तत्र तस्य महात्म्यम् ज्ञातुमग्निरिन्द्रश्चागतौ । इन्द्रः श्यनेरूपमग्निः च कपोतरुपतधारयताम्। श्येनरुपेन्द्रः कपोतरूपाग्नेः पृष्ठेऽधावत्। कपोतः श्येनभयात् आत्मानं त्रातु राज्ञः ऊरुभागे निलीनोऽभवत्। तद् दृष्टवा श्येनो राजानमब्रवीत्। हे राजन्, अस्य कपोतस्य रक्षणं धर्मविरुद्धाचरणम् । यतः एष कपोतो क्षुधा पीडयमानस्य मे भक्षणं भवतीति तदा राजा प्राह । अयं द्विजः त्वत्तो भीतः प्राणहर्तुरभयार्थं मत्समीपमागतः अतोऽस्याभयार्थिनो रक्षणं ममावश्यकर्तव्यतामापततीति । एतच्छ्रुत्वा श्येन आह । हे राजन्, अस्माद्भक्ष्याद्विलोपितस्य मम प्राणा नश्यन्ति । मयि नष्टे मत्कुटुम्बमपि नश्येत् । एवं त्वमेकस्य प्राणान् रक्षित्वा बहुप्राणघातं करोषि । अप्येत्तद् धर्म्यं भवेदिति ।

एतद्वचनं निशम्य राजाऽभाषत । विहगोत्तम, त्वं बहुकल्याणार्थम् भाषसे । किन्तु कथं त्वं शरणार्थिपरित्यागः साधुरिति मन्यसे । भवतु नाहं तव भक्ष्यनाशं करोमि । यत्किञ्चिदन्यद् भक्ष्यं वाञ्छसि तदेवाहं तुभ्यं दद्यामिति । नाहं कपोतादन्यत् किञ्चिदत्तुम् काङ्क्षे । तं मे दैवविहितं भक्ष्यं कपोतोऽस्तीति श्येनेनाभिहितम् । तदा राजाऽवदत् कपोतप्राणान् विना यदन्यत्त्वं वाञ्छसि तत्सर्वमहं तुभ्यं ददानि न तु कथञ्चिदपि कपोमिति । तदा श्येनोऽवदत् । भवतु हे नृपोत्तम, कपोतेन समं तव मांसं त्वया प्रदेयम् । तेन मे तुष्टिर्भवेदिति । एतदुत्तरं श्रुत्वा शिबी राजा स्वमांसमुत्कृत्य कपोतेन सममतोलयत् । किन्तु कियानपि तस्य मांसभागः कपोतेन समो नाभवत् । अतः स राजा, स्वयमेव तुलामारोहत् । एतद् दृष्टवा श्येनोऽवदत् :

'इन्द्रोऽहमस्मि धर्मज्ञ कपोतो हव्यवाड्यम् ।
जिज्ञासमानौ धर्मं त्वां यज्ञवाटमुपागतौ ॥ १ ॥

यावल्लोके मनुष्यास्त्वां कथयिष्यन्ति पार्थिव ।
तावत्कीर्तिश्च लोकाश्च स्थास्यन्ति तव शाश्वताः ॥ २ ॥'

एतदुक्त्वा तुष्टमानसौ तौ इन्द्राग्नी त्रिविष्टपं गतौ । उशीनरोऽपि विभ्राजमानो वपुषा त्रिविष्टमारोहत् ।

शब्दकोश

वासव (पुं.) the god Indra —इन्द्र,
शरणार्थिन् (पुं.) one who seeks refuge—शरणार्थी,
भक्ष्यम् (वि.) food—खुराक,
उद्+कृत्—(६. प.) to cut —काटना,
उशीनर (पुं.) the other name of king Shibi —शिबि राजाका दूसरा नाम,
हव्यवाड्य (न.) offering in the sacrifice—यज्ञमें होम करनेकी चीज,
हव्यवाड् (पुं) the god of fire (carrying the offerings—अग्नि,
जिज्ञासमान—desire to know ज्ञा धातुका वर्त कृ.)—इच्छादर्शक
त्रिविष्टप— (नं) heaven—स्वर्ग
विभ्राजमान—lustrous—वि + भ्राज वर्त कृ) चमकता
यज्ञवाट—(पुं) altar, the sacrificial place—यज्ञका स्थान

स्वाध्याय

(अ) प्रश्नाः—(१) श्येनभयात् कपोतः किमकरोत् ? (२) राजा श्येनम् प्रति किमब्रवीत् ? (३) राजा कपोतस्य प्राणान् त्रातुम् श्येनाय किम् दातुम् तत्परोऽभवत् ? (४) ततः राजा किमतोलयत् ? (५) राजा अन्ते किमकरोत् ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् :—

ऊरुभागे,प्राणहर्तुः, बहुप्राणघातम्, द्विजोत्तम, मांसभागः, अग्निरिन्द्रः, श्येनरुपेन्द्रः शरणार्थि, परित्यागः, धर्मज्ञः, नृपोत्तम, हव्यवाट् ।

(क) निम्नलिखितरुपाणां प्रकारः प्रदर्शयत : निशम्य, दद्याम्, ददाति ।

(ड) पर्यायशब्दाः दीयन्ताम् : तुला, दैत्य ।

(७) बकचापलम्

अस्ति भागीरथीतीरे श्वेताङ्गो नाम बकः । स कदाचिन्मानस-निवासिनां हंसाना गुणान् रसिकैरुपवर्ण्यमानान् श्रुत्वा सञ्जातेर्ष्याऽचिन्तयत् । अहो, को हि नामास्मदपेक्षया हंसेषु विशेषो येन मन्दा अमी तानेव श्लाघन्ते । यथा वयमेव तेऽपि श्वेतकायारतोयाधारसञ्चारिणश्च । भवतु अतःपरं हंसेनैव मया भवितव्यमिति । एवं विचिन्त्य सोऽयं मूढधीः प्रफुल्लकह्लरभासुरेषु सरस्सु विहर्तुमारमते । हिमांशुखण्ड धवलानि च मृणालान्यास्वादयन् राजहंसतामेवात्मनः अप्रकाशत । बकजात्युचितं मत्स्यव्यापदनमजहात् ।

अथ कदाचित्स्नानार्थमुपस्थितेन केनापि मुग्धमतिना दारकेण कौतुकाद् गृहीतोऽयमात्मनः सदनमानीतः । गृहवासिनो वृद्धास्तु तमवलोक्य भ्रान्तोऽसि वत्स, येन त्वयाऽयं धूर्तशिरोमणिर्बको हंस इति मत्वा गृहीत इत्यब्रुवन् । श्वेताङ्गस्तु तदाकर्ण्य रोषमिवाभिनयन् प्राह । धिङ् मूढानपरीक्ष्यवादिनो ये हंसकुललब्धजन्मानमपि मां बक इति प्रजल्पन्तीति । तदाकर्ण्य कोऽपि चतुरमतिः सविनयमब्रवीत् । युज्यते महाभाग, कुतोऽन्यथा तवैतच्छुक्लत्वम् ? भवतु । अपनीयतां कापः । आस्वाद्यतां चैतत्क्षीरमित्यभिधाय चैवं सलिलमिश्रमस्मै पयः उपाहरत् । सोऽपि मन्दभागा निःशेषमप्येतत्प्राशितवान् तदवलोक्य च तेनाभिहितः । धूर्त बकहतक

न जातु कर्मसादृश्याज्जातिर्विपरिवर्तते ।
रथवाहनमात्रेण किमश्वायेन गर्दभः ॥

तद्गच्छज्ज्ञातोऽसीति । सोऽपि लज्जितो यथायातं तथैव प्रायात् ।

एवोच्यते प्रज्ञः—

हंसः शुक्लो वकः शुक्लः को भेदो बकहंसयोः ।
नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥

शब्दकोशः

मानस (पुं.) the Manasa lake–मानस सरोवर

कह्लार (पुं.) white lotus सफेद कमल,

भासुर (वि.) lusterous –चमकीला.
मृणाल (पुं.) the lotus stalk-कमलकी डंडी.
व्यापादन (न.) destruction –नाश.
दारक (पुं) the little child–बालक.
शिरोमणि (पुं.) best–श्रेष्ठ
अभिनयन (अभि+नी वर्त. कृ.) to imitate–अभिनय करना,
प्राशितवान्– (प्र+अश्-कर्तरि) tasted–आस्वाद किया,
अश्वायेत–(नामधातु) to become a horse-अश्व बनना.

: स्वाध्याय :

(अ) प्रश्ना – (१) कः वर्णः हंसस्य बकस्य च? (२) कुत्र संचरति बकः? (३) स कान् अस्वादयत्? किमत्यजच्च सः? (४) गृहवर्तिनो वृद्धाः दारकम् प्रति किमब्रुवन्? (५) ततः बकेन किम् कथितम्? (६) चतुरमतिः किमानीतवान्? (७) ततः बकेन किम् कृतम्?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् :
मानसनिवासिनाम्, श्वेतकायाः, मूढधीः, हिमांशुखण्डधवलानि, मत्स्यव्यापदनम्, मुग्धमतिना, गृहवर्तिनः, धूर्तशिरोमणिः, हंसकुललब्धजन्मानम्, चतुरमतिः, सलिलमिश्रम्।

(क) निम्नलिखितरुपाणां प्रकारो दर्शयत :
आनीतः, अब्रुवन्, अभिनयन्, आस्वाद्यताम्।

(क) पर्यायशब्दाः दीयन्ताम्–भ्रान्तिः सुरभिः।

(८) एकलव्यस्य

भीष्मस्याज्ञया सर्वे पाण्डवाः कौरवाश्च द्रोणाचार्यादस्त्रविद्यामध्यैयत। अर्जुनस्य नैसर्गिककौशलं दृष्टवाऽब्रवीद् 'द्रोणो यदहं जिष्णुं तथाध्यापयामि यथा तत्समोऽन्यो धनुर्धरो न स्यादिति।' एकदा निषादराजस्य हिरण्यधनुषः सुत एकलव्यो अस्त्रविद्यामध्येतुम् द्रोणामागतः। किन्तु स निषादवंशजोऽस्ति इति चिन्तयित्वा द्रोणो न तं प्रत्यगृहणादवदच्च 'त्वं क्षत्रियो नासि अथत्वमस्त्रविद्याभध्येतुं नार्हसि।

एतद् गुरोर्द्रोणस्य वचनं श्रुत्वा स परन्तपो द्रोणं शिरसा प्रणम्यारण्यं गतः। तत्र द्रोणस्य मृन्मयां मूर्तिं स्थापयित्वा तस्मिन्नाचार्यवृत्तिमास्थितः परया श्रद्धयोपेतः स परमेण योगेन धनुर्विद्यायाम् परं पटुत्वं प्राप्नोत् । अथैकदा कौरवपाण्डवाः द्रोणाज्ञया मृगयार्थं वने इतस्ततोऽभ्रमन् । कोऽपि श्वा तैः सार्धमनुगतः। स श्वा पथा क्रीडनेकलव्यं दृष्टवा भषन् तस्य समीपेऽतिष्ठत् । तदा स तस्य भषतः शुनोर्मुखे सप्तशरान् युगपदमुञ्चत् । स तु श्वा शरपूर्णास्यः पाण्डवान् न्यवर्तत । पाण्डवाः तं दृष्टवा परं विस्मयं गताः। ते तस्य लाघवं शब्दवेधित्वं चास्तुवन् ।, तमन्विष्यन्तस्ते एकलव्यमनिशं शरानस्यन्तं तमपश्यन् । तमनभिज्ञाय ते 'को भवान् कस्य शिष्य.' इत्यपृच्छन् । 'अहम् तु निषादाधिपतेः हिरण्यधनुषः सुतं द्रोणाचार्यस्य शिष्यं च मां वित्त, 'मया तु धनुर्वेदे कृतः श्रम.' इत्यवदत् ।' एतच्छ्रुत्वा ते पाण्डवाः द्रोणाय सर्वमब्रुवन् । अर्जुनस्तु तमेकलव्यमनुस्मरन् रहसि द्रोणाचार्यं प्रणयादब्रवीत् –'कथं भवद्वचनमनादृत्य मद्विशिष्टोऽन्यो भवतः शिष्यो वर्तत इति। तदा क्षणमिव चिन्तयित्वा द्रोणः सव्यसचिनमादाय एकलव्यम् प्रति गतः। तत्र तं धनुर्धारिणमनिशं शरानस्यन्तं सोऽपश्यत् । द्रोणाचार्यं गुरुं दृष्टवैकलव्यः शिरसा नमस्कृत्य सादरं पूजयित्वा प्राञ्जलिः स्थितः । ततो द्रोणोऽब्रवीतत् 'यदि त्वं मे शिष्योऽसि तर्हि दक्षिणां दीयतामिति। एतच्छ्रुत्वा स प्रसन्नो भूत्वा किं प्रयच्छानि भगवन्मामाज्ञापयन्तु इत्यवदत्। तदा तव दक्षिणोऽङ्गुष्ठो दीयतामिति द्रोणोऽब्रबीत् । इदं दारुणं वचोऽपि श्रुत्वा प्रसन्नतया स आत्मनोऽगुष्ठं छित्वा आचार्यायार्पयत् । एकलव्यस्य निश्चलगुरुभक्तिः, इति महदाश्चर्यम् ।

—शब्दकोशः—

जिष्णु– (पुं.) Arjun–अर्जुन,
परन्तप– (पुं.) the killer of foes–शत्रुओंको नाश करनार,
मृन्मय– (वि.) muddy–मिट्टीवाली.
युगपदे –(अ.) instantly –एकसाथमें.
अनिशम्–(अ.) often-वारंवारम्.
ऋ (अर्पय) to offer–अर्पण करना,

: स्वाध्याय :

(अ) प्रश्नो :–(१) अर्जुनं प्रति द्रोणो किमब्रवीत् ? (२) एकदा कः द्रोणास्य समीपे गतः ? किमर्थम् ? (३) द्रोणो किमर्थम् एकलव्यम् तं न प्रत्यगृह्णात् ? (४) अरण्ये एकलव्येन किम् कृतम् ? (५) शुनोः मुखे एकलव्येन किम् कृतम् ? (६) शरपूर्णास्यम् शुनम् दृष्ट्वा पाण्डवाः कस्य किमस्तुवन् ? (७) अर्जुनः द्रोणं किमब्रवीत् ? (८) गुरुं दृष्टंवा एकलव्येन किम् कृतम् ? (९) ततो द्रोणो एकलव्यम् किमब्रवीत् ? (१०) एकलव्यः द्रोणाय किमर्पयत् ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहःक्रियताम् :—
नैसर्गिककौशल, धनुर्धरः, मृण्मयम्, श्रद्धोपेतः, मृगयार्थम्, शरपूर्णास्य, भवद्वचनम्, कौरवपाण्डवाः, वनवासिनाम् ।

(क) निम्नरूपाणां प्रकारः दर्शयत :
अध्यैयत, प्रत्यगृह्णात्, श्वा, पथि, क्रीडन्, अस्तुवत्, अब्रुवन्, अन्विष्यन्तः, भषन् अन्वयुञ्जत् ।

(ड) पर्यायशब्दाः दीयन्ताम् : भिन्न, आदि, अन्तः, नित्यकर्म, प्रतिकूलम्, संकटम्, नखः ।

(९) पतिव्रताप्रभाव ।

अथैकदा रात्रौ राजा भोजो धारानगरे एकाकी विचरन् कस्यापि विप्रवरस्य गृहं प्राप्तः । तदा स ब्राह्मणः स्वपत्न्या अङ्के निद्रितः आसीत् । ततस्तस्याः सुप्तोत्थितः शिशुः प्रज्वलितस्य वह्नेः समीपमयात् । किन्तु तस्य पतिव्रता भार्या स्वपतेर्निद्राभङ्गो मा भवत्विति मत्वा वह्नौ पतन्तं शिशुं न न्यवारयत् । राजा चाश्चर्यमालोक्य विस्मितः स्थितः । ततः सा पतिपरायणा वैश्वानरं प्रार्थयत् । यज्ञेश्वर, त्वं सर्वकर्मसाक्षी सर्वधर्मान्जानासि । अहं शिशुं ग्रहीतुमक्षमाऽस्मि । अतो मदीयशिशुमनुगृह्य त्वं तं मा दहेति । ततः शिशुर्यज्ञेश्वरं प्रविश्यार्धघटिकापर्यन्तं तत्रैवातिष्ठत् । ततो नारोदत् शिशुः प्रसन्नमुखः । ततो यदृच्छया समुत्थिते भर्तरि सा झटिति शिशुमुदधरत् । तं च परमधर्ममालोक्य विस्मयाविष्टो नृपतिरब्रवीत् । अहो मम सम भाग्यं कस्यास्ति यदीदृश्यः पुण्यस्त्रियो मन्नगरे

वसन्तीति ततः प्रातः सभामागत्य सिंहासने उपविष्टो राजा कालिदासमब्रवीत् । सुकवे महदाश्चर्यं मया पूर्वेद्यूः रात्रौ दृष्टं यद् हुताशनश्चन्दनपङ्कशीतलः ' इति । कालिदासस्ततश्चरणत्रयं झटिति पठति ।

सुतं पतन्तं प्रसमीक्ष्य पावके न बोधयामास पतिं पतिव्रता ।
तदाभवत्तत्पतिभक्तिगौरवाद् हुताशनश्चन्दनपङ्कशीतलः ॥

इति कालिदासेन कृतं श्लोकं श्रुत्वा राजा भोजस्तं पारितोषिकदानेन सममानयत् । '

: स्वाध्याय :

(अ) प्रश्नाः—(१) अथैकदा रात्रौ राजा भोजः कुत्र प्राप्तः ? (२) तत्र स किमपश्यत् ? (३) तदा ब्राह्मणस्य भार्या किमर्थम् वह्नौ पतन्तं शिशुं न न्यवारयत् ? (४) ततः सा वैश्वानरम् किमप्रार्थयत् (५) ततः समुत्थिते भर्तरि सा किमकरोत् ? (६) राजा भोजेन ततः किम् कथितम् ? (७) प्रातःकाले सभायाम् राजा कालिदासम् किमब्रवीत् ? (८) कालिदासेन किम् पठितम् ?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम्:—धारानगरे, विप्रवर, सुप्तोत्थितः, निद्राभङ्गः, सर्वकर्मसाक्षी, अर्धघटिका, ध्यानपरा, यदृच्छया, विस्मयाविष्टः, पूर्वेद्यूः, चन्दनपङ्कशीतलः, चरणत्रयम् ।

(क) निम्नलिखितरूपाणां योग्यप्रकारः प्रदर्शयत : अयात्, उदधरत् ।

(ड) पर्यायशब्दाः दीयन्ताम्-चन्दन, पारितोषिक, एकाकी ।

(१०) नीचः उन्नतपदे न शोभते ।

पुरा किल कस्यचिन्मुनेर्गङ्गायास्तीरे सवितारमुपतिष्ठमानस्याञ्जलौ श्येनस्य मुखात्परिभ्रष्टा काचिन्मूषिका पतिता । कृपालुत्वाच्चासौ तां कमण्डलौ निधायाश्रमं प्रति नीतवान् । मुनेस्तपसः प्रभावेण सा मानुषं रूपमलभत । अथ गच्छता कालेन सा यौवनं प्राप्ता ततः कस्मैचिद् बलवते तां दातुमिच्छन्मुनिः सूर्यं मेघमनिलं च समाह्वयत् आह च । भद्रे सर्वेऽप्येते बलिष्ठास्तेषामन्यतमं पतिं वरयितुमर्हसीति । तदा सूर्योऽवदत् । मुने प्रकृत्या दाहकतमोऽहम् । अतः इयं सा कन्या मेघं वरयतु ।

मेघः खलु मत्तोऽपि बलीयान् यतोऽयमुच्चैस्तमे आकाशे चरन्तमपि मां क्षणेन सर्वत्र स्थगयतीति । ततो मेघस्तमाह । बालेऽहं जलमयः प्रकृत्या शीततमः वायुस्तु मत्तोऽपि शक्तिमत्तरो य एष नित्यं मामवशं दिक्षु विक्षिपतीति । ततो वायुराह । यत्प्रकृत्या चञ्चलोऽहमद्रयस्तु मत्तोऽपि गरीयांसस्तेषामेकतमं वरयतु भवती । ततः कन्यायाः अपि तादृशमेवाभिप्रायं विदित्वा हिमवन्तं नगाधिराजं मुनिराह्वयत् । हिमवानप्यात्मनोऽचलत्वं स्थविष्ठं च निन्दन्नेवमाह । बाले ! मत्तो मूषकाः श्रेष्ठतरा यतस्ते निशिततमैर्दन्तैर्नित्यमेव ममाङ्गानि निकृन्तन्ति छिद्रितश्च तैरहं सर्वत इति । अथ तस्य तेन वचनेनातितरां हृष्टा मानुषीभावं विस्मृता स पितरमाह । भगवन्नस्तु मे मूषक एव पतिर्नाहमन्यं कमपि वरयेयमति । मुनिस्तु तस्यास्तेनासाधुना निर्बन्धेन क्रुद्धः क्षणेन तां मूषिकां कृत्वा दवीयसि विले व्य सृजत् ।

—शब्दकोशः—

उपतिष्ठमान-worshipping (उप+स्था, वर्त. कृ.)-पूजा करना
निशित (वि) sharp-तीक्ष्ण,
जलमय-(वि) watery-पानीवाला.
अवस्थान-(न.) residence -निवास,
मानुषीभाव-(न.) the feeling of a man-मनुष्यका भाव.
निर्बन्ध-(पुं) obstinacy -दुराग्रह.

स्वाध्याय

(अ) प्रश्नो :— (१) कदा मुनिना मूषिका प्राप्ता ? (२) मुनिना तपसः प्रभावेण मूषिका किमलभ्यत ? (३) गच्छता कालेन मुनिः कानाह्वयत्? किमर्थम् तानाह्वयत्? (४) सूर्यः मूषिकार्थम् मुनिम किमवदत्? (५) ततः मेघेन किम् कथितम्? (६) ततः वायुना किम् कथितम्? (७) ततः हिमवता किम् कथितम्? (८) पश्चात् मूषिकया मुनिः किमुक्तम्? (९) अन्ते मुनिना किम् कृतम्?

(ब) निम्नलिखितसमासानां नामसहितविग्रहः क्रियताम् :

जलमयः, अचलत्वम्, नगाधिराजम् ।

(क) निम्नलिखितरूपाणां योग्यप्रकारः प्रदर्शयत—स्थगयति, शीततमः, शक्तिमत्तरः, हिमवन्तम्, निशिततमैः, स्थविष्ठम्, दवीयसि ।

(ङ) पर्यायशब्दाः दीयन्ताम् :
कमण्डलु, क्षणः, चञ्चलम् अतिरिक्त, संहृत, प्रवृद्धम् ।

(११) लालबहादुरशास्त्री

लालबहादुरशास्त्रीमहोदयानां जन्म चतुरधिकनवदशशततमे ख्रिस्ताब्दे द्वितीयदिनाङ्के उकटूबरमासे मुगलसरायनगरेऽभवत् । तस्य पिता शारदाप्रसादश्रीवास्तवमहोदयः धनिको नासीत् किंतु कुलीनः सत्शीलश्चासीत् । पूर्वं सोऽध्यापकोऽसीत् पश्चात् राजस्वविभागे तस्य लिपिकारपदे नियुक्तिरभवत् । यदा शास्त्रिमहोदयानामायुः सार्धैकमासीत् तदा तस्य पितुर्निधनोऽभवत् । तस्य माता रामदुलारी तस्य संवर्धने तत्पराऽसीत् । अथैकस्मिन् दिने प्रयागतीर्थे माता रामदुलारी स्नानार्थं गता तदा स मेलायाः संभ्रान्तेन इतस्ततः परिभ्रिष्टोऽभवत् । भाग्यवशाद् पश्चात् स प्राप्तः । यदा स प्राथमिककक्षायां पठति तदा स गङ्गायाः पारं करोति । क्वचित् मेलायाः दर्शनार्थम् गङ्गाम् तीर्त्वा प्रतितटम् गच्छति यतः नावः शुल्कं दातुं स समर्थो नासीत् । दशमे वर्षे षष्ठकक्षायाम् उत्तीर्णो भूत्वा वाराणसीं माध्यमिकशालाया पठितुं स गतः । तत्र मातृष्वसुर्गृहे उषित्वा माध्यमिककक्षायाम् पठनं प्रारब्धम् तस्य मातृष्वसुः पतिः रघुनाथप्रसादमहोयः उदारो निष्कामो चासीत् । आर्थिकसङ्कटेष्वपि स सत्शोलो तथा तपस्वी चासीत् । सन्तसमागमेन तस्य जीवनं निर्मलमासीत् । तस्य निर्मलजीवनस्य प्रभावेण लालबहादुरोऽपि तपस्वी अध्ययनशीलो तथा च श्रमशीलोऽभवत् । गणितशिक्षायां तस्य गतिः काचिदासीत् किंतु आङ्गलाभाषाशिक्षायाम् तस्य गतिः श्रेष्ठासीत् । अतः निरीक्षकस्याग्रे सः आङ्गलाभाषायाः आदर्शपठनम् कर्तुम् स अध्यापकेनाव्रियत । तेन स सर्वतः प्रशंसाप्नोत् ।

तस्मिन् समये लोकमान्यतिलकस्यागमनं वाराणस्यामभवत्, तस्य भाषणं श्रोतुम् स्वग्रामात् सः ऋणं कृत्वा वाराणसीमागतः । तत्र लोकमान्यः 'स्वराज्यमस्माकं जन्मसिद्धोऽधिकारो प्रवर्तते' इति स्वोद्बोधने जनसभायामाचष्ट । तदनन्तरं महात्मागान्धी दक्षिणाफ्रीकातः स्वदेशमायात् । षोडशाधिकनवदशशतमाब्दे वाराणस्यांलोर्डहार्डिज (Viceroy)

हिंदुविश्वविद्यालयभवनस्य शिलान्यासम् कर्तुमायात् । तस्मिन् समये दरभंगामहाराजाध्यक्षपदेऽसीत् तथा च महात्मागान्धी मदनमोहनमालवीयस्य महेच्छया उपस्थितोऽसीत् । तत्र तेन महात्मागान्धीदर्शनस्य पुण्यमलभ्यत तथा च तस्य स्वदेशीभावना स्वराज्यचर्चायाश्च भाषणं श्रुत्वा तस्य कोमल-हृदयं महात्मागान्धीतेजसः प्रभावितोऽभवत्, तदनन्तरं भारतसेवासमित्या बालवीरदले (स्काउटदले) सम्मिलितोऽभवत् । अतः लोकसेवकरूपेण राष्ट्रीयकार्येषु स निमग्नोऽभवत् । यदा स हरिश्चन्द्रहाईस्कूले पठति स्म तदा गोपालकृष्णगोखले, बिपिनचन्द्रपालः, सुरेन्द्रनाथबनर्जी, बालगंगाधरतिलक, महात्मागान्धीनाम् भाषाणानि प्रतिदिनम् समाचारपत्रे पठति स्म । तेषामाध्ययेन तस्यात्मा राष्ट्रीयभावनाभिर्विकासशीलोऽभवत् । विशत्यधिकनवदशशतमे खिस्ताब्दे महात्मागान्धी वाराणसीं पुनरागच्छत् । तदा तस्य भाषणं श्रुत्वा सत्याग्रहान्दोलने सम्मिलितुम् दृढनिश्चय्यभवत् । शेषं पञ्चममांगे ।

: शब्दकोश :

राजस्व–(पुं) tax-कर, छिपिकार–(पुं.) clerk–कर्मचारी

: स्वाध्याय :

(अ) प्रश्नाः– (१) लालबहादुरशास्त्रिमहोदयानां जन्म कदा कुत्र चाभवत्? (२) तस्य पितुर्निधनं कदाभवत्? (३) किमर्थम् स गङ्गायाः पारं करोति? (४) तस्य जीवनमध्ययनशीलो श्रमशीलो च कथमभवत्? (५) आदर्शपठनम् कर्तुम् अध्यापकेन तस्य किमर्थमाग्रियत? (६) वाराणस्याम् कस्यागमनमभवत्? तेन किम् सूत्रमदीयत? (७) महात्मागान्धी कदा वाराणस्यामायात्? (८) तस्य कोमलहृदयम् कथम् राष्ट्रीयभावनाभिराप्लुतोऽभवत्? (९) सत्याग्रहान्दोलने सम्मिलितुम् कदा सः दृढनिश्चय्यभवत्?

(ब) निम्नलिखित समासानांनामसहितविग्रहः क्रियताम् :—

लिपिकारपदे, प्रयागतीर्थं, सन्तसमागमेन, गणितशिक्षायाम्, जन्मसिद्ध, महात्मा, दृढनिश्चयी, समाचारपत्र ।

(क) पर्यायशब्दाः दीयन्ताम् :–

राजस्वम्, लिपिकारः, श्रेणी, श्रम, निरीक्षक, पवित्रम् ।

[४] पद्य -- विभागः ।

(१) दमयन्त्याः स्वयंवरः

(१) आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ॥ ॥

(२) आतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
ब्रह्मण्यो वेदविच्छूरो निषधेषु महीपतिः ॥

(३) तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर्युक्तो वत्सलः संयतेन्द्रियः ॥

(४) दमयन्ती तस्य कन्या रूपेण तेजसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप्नोत् सुमध्यमा ॥

(५) अतोवरुपसंपन्ना श्रीरिवायतलोचना ।
न देवेषु न यक्षेषु तादृग्रूपवती क्वचित् ॥

(६) नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि ।
कन्दर्प इव रूपेण मूर्तिमानभवत्स्वयम् ॥ ॥

(७) तस्याः समीपे तु नलं प्राशंसंस्ते कुतूहलात् ।
नैषधस्य समीपे च दमयन्ती पुनः पुनः ॥

(८) अथैकदा बिहाराय नल आसीद्वनं गतः ।
तत्रैकं स्वर्णदेहं स हसं हस्ते गृहीतवान् ॥

(९) ततोऽन्तरिक्षगो दीनो नलं वाचमुदैरयत् ।
' हन्तव्योऽस्मि न ते राजन् करिष्यामि तव प्रियम् ॥

(१०) दमयन्त्याः सकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥

(११) एवमुक्तस्ततो हंसममुञ्चत्स महीपतिः ।
स तु सत्वरमुत्पत्य विदर्भान् गतवान् खगः ॥

(१२) दमयन्ती तदा हंसं दृष्टवा हृष्टा मनोहरम् ।
ग्रहीतुं प्रमदाऽग्रावत् खगं तं ललितागतिः ॥

(१३) स मानुषीं गिर कृत्वा भीमकन्यामथाब्रवीत् ।
'दमयन्ति नलो नाम निषधेषु महीपतिः ॥

(१४) कन्दर्परूपेण रामवद्धन्विनां वरः ।
तस्य वा यदि भार्या त्वं भवेथा वरवर्णिनि ॥

(१५) सफलं ते भवेज्जन्म रुपं चेदं सुमध्यमे ।
रामेण सङ्गता सीता विष्णुना च यथा रमा ॥

१६) त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन सङ्गमो गुणवान् भवेत् ॥

(१७) एवमुक्ता तु हंसेन दमयन्ती तमब्रवीत् ।
नृवराय नलाय त्वं कथयस्त्र तथैव माम् ॥

(१८) तथेत्युक्त्वाऽण्डजः कन्यां भीमस्य मृदुभाषिणीम् ।
निषधान् पुनरागम्य नले सर्वं न्यवेदयत् ॥

(१९) अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आह्वयत् स महीपालान् भीमो राजा स्वयंवरे ॥

(२०) तदा सर्वे क्षितीशां हि दमयन्तीमभीप्सवः ।
अविशन् मण्डपं दिव्य महासिंहा गुहामिव ॥

(२१) दमयन्ती ततो रङ्गं प्राविशत् सा शुभावना ।
मुष्णती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥

(२२) सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।
नैषधं वरमायास भैभी धर्मेण पाण्डव ॥

(२३) विलज्जमाना वस्त्रान्ते अगृहणातायतलोचना ।
स्कन्धदेशेऽसृजत्तस्य स्त्रजं परमशोभनाम् ॥

(२४) ततो हाहेति सहसा मुक्तशब्दो नराधिपैः ।
देवैर्महर्षिभिस्तत्रं साधुसाध्विति भारत ॥

: शब्दकोश :

शार्दुल (पुं) tiger–वाघ,
प्रतिमा (स्त्री.) similar–तुल्य,
नैषध–(पुं) the son of the king of Naishado country–निषध देशके राजा.

उदैरयत्–(उद्+ईर्) spoke –कहा.
वरर्णिनी–beautiful maiden of best complxion–सुंदर रंगवाली स्त्री.

भैमी-.he daughter of the king Bhim-भीम राजाकी पुत्री.

स्वाध्याय

(अ) प्रश्ना :—(१) नलः कस्याम् विद्यायाम् कोविदः ? (२) दमयन्ती कस्य पुत्री आसीत् ? (३) कीदृशो सा आसीत् ? (४) हंसः नलम् किमकथयत् ? (५) तं हंसं दृष्टवा दमयन्ती किमकरोत् ? (६) हंसः ताम् किमब्रवीत् ? (७) भीमो राजा कानाह्वयत् ? (८) रङ्गे सा किममुष्णात् ? (९) स्वयंवरे सा कं वरयामास ?

(ब) निम्नलिखितसमासानां विग्रहः क्रियताम् :—
अश्वकोविदः, मनुजेन्द्राणाम्, आयतलोचना, अन्तरिक्षगः अण्डजः ।

(२) सुभाषितानि

विद्या

(१) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

(२) श्रियः प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः ॥

(३) द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसं दृष्टवा सुधा भीता दिवं गता ॥

(४) खिन्नं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा ।
श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ॥
अज्ञाञ्ज्ञानवतोऽप्येनेन हि वशीकर्तुं समर्थो भवेत् ।
कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः सङ्ग्रहः ॥

(५) नायं प्रयाति विकृतिं विरसो न यः स्यान्न क्षीयते
वहुजनैर्नितरां निपीतः ।
जाड्यं निहन्ति रुचिमेति करोति तृप्तिं नूनं
सुभाषितरसोऽन्यरसातिशायी ॥

(६) मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डमः करिणो हस्तिपकापहतः क्वणन् ॥

क्रिया

(७) शास्त्राण्यधीत्यापि भवन्ति मूर्खाः ।
यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥

(८) न स्वल्पमप्यध्यवसाय भीरोः ।
करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितोऽपि
प्रकाशयत्यर्थमिह प्रदीपः ।

(९) को वीरस्य मनस्विनः स्वविषयः, को वा विदेशस्तथा ।
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते ।
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्यात्मनः ॥

(१०) उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥

(११) मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायसो नाभिजातः ।
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥

(३) सज्जनाः

(१२) अहो किमपि चित्राणि चरित्राणि महात्मनाम् ।
धनं तृणाय मन्यन्ते तद्भारेण नमन्त्यपि ॥

(१३) नारिकेलसमाकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये बदरिकाकाराः बहिरेव मनोहराः ॥

(१४) मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम् ।
मनयेस्कं वचस्येकं कर्मण्येकं महात्मनाम् ॥

(१५) अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥

(१६) शरदि न वर्षति गर्जति वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते न वदति सुजनः करोत्येव ।

(१७) सज्जनस्य हृदयं नवनीतं यद्वदन्ति कवयस्तदलीकम्
अन्यदेहविलसत्परितापात् सज्जनो द्रवति नो नवनीतम् ॥

(१८) शुद्धः स एव कुलजश्च स एवं धीरः ।
श्लाघ्यो विपत्स्वपि न मुञ्चति यः स्वभावम् ।
तप्तं तथा दिनकरस्य मरीचिजालैर्देहं ।
त्यजेदपि हिमं न तु शीतलत्वम् ॥

(४) दुर्जनाः

(१९) संवर्धितोऽपि भुजगः पयसा न वश्यः
स्वान्पालकानपि निहन्ति बलेन सिंहः ।
दुष्टः परैरुपकृतस्तदनिष्टकारी
विश्वासलेश इह नैव बुधैर्विधेयः ॥

(५) स्वभावः

(२०) न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः
स्वभाव एवात्र तथातिरिच्यते तथा प्रकृत्या गवां पयः ॥

(२१) व्याघ्रः सेवति काननं सुगहनं सिंहो गुहां सेवते ।
हंसः सेवति पद्मिनीं बिकसितां गृधः श्मशानस्थलीम् ॥
साधुः सेवति साधुमेव सततं नीचोऽपि नीचं जनं
यो यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ।

(६) सत्सङ्गति :

(२२) महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥

(२३) कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥

(२४) कल्पद्रुमः कल्पितमेव सूते सा कामधुक् कामितेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते सतां तु सङ्गः सकलं प्रसूते ॥

(२५) असज्जनः सज्जनसङ्गिसङ्गात् करोति दुःसाध्यमपीह साध्यम्
पुष्पाश्रयात् शम्भुशिरोऽधिरुढा पिपीलिका चुम्बति चन्द्रबिम्बम् ॥

(७) चित्रश्लोका:

(२६) [1]पर्वताग्रे रथो याति भूमौ तिष्ठति सारथि:
चलते वायुवेगेन पदमेकं न गच्छति ॥

(२७) [2]कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी ।
पञ्चभर्त्री न पाञ्चालि यो जानाति स पण्डित:

(२८) [3]वृक्षाग्रवासी न च पक्षराजस्त्रिनेत्रधारी न च शङ्करोऽयम् ।
त्वग्वस्त्रधारी न च सिद्धियोगी जलं च बिभ्रन्न घटो न च मेघ: ॥

(२९) [4] गोलं निचोलं परिधाय वाढम् धर्मेषु वर्षास्वपि संचरामि ।
धन्यस्य हस्ते च बिभर्मि शोभामाख्योहि शीघ्रं मम नामधेयम् ॥

(३०) [5]पीनं नवीनं सरसं सुवर्णं, वर्तुलं चित्तविलोभनं च ।
बालस्य वृद्धस्य यूनः कान्तासु शाखासु भवामि कोऽहम् ॥

(३१) [6]धावामि नित्यं चरणौ न मे स्तः
श्रृणोमि सम्यक् श्रवणे न मे स्तः ।
व्यापाद्य गच्छामि विषं न शस्त्रं
देवो न शमनः कोऽहं कृतान्तः ॥

(८) सामान्यनीतिः

(३२) पुराणमित्येव न सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेय बुद्धिः ॥

(३२) दाक्षिण्यं स्वजने दया परजने शाठयं सदा दुर्जने ।
प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा परिजने नारीजने धूर्तता ।
ये चैवं पुरुषा कलासु कुशलास्तेष्वेव लोकस्थितिः ॥

(३४) करे श्लाघ्यत्यागः शिरसि गुरुपादप्रणयिता ।
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयोः ।
विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥

  

---

(१) कुलालस्य चक्रदण्डौ (२) लेखनी (३) नारिकेलफलम् । (४) छत्रम्
(५) आम्रफलम् (६) सर्पः

[५] गीता-विभागः (Section IV)

द्वितीयोऽध्यायः–(३७–७२)

(१) हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ।। ३७ ।।

(1) If you are slain, you will obtain heaven, victorious you will enjoy the earth, therefore Stand up O Son of Kunti, be ready to fighth.

(२) सुखदुःखे समे कृत्वा लाभालाभो जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।। ३८ ।।

(2) Taking as equal pleasure and pain, gain and loss, victory and defeat, and be prepared to fight, you will incur no sin.

(३) एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्धया युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ।। ३९ ।।

(3) O Arjuna, I have been telling you all along about Samkhya yoga i.e. Gyana yoga, now I will tell you about the karma yoga, imbued with which teaching, you will cast away the bonds of action.

(४) नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ।। ४० ।।

(4) In this there is no loss of effort, nor is there transgression. Even a little practice of this knowledge protects from great fear.

(५) व्यवसायात्मिका बुद्धिरेके कुरुनंदन ।
बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ।। ४१ ।।

(5) The determinate reason is but one-pointed, o joy of the kurus, many-branched and endless are the thoughts of the irresolute.

(६) यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ।
वेदबादरता: पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥

(6) Flowery speech is uttered by the foolish, rejoicing in the letter of the vedas, O partha, saying, " There is naught but this. "(स्वर्ग)

(७) कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ॥
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

(7) Those whose souls are full of desire, with heaven as their goal, they are indulged in birth as their fruit of action and preseribe many and various cenemonies for the attainment of pleasure and lordship.

(८) भोगैश्वर्यप्रसक्तानां तथापहृतचेतसाम् ।
व्ययसायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

(8) For them who cling to pleasure and lordship, whose minds are captivated by such teaching, is not designed this determinate Reason, on contemplation steadily bent.

(९) त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥ ४५ ॥

(9) The vedas deal with the three atributes, be thou above these attributes, O Arjuna, beyond the pairs of opposites, ever steadfast in purity, careless to possess or preserve full, of the self.

(१०) यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

(10) All the vedas are as useful to an as enlightened Brahman, as is a tank in a place covered all around with water.

(११) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥ ४७ ॥

(11) You have to do action only, never indulge in fruits, so let not the fruit of action be your motive nor be you to inaction attached.

(१२) योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ।
सिद्धयसिद्धयोः समो भूत्वा समत्वं योग उच्यते ॥ ४८ ॥

(12) O Arjuna, you should perform action, by yoga—seated, having abandoned the attachment, your mind should be one in success and failure, as equality is called yoga.

(१३) दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौशरणमन्विच्छकृपणाः फलहेतवः ॥ ४९ ॥

(13) Action (with fruits) is lower than the yoga of discrimination, O Arjuna, take thou refuge in the Pure Reason, pitiable are they who work for fruit.

(१४) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

(14) Having avoided the effects of both good and evil deeds endowed with the pure reason, therefore, cling you to yoga,yoga is a true skill in deeds.

(१५) कर्मजं बुद्धियुक्ता हि फलंत्यत्त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

(15) The sages, united to the pure reason reounce the fruit which action yieldeth, and, liberated from the bonds of birth, they go the the blissful seat.

(१६) यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतयन्स्य श्रुतस्य च ॥ ५२ ॥

(16) When the mind shall escape from the tangle of delusion, then yon shall rise to indifference as to what has been heard and shall be heard.

(१७) श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥

(17) When your mind, bewildered by the vedas, shall stand immovable, adsorbed in contemplation, then shall you attain unto yoga.

अर्जुन उवाच ।

(१८) स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

(18) Arjuna said, what is the mark of him who is stable of mind, steadfast in contemplation, O Kesheva? how does the stableminded talk, how does he sit how does he walk?

श्रीभगवानुवाच

(१९) प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

(19) The Blessed lord said, when a man abandons O Partha, all the desires of the heart, and satisfied in the Self by the Self, then is he called stable in mind.

(२०) दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

(20) He whose mind is free from anxiety and pains, indifferent amid pleasures, loose he from passion fear and anger, he is called a sage of stable mind.

(२१) यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

(21) He who on every side is withouat attachment, whatever happens fair or foul, who neither likes and dislikes of the understanding of such a one is well-poised.

(२२) यदा संहरते चायं कर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

(22) When again, as a tortoise draws in from all sides its limbs he, withdraws his senses from the objects of senses, then his understanding is well–poised.

(२३) विषया विनिवर्तन्ते निहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

(23) Sense-objects cease for him, who does not enjoy them with his senses, but the taste for them persists. This relish also disappears in the case of the man of stable mind, when he sees the supreme.

(२४) यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

(24) Turbulent by nature, the senses even of a wise man who is practising self–control, forcibly carrises away his mind, Arjuna.

(२५) तानि सर्वाणि संयभ्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

(25) Having restrained them all, he should sit harmonised devoting oneself heart and soul to Me. For the mind of the man whose senses are mastred has become stable.

(२६) ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥ ६२ ॥

(26) The man dwelling on sense-objects, develops attachment for them, from attachment springs up desires, and from desire (unfulfilled) ensues anger.

(२७) क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

(27) From anger arises infatuation from infatuation, confusion of memory, from confusion of memory loss of reason and from loss of reason one goes to complete ruin.

(२८) रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥

(28) But the Self-cotrolled practicant, while enjoying the various sense-objects through his senses, which are disciplined and free from likes and dislikes, attains placidity of mind.

(२९) प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

(29) With the attainment of such placidity of mind, all his sorrows come to an end, and the intellect of such a person of tranquil mind, soon withdrawing itself from all sides, becomes firmly established in God.

(३०) नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥

(30) There is no pure Reason for the non-harmonised, nor for the non-harmonised is there concentration, for him without concentraction there is no peace, and how can there be happiness for one lacking peace of mind.

(३१) इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ३७ ॥

(31) As the wind carries away a barge (ship) upon the waters, even so of the wandering senses, the one to which the mind is joined takes away his discrimination.

(३२) तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥

(32) Therefore, Arjuna, the mind of the man, whose senses are completely restrained from their objects, is stable.

(३३) या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥

(33) That which is night to all beings, in that state (of Divine Knowledge and Supreme Bliss) the God-realised Yogi keeps awake. And that (the ever changing, transient worldly happiness) in which all beings keep awake is night to the seer.

(३४) आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥७०॥

(34) As the waters (of differant rivers) enter the ocean, which though full on all sides remains undistrubed, likewise he, in whom all enjoyments merge themseves, attains peace, not he, who hankers after sueh enjoyments.

(३५) विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥

(35) He who gives up all desires and moves free from attachment, egoism and thirst for enjoyment, attains peace.

(३६) एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥

(36) Arjuna, such is the state of the God-realised soul, having reached this state he overcomes delusion. And established in this state, even at the last moment, he attains Brahmic Bliss.

*

[६] पर्याय—शब्दकोशः ।

I – [४०] (४४७) चक्रम्, रथाङ्गम् । (४४८) प्रभावः–प्रतापः । (४४९) मूर्च्छा–कश्मलम्, मोहः । (४५०) शोकः–मन्युः, शुक् । (४५१) युद्धम् – आयोधनम्, सङ्ख्यम्, समरः, अनीकः, रणः, विग्रहः, कलिः, संयुग, संग्रामः, आहवः, संयत्, आजिः, युत् । (४५२) वियोगः–विरहः, विप्रयोगः, विश्लेषः, विभेदः, व्यतिरेकः (४५३) अपराधः – आगः, मन्तु । (४५४) कणः – लवः, लेशः, अणुः । (४५५) आर्द्रम् – सार्द्रम्, क्लिन्नम्, स्तिमितम्, समुन्नम् । (४५६) वीर्यम् – बलम्, सामर्थ्यम् । (४५७) तृष्णा – स्पृहा, वाञ्छा, पिपासा । (४५८) तेजः – प्रभावः । (४५९) ओजः – दीप्ता, बलम् । (४६०) वधः – निवर्हणम्, निषूदनम्, निर्हिसनम्, मारणम्, प्रतिघातनम्, घातः । (४६१) स्वजनः – सगोत्रः, बान्धवः, ज्ञातिः, बन्धुः । (४६२) स्वेदः – घर्मः, निदाघः । (४६३) प्रीतिः- प्रमदः हर्षः, प्रमोदः, आमोदः, आनन्दः, शम, सातम्, सुखम् । (४६४) उपाधिः – कुटुम्बव्यापृतः, अभ्यागारिकः । (४६५) घृणा- जुगुप्सा निन्दा । (४६६) मेघमाला कादम्बिनी, । (४६७) अमर्षणः– क्रोधनः, कोपी । (४६८) रक्षितम्–त्रातम्, त्राणम्, गोपायितम्, गुप्तम् ।

II – [४१] (४६९) ऋत्विजः – याजकः । (४७०) ऋक्–साम, यजुः इति त्रयो वेदाः मिलितास्त्रयीं ज्ञया 'ऋक्' शब्दाः । (४७१) भिषक्– वैद्यः, चिकित्सकः । (४७२) व्याधितः– आमयावी, विकृतः, अपटुः, आतुरः । (४७३) वधूः–जाया, भार्या । स्नुषा–पुत्रस्य पत्नी । (४७४) वरः–वृतिः । (४७५) वारुत्–वल्ली, लता, प्रतानिनी । गुल्मिनी उलपः । (४७६) उपानत् – पादुका, पादूः । (४७७) हृदयम् – हृद् । (४७८) शकृत् – उच्चारः, अयस्करः, शमलम्, पुरीषम्, विष्ठा, विट् । (४७७) यकृत् – कालखण्डम् । (४८०) प्राची – पूर्वा । (४८१) पुरुम् – मस्तम् । (४८२) हास्यम्–हसः,

हासः। (४८३) वृश्चिकः – शूक्कीटः। (४८४) पुच्छम् – लूमम्, लाङ्गूलम् । (४८५) तेजः – वर्चः ।

III–[४२] (४८६) पतिः – धवः, प्रियः, पतिः, भर्ता। (४८७) जरा – विस्त्रसा (४८८) अस्थि – कीकसम्, कुल्यम् । (४८९) ग्रामणी – ग्रामाधिपः । (४९०) स्पर्धा – अहमहमिका, संघर्षः, विजिगीषा (४९१) प्रतिस्पर्धिन् – प्रतिपक्षः, प्रतियोगी, प्रत्यर्थी। (४९२)औषधम्–रोगहारित्वमात्रं प्रतीयते, औषधी–फलपाकान्तानाम्। (४९३) पुनर्भूः-दिधिषूः। (४९४) नीतिज्ञः–नीतिविद्, नयविद्, नीतिचतुरः– निपुण। (४९५) नीतिः– नयः, राजनीतिः। रीतिः, मार्गः। (४९६) अर्थः – अभिधेयः । (४९७) कुशलः – प्रवीणः, निपुणः, अभिज्ञः, विज्ञः, निष्णातः, शिक्षितः, वैज्ञानिकः, कृतमुखः, कृती। (४९८) विधवा - विश्वस्ता । (४९९) उशनाः – शुक्रः, दैत्यगुरुः, काव्यः, भार्गवः, कविः । (५००) मायाविन्–ऐंद्रजालिकः, मायाकारः, मायी, अभिचारी। योगी सिद्धः। (५०१) उत्पलम्–कुवलयम्। (५०२) पथ्य – आरोग्यवाह हितावह। (५०३) संवर्धनम् – पोषणम्, – पालनम्, भरणम्, पौष्टिकम् । (५०४) पलायनम् – गूढव्यसर्पणम्। (५०५) लोकः – भुवनम्, जनः। (५०६) व्यापारः– व्यवसायः, व्यवहारः। नियोगः, कार्यम्, अर्थः, कृत्यम्, कर्म। (५०७) रसः– रागः, भावः । (५०८) तैलम्–स्नेहः, अभ्यंजनम् । (५०९) कुथः– कुथम्, दर्भः, पवित्रम्। (५१०) गुढम्-गूढम्। (५११) चरः - यथार्हवर्णः, प्रणिधिः अपसर्पः; चरः, स्पशः, गूढपुरुषः। (५१२) अलसः– कर्मविमुखः, अव्यापृत, निरुद्योग, निरुद्यम्, निरुत्साह। (५१३) दाक्षिण्यम्–विनयः शिष्टता, सभ्यता, सुशीलता, सौजन्यम्, अनुरोधः, शिष्टाचारः। (५१४) राज्यतन्त्रम् – शासनम् परिपालनम् ।

V – [४४] (५१५) यज्ञः – सवः, अध्वरः, यागः, सप्ततन्तुः, मखः, ऋतुः। (५१६) संतापः – संज्वरः। (५१७) पूर्वाह्नः – पूर्वेद्युः। उत्तरेद्युः, अपरेद्युः, अधरेद्युः अन्येद्युः, अन्यतरेद्युः, इतरेद्युः। (५१८) अमुत्र – प्रेत्य । (५१९) शूरः – वीरः, विक्रान्तः। (५२०) दुर्गतिः – नारकः, नरकः, निरयः । (५२१) हारः – माला, मुक्तावली, सूत्रम्, कंठमाला । (५२२) चातकः – सारङ्गः,

तोककः। (५२३) वृद्धिः – स्फातिः । (५२४) ब्राह्मणः – द्विजातिः, अग्रजन्मा, भूदेवः, वाडवः ।

VI–[४५] (५२५) लुब्धः – लोलुपः, लोलुभः, अभिलाषुकः, तृष्णक् । (५२६) नवनीतम् – नवोद्धतम्, हैयङ्गवीनम् । (५२७) उपवासः – औपवस्तम् । (५२८) स्वदेशः – जन्मभूमिः । (५२९) स्फुटः – प्रफुल्लः । उत्फुल्लः, संफुल्लः, व्याकोशः विकचः, फुल्लः । (५३०) तृणराजः – तालः । (५३१) नालिकेरः – लाङ्गली । (५३२) पूगः – घोण्टा, गुवाकः, खपुरः । (५३३) खर्जूरः-ताली, खर्जूरी । (५३४) वराहः – सूकरः, घृष्टिः, कोलः, पोत्री, किरिः, किटिः, दंष्ट्री, घोणी, क्रोडः, भूदारः । (५३५) चूर्णम् – क्षोदः । (५३६) यात्रा – व्रज्या, अभिनिर्याणम्, प्रस्थानम्, गमनम्, गमः । (५३७) वैदिशिकः – विदेशीयः, पारदेशिकः, विदेशजः (५३८) अर्जितम्– प्राप्तम्, प्रणिहितम्, लब्धम् । (५३९) आकम्पितः – वेल्लितः, प्रेङ्खितः, आधूतः, चलितः धुतः । (५४०) अतिथिः – अभ्यागतः, प्राघुर्णकः, प्राघुणकः, आगतुः । (५४१) पूजा – नमस्या, अपचितिः, सपर्या, अर्चा, अर्हणा । (५४२) शुश्रूषा – परिचर्या, उपासना । (५४३) पर्यटनम् – प्रज्या, अटा । (५४४) जाल्मः – विवर्णः, पामरः, नीचः, प्राकृतः, निहीनः, अपसदः, क्षुल्लकः । (५४५) मृणालम् – बिसम् । (५४६) उत्पथः – कुपथः, विमार्गः ।

VII–[४६] (५४७) धूतम् – त्यक्तम्, हीनम्, विधुतम्, उत्सृष्टम् । (५४८) युक्तम् – औपयिकम्, लभ्यम् भजमानम् अभिनीतम्, न्याय्यम् (५४९) आज्ञा – अववादः, निर्देशः, निदेशः शासनम्, शिष्टिः । (५५०) 'जन्म – जनुः', जननम्, जनिः, उत्पत्ति, उद्भवः । (५५१) जातिः–जातम्, सामान्यम् । (५५२) व्यक्तिः–पृथगात्मा । (५५३) महार्ह – महार्घ, अनर्घ्य, अमूल्य, उत्कृष्ट । (५५४) विह्वलः – विक्लवः । (५५५) व्याकुलः – विहस्तः । (५५६) वञ्चितः–विप्रलब्धः । (५५७) प्रतिबद्धः–मनोहतः, प्रतिहतः, हितः । (५५८) चपलः – चिकुरः । (५५९) सुन्दरम् – रुचिरम्, चारु, सुषमम्, साधु, शोभनम्, कान्तम्, मनोरमम्, रुच्यम्, मनोज्ञम्, मञ्जु मङ्गलम् । (५६०) भगम्–ऐश्वर्यम् । (५६१) संयुक्त–संबद्ध अन्वित, सान्वय, अविच्छेद, अविरत । (५६२) प्रियम्–अभीष्टम्,

अभीप्सितम्, हृद्यम्, दयितम्, वल्लभम् । (५६३) अधमः–निकृष्टः, प्रतिकृष्टः अर्वा, रेफः, कुत्सितः, गर्ह्यः, अणक । (५६४) मलिनम्–मलीमसम्, कच्चरम् मलदूषितम् । (५६५) प्रबन्धकल्पना–कथा (५६६) प्रहेलिका । प्रवहिलका । (५६७) समाहृतिः–संग्रहः । (५६८) किंवदन्ती – जनश्रुतिः । (५६९) शपथः – शपनम् । (५७०) पितृदानम् – निवापः । (५७१) रहस्यम् – गुह्यम् गोप्यम्, मर्मन् । (५७२) सौरभम् – परिमलः, सौरभ्यम्, गंध, वासः, सुगंधः । (५७३) इष्टम् – यत्क्रतुकर्म, तदिष्टम् । (५७४) पूर्तम्–खातादिकर्म ।

VII–[४७] (५७५) मधुः– चैत्रः, चैत्रकः । (५७६) मद्यः –मधु पुष्परसः, क्षौद्रः, माक्षिकः । (५७७) अनश्वरं – अमर, अमर्त्य, अक्षय, अजर, निर्जर, अविनाशिन्, नित्य, सनातन, अनंत, शाश्वत । (५७८) पुरा – पूर्वम् । (५७९) संशयः – विचिकित्सा, संदेहः द्वापरः । (५८०) शरणम् – आश्रयः, संश्रयः गतिम् । (५८१), शरण्यः–आश्रयभूतः, पालकः, रक्षकः, त्राता, प्रपन्नः । (५८२) महिमा–महत्त्वम्, माहात्म्यम् गुरुत्वम्, विपुलता, विशालता । (५८४) क्षयः–अपचयः, ह्रासः । क्षयः – यक्ष्मा, शोषः । (५८५) वल्गा रश्मिः । (५८६) प्रलयः – संवर्तः, कल्पः, क्षयः, कल्पान्तः । (५८७) मोक्षः – मुक्तिः कैवल्यम्, निर्वाणम्, श्रेयः, निःश्रेयसम्. अमृतम्, अपवर्गः । (५८८) सुकर – अनायासः सुखसाध्यता, सुबोध, सुगम, लीला । (५८९) सूत्रम् – वचनम् । (५९०) संमार्जनी – शोधनी (५९१) संमार्जकः–खलपूः, बहुकरः । (५९२) मार्जनम् – ना, मलापहरणम् । (५९३) मलम्–अवकरः, अवस्करः, उच्छिष्टम् । (५९४) आरोहणम्–सोपानम् । (५९५) निश्रेणिः–अधिरोहिणी । (५९६) द्वारम् – द्वाः, प्रतीहारः । (५९७) तोरणम् – बहिर्द्वारम् । (५९८) पुरद्वारम् – गोपुरम् । (५९९) घोषः–आभीरपल्ली । (६००) पक्कणः – शबरालयः । (६०१) रथः – शताङ्गः, स्यन्दनः । (६०२) शकटः – अनः । (६०३) दोला – प्रेङ्खा । (६०४) शिबिका – याज्यानम् । (६०५) रक्षकः – गोप्ता, नाथः, पालकः ।

IX- [४८] (६०६) प्रतिज्ञा – व्रतम्, संकल्पः, शपथः। (६०७) अवगतम्–बुद्धम्, बुधितम्, विदितम्, प्रतिपन्नम्, मनितम्, अवसितम्। (६०८) अङ्गीकृतम्–ऊरीकृतम्, आश्रुतम्, प्रतिज्ञातम्, संगीर्णम्, विदितम्, उपगतम्, स्वीकृतम्। (६०९) अर्चित– अर्हितम् नमसितम्, अपचितम्। (६१०) शुश्रूषित – वरिवसितम्। उपासितम्, उपचरितम्,। (६११) संतापितम्, – संतप्तम् धूपितम्, धूपायितम्, दूनम्। (६१२) हृष्टः – मत्तः, तृप्तः, प्रह्लनम्, प्रमुदितः, प्रीतः। (६१३) छिन्नम्–छातम्, लूनम्, कृत्तम्, छितम्, वृक्णम्। (६१४) भ्रष्टम्-स्त्रस्तम्, ध्वस्तम्, स्कन्नम्, पन्नम्, च्युतम्, गलितम्। (६१५) लब्धम् – प्राप्तम्। भावितम्, आसादितम्। (६१६) मृगितम्, अन्वेषितम्, गवेषितम्, मार्गितम् मृगितम्। (६१७) अवमानितम् – अवगणितम्, अवमतम्, अवज्ञातम् परिभूतम्। (६१८) कथितम्–उक्तम्, भाषितम्, उदितम्, जल्पितम्, आख्यातम् अभिहितम्, लपितम्। (६१९) स्तुतम्-ईलितम्, शस्तम्, वर्णितम्, ईडितम्, जग्धम्, गीर्णम्। (६२०) भक्षितम्–चर्वितम् लीढम्, खादितम्, अन्नम्, ग्रस्तम्, अशितम्, भुक्तम्। (६२१) जङ्घा–प्रसृता। (६२२) जानु – उरुपर्व, अष्ठीवत्। (६२३) सक्थि – ऊरुः। (६२४) कुक्षि – पिचण्डः, जठरम्, उदरम्, तुन्दम्। (६२५) सदस्यः – सभासदः, सभ्याः, सामाजिकाः। (६२६) उत्कर्षः – अतिशयः। (६२७) गर्वः–अभिमानः, अहंकारः। (६२८) सूनृतम् – प्रियसत्यवचनम्। (६२९) वृजिनम् – अरालम् - कुञ्चितम् – जिह्मम्, आविद्धम्, कुटिलम्, भुग्नम्, वेल्लितम्, वक्रम्। (६३०) आर्जवम्, सारल्यम्, दाक्षिण्यम्,। (६३१) शूद्रः–अवरवर्णः, वृषलः, जघन्यः। (६३२) दुर्बलः–अशक्त, अबल, क्षीणबल, निःसत्त्वं, निस्तेजस्, अल्पबलः, दौर्बल्यः। (६३३) सेनापति – सेनानी, वाहिनीपतिः (६३४) हिंस्रः – शरारुः, घातुकः। (६३५) सोन्मादः – उन्मदिष्णुः। (६३६) अविनीतः – समुद्धतः। (६३७) मत्तः – शौण्डः, उत्कटः, क्षीबः। (६३८) कामुकः – कमिता, अनुकः, कामयिता, अभीकः, कमनः, कामनः। (६३९) वश्यः – प्रणेयः। (६४०) विधेय – विनयग्राही वचनेस्थितः आश्रयः। (६४१) विनीत – निभृत, प्रश्रितः। (६४२) धृष्टः – धृष्णक्, वियातः। (६४३) प्रगल्भः– प्रतिभान्वितः। (६४४) शालीनः – अधृष्टः। (६४५) विस्म-

यान्वितः विलक्षः। (६४६) अधीरः—कातरः, कापुरुषः। (६४७) भीरुः—त्रस्तः, भीरुकः, भीलुकः। (६४८) आशंसुः – आशंसिता। (६४९) गृह्यालुः – ग्रहीता। (६५०) पतयालुः – पातुकः। (६५१) लज्जाशील: – अपत्रपिष्णुः। (६५२) अभिवादकः – वन्दारु। (६५३) वर्धिष्णुः – वर्धनः। (६५४) उत्पतिष्णुः – उत्पतिता। (६५५) अलंकरिष्णुः – मण्डनः। (६५६) स्निग्धः—सान्द्रः – मेदुरः। (६५७) ज्ञाता – विदुरः, विन्दुः। (६५८) विकस्वरः – विकासी। (६५९) सहिष्णुः – सहनः, क्षन्ता, तितिक्षुः, क्षमिता, क्षमी। (६६०) जागरुकः – जागरिता। (६६१) शयालुः – स्वप्नक्, निद्रालुः। (६६२) सुप्त – निद्राण, शयितः। (६६३) पराङ्मुख—विमुखः, पराचीनः (६६४) अधोमुखः—अवाङमुखः। (६६५) वक्ता – वदः, वदावदः। (६६६) अनुमतिः – अनुज्ञा – अनुमोदनम्। (६६७) अकिंचन – दरिद्रः, निर्धनः, निःस्वः, दीनः, अधनः।

X– [४९] (६६८) आशा – आकाङ्क्षा, तृष्णा, स्पृहा, आयता। (६६९) विक्रमः – शौर्यम्, अतिशक्तिता। (६७०) बलात्कारः – प्रसभम् हठः। (६७१) छलम् – स्खलितम्। (६६२) उत्पातः – अजन्यम्, उपसर्गः। (६७३) आक्रमणः – अभ्यवस्कन्दनम्, अभ्यासादनम्। (६७४) तिरोहितः – नष्टः, निलीनः। (६७५) दारिद्र्यम् – दैन्यम्, निर्धनता, निःस्वता, दुर्गति, अकिंचनत्वम्। (६७६) विद्वेष – वैरम्, विरोधः। (६७७) पश्चात्तापः—अनुतापः। विप्रतीसारः। (६७८) गाली – आक्रोशः, अपवादः, उपालंभः, अपभाषणम् निंदा। (६७९) शशः – शशकः। (६८०) विषाणः – म्, शृङ्गम्, कूणिका (६८१) विश्लेषण – भेदः। (६८३) पुण्यशील—धर्मशील, धर्मात्मा, शुद्धमतिः। (६८३) नमस्कारः – अभिवंदनम्, प्रणामः, प्रणतिः, प्रणिपातः।

XI– [५०] (६८४) विद्रवः –पलायनम्, प्रद्रावः, संद्रावः, द्रवः अपक्रमः, अपयानम्। (६८५) याचना – अर्थना, याच्ञा, अभिशस्तिः। (६८६) आदरः – संभावना, प्रश्रयः, गौरवम्, सत्कारः, अर्हणा, अर्चा, भक्तिः। (६८७) स्निग्ध – स्नेहशील, प्रणयिन्, सप्रणय, सानुराग, वत्सल। (६८८) सप्रेमम् – स्नेहम्, स्निग्धम्, सानुरागम्। (६८९) मसृणम् – चिक्कणम्, स्निग्धम् (६९०) श्रीमान् –

लक्ष्मीवान्, लक्ष्मणः, श्रोलः । (६९१) यौवनम्–तारुण्यम् । (६९२) शैशवम् – शिशुत्वम् बाल्यम् । (६९३) स्थविरम् – वृद्धत्वम्, वार्धकम् । (६९४) अभिप्रायः–छन्दः, आशयः । (६९५) इङ्गितम्–आकारः, इङ्गः । (६९६) निशितम् – क्ष्णुतम्, शातम् तेजितम् । (६९७) उध्धृतम् समुद्धृतम् । (६९८) वेष्टितम् – वलयितम्, संवीतम्, रुद्धम्, आवृतम् । (६९९) रुग्णम्–भुग्नम् – (७००) वर्तुलम् – निस्तलम्, वृतम् । (७०१) क्षमा – क्षान्ति, तितिक्षा । (७०२) राजसभा – आस्थानीयम्, राजगृहम्, मंदिरम् ।

गद्य–विभाग ।

[१] (७०३) ध्रुवः – उत्तानपादिः । ध्रुवम्–निश्चित, शाश्वत । नक्षत्र विशेषे ध्रुवः । (७०४) वरः देवाद्धृते, श्रेष्ठे त्रिषु, क्लीबं मनाक्प्रिये । (७०५) कुङ्कुमम् – काश्मीरजन्म, अग्निशिखिम् वरम्, वाह्लीकम्; रक्तम्, लोहितचन्दनम् । (७०६) पर्यन्तभूः – परिसरः । (७०७) सेतुः – आलिः । (७०८) वल्मीकम् – वामलूरः, नाकुः ।

[२] (७०९) मृगया – आच्छोदनम्, मृगव्यम्, आखेटः । (७१०) वेदना – संवेदः । (७११) चिता – चित्या, चितिः ।

[३] (७१२) पृथुकः – चिपिटकः । (७१३) व्रीहिः–शालिः, कलमः, नीवारः । (७१४) मुष्टिबन्धः – संग्राहः । मुष्टि–ष्ठी (स्त्री.)

[४] (७१५) नीलम् – नीली, रंजनी, मधुपर्णिका, द्रोणी । (७१६) भाण्डम्–आवपनम्, पात्रम् । (७१७) मृतःपरासुः, प्राप्तपञ्चत्वः, प्रेतः, प्रमीतः । (७१८) परिचित–अभ्यस्त, अभिज्ञ, अभ्यंतर । (७१९) परिचयः – संस्तवः । (७२०) विषण्णः – सशोक, शोकार्त, शोकान्वित, दुःखित, उद्विग्न, दीन, खिन्न, म्लान, अवसन्न, विषण्ण । (७२१) अग्रगः–पुरोगामी, पुरोगः प्रष्ठः, अग्रतः पुरोगः

[५] (७२२) संमुख – पुरः, पुरतः, अग्रे, पुरस्तात् । (७२३) आरम्भ – अभ्यादानम्, उद्घातः । (७२४) शठः – विदग्धः – विप्रलंभकः, कपटी, धूर्तः । (७२५) अन्धः – अदृक् । (७२६) मूर्च्छित – मूर्च्छाल, मूर्तः । (७२७) रेतः–शुक्रम्, तेजः' बीजम्, वीर्यम्, इन्द्रियम् ।

[६] (७२८) तुला – मापनः। (७२९) दैत्यः – असुरः। दैतेय, दनुजः, दानवः, दितिसुतः, सुरद्विषः।

[७] (७३०) भ्रान्ति –मिथ्यामतिः भ्रमः। (७३१) सुरभिः–सुगन्धिः, परिमलः आमोदः।

[८] (७३२) भिन्नः – अन्वतरः, एकः, अन्यः, इतरः। (७३३) आदिः– पूर्वः, पौरस्त्यः, प्रथमः, आद्यः। (७३४) अन्तः – जघन्यम् चरमम्, अन्त्यम्, पाश्चात्यम्, पश्चिमम्। (७३५) निरर्थकम् – मोघम्। (७३६) प्रतिकूलम् – प्रसव्यम्, अपसव्यम्, अपष्ठु। (७३७) संकटम् – संबाधः। (७३८) नखः – पुनर्भवः कररुहः, नखः, नखरः।

[९[(७३९) चन्दनः – गन्धसीरः, मलयजः भद्रश्रीः। (७४० पारितोषिकम् – उपायनम्, प्रतिफलम्। (७४१) एकाकी – एकः, एक्कः।

[१०] (७४२) कमण्डलु – कुण्डी। (७४३) क्षणः - मुहूर्तः, निमिषः, पलम्। (७४४) चञ्चलम् – चलम्, लोलम् चलाचलम्, तरलम् पारिप्लवम्, परिप्लवम्। (७४५) अतिरिक्तः–समाधिकः। (७४६) संहतः – दृढसंधिः। (७४७) प्रवृद्धम् – प्रौढम्, एधितम्।

[११] (७४८) राजस्वम् – भागधेयः बलिः, करः, शुल्कः। (७४९) लिपिकारः – लेखकः, अक्षस्यणः, कायस्थः। (७५०) श्रेणी–कक्षा, वीथी, आलि, आवलि, पङ्क्तिः। (७५१) श्रमः – आयासः। (७५२) निरीक्षक – निरुपकः, अवेक्षकः, कार्यदृष्टा, (७५३) पवित्रम् – पूतम् – तः, प्रयतः, मेध्यम्।

*

Page	Line	Incorrect	Correct
2	6	मद्रगेहे:	मद्गेहे ।
3	14	here is neuter	here is in neuter.
5	29	जातिप्राणिनाम्	जातिरप्राणिनाम् ।
6	9	कुशकाम्	कुशकाशम्
6	29	शकुन्यश्र्व	शकुन्यश्व
7	28	विप्रतिषिद्ध	विप्रतिषिद्धं
9	5	घृतमन्यनं	घृतमन्यैर्न
14	11	तृतुल्य:	पितृतुल्य:
16	11	अभ्याशादामत:	अभ्याशादागत:
34	28	सत्यान्त्यचनकुल	सत्यानमुचिनकुल
35	13	दास:	दास
36	21	निष्कशाम्बि:	निष्कौशाम्बि:
38	16	दोषाया	दोषाया:
41	18	भुक्ते	भुङ्क्ते
43	6	संख्याताहन:	संख्याताह:
44	1	उत्तरसकथन	उत्तरसकथम्
48	14	साव्यति	सीव्यति
48	17	ऊद	ऊर्द
50	30	सप्रसारणम्	संप्रसारणम्
51	10	पर्ययाति	पर्ययति
51	14	दभ–दर्भयतित्ते	दर्भ–दर्भयति–ते ।
54	12	be note	denote
57	23	त्रट	त्रुट्
59	21	fragrant	forest
59	16	आ + चम् (.प.)	आ + चम् (१–.प.)
64	1	वशा	विशा
65	10	विचिश	विदिश्
65	20	पियठिष	पिपठिष्
65	29	द्रह्	द्रुह्
66	6	forth	fourth
66	10	वीरुद्भयाम्	वीरुद्भ्याम्
67	9	छ्वद्भयाम्	छ्वद्भ्याम्

Page	Line	Incorrect	Correct
69	19	प्रायी	प्राची
69	25	प्राः	प्राञ्चः
69	26	प्रायः	प्राचः
69	30	प्रायोः–प्रयाम	प्राचोः प्राचाम्
74	4	peneace	penance
74	25	ह्विवीषि	हवींषि
80	30	तुराषाड्–ह	तुराषाट्–ड्
84	17	पस्कुट	प्रस्फुट
85	16	प्र+सु	प्र+सू
89	27	3rd. P. terminations	terminations of Imp
93	29	इमान वार्ताम्	इमाम् वार्ताम्
95	28	संथमी	संयमी
96	6	ढुराप	दुराप
98	6	मनाधर्मान्	मनोधर्मान्
100	3	तनुथाः	तनुयाः
101	2	नृशंसा	नृशंसो
104	22	फूद्धाः	क्रुद्धाः
106	4	अक्रीणताम्	अक्रीणाताम्
106	4	अक्रीणात	अक्रीणत
106	19	वृ. झृ	वृ, दृ
107	9	स्तम्भनोति	स्तभ्नोति
107	10	स्तम्भनाति	स्तभ्नाति
107	14	विक्राणे	विक्रीणे
112	16	शान्ति	शान्तिं
133	15	अदुग्ध	अद्रुग्घ
134	25	नाश्चापदान्तस्य	नश्चापदान्तस्य
135	1	व्रच्	व्रश्च्
136	22	उड्ढ	उड्ढ
138	6	जागर्तिः	जागर्ति
138	12	तृ. अजाग	तृ. अजागः
139	6	अचकाः–अस्	अचकाः–त्–द्

Page	Line	Incorrect	Correct
140	19	उपेमि	उपैमि
147	30	बद्धमयि	बद्धमपि
150	10	छिनन्तु	छिनत्तु ।
152	6	पिंनष्टि	पिनष्टि–पिनष्टु
153	5	भुङ्क्वताम्	भुङ्क्ताम्
154	8	पाण्डवकौरवानाम्	पाण्डवकौरवाणाम्
154	10	प्रयुज्जन्ति	प्रयुञ्जन्ति ।
155	16	चायेप्त	चाप्येतां
156	20	सम् + पृच (१.प.	सम + पृच् (७.प.)
160	3	सक्दि	सक्थि
160	26	एकचो	एकाचो

Section Second

Page	Line	Incorrect	Correct
1	10	नृपस्याड·क	नृपस्याङ्·के
2	7	समायाम्	सभायाम्
2	15	पयन्तमू	पर्यन्तभूः
5	23	प्रयसखायम्	प्रियसखायम्
7	24	यदनेनानभिज्ञन	यदनेनानभिज्ञजन
7	25	विघयम्	विधेयम्
10	9	होमका	होत्रका
11	19	तत्समर्वहं	तत्सर्वमहं
13	6	विचिन्त्व	विचिन्त्य
13	18	तेनामिहित	तेनाभिहितः
14	20	सुरमिः	सुरभिः
15	12	श्रम	श्रमः
18	12	व्यय सृजत	व्यसृजत्
19	21	निर्मलजीवनत्य	निर्मलजीवनस्य
22	14	दिव्य	दिव्यम्
24	11	वन	वने
27	25	बुद्धिरेके कु रु	बुद्धिरेकेह कुरुनंदन
29	23	फलंत्य त्यक्त्वा	फलं त्यक्त्वा
31	11	विनिवतन्ते	विनिवर्तन्ते
31	22	Carrises	Carries

SOME REFLECTIONS ABOUT THIS SERIES

Review of Keshvaram K. Shastrijee

(Mahamahimopadhyay and Vidyavachaspati)

Having seen the series of four parts of Subodh Sanskrit in Gujarati written by Rasiklal A. Parikh in a lucid style, which has opened the gates of acquiring the treasure of the knowledge of the Sanskrit language and its precious literature. In this series we can find the practical approach of learning Sanskrit grammar and its literature by giving various types illustrations and intellectual exercises, so that the teacher can understand how far the student has grasped it. Just as in the fourth part we can find varied types of illustrations and exercises along with the detailed explanation of the rules of compounds, nouns and verbs etc. So that the students can grasp and digest the forms of them easily and get the mastery over it. In this way the treatment of grammer is made lucid and simple. We can also find the prose, poetry and geeta section and a glossory of synonyms profusely by which the student can get the key for studing its literature easily.

Shree Rasiklal Parikh is trying his best to propagate the Sanskrit language and its literature extensively and intensively by publishing this series of Subodh Sanskit not only in Gujarati but also in English and Hindi The modern age is of computerisation but it is not very cheap to publish such books with the help of computerisation. At the same time the customers of such books are very rare, therefore, such books cannot be published Profusely. Yet it cannot be postponed to be printed and published this type of series for nourishing our Indian culture. It is my

great pleasure to give my blessings upon Rasiklal Parikh who is doing this work enthusiastically for the last so many years with firm determination and faith.

Ahmedabad.
20-2-90.

K. K. Shastree

Review of Shree Hariprasad G. Shastrijee
(B. Sc. Sahityacharya)

I was very eager to find all the five parts of Subodh Sanskrit in English and my anticipation proved the result and I got the fourth part with me and the fifth part is awaited. Thanks are given for the valuable contribution to both the author and the organisation.

Here the book is the digest of the rigid and difficult Panini Sutras that require at least ten years of study under the guiadance of an expert grammarian. The book is well planned and systematically arranged that can help a student to match both the languages Sanskrit and English. The vocabulary is sufficient for readers to make him capable to speak and write in Sanskrit as well as the grand legacy of the literature is to understand. The standard of a student by this set can be equivalent to Shastri in Vyakrana. I may say the sentence about the book that everything important is iucluded and unnecassary is excluded.

'नामूलं लिख्यते किञ्चित् नानपेक्षितम् उच्यते ।'

I wish the students will be in a position to learn and understand the glories of our ancient rich treasure with ease and pleasure by learning this Subodh Sanskrit series.

केन्द्रीय विद्यालय संगठन

KENDRIYA VIDYALAYA SANGATHAN

B D. Tiwari,
Education Officer.

NEHRU HOUSE,
4. Bahadur Snah Zafar Marg.
NEW DELHI-110 001.

I.O. No. F. 1-KVS (Gen.) 73-74.

Dt. 21-12-1973.

Dear Shri Parikh,

I thankfully acknowledge the receipt of the book entitled Subodh Sanskrit (Parts I & II) which you were kind enough to send to me along with your letter dated 28-11-1973 under registered post. I am sorry I could not write to you earlier.

2. I have gone through each page of the book and found it an extremely interesting and useful reading. It is really laudable effort on your part to prepare a sanskrit text book for beginners on modern lines. You have done a yeoman's service in propagating sanskrit language in every nook and corner of the world. I am looking forward to the publication of the second volume of the book (Parts III & IV) with ardent desire and ever increasing interest.

भागद्वयं समुपलब्धमुपायनं ते
उत्कृष्टसंस्कृतसुबोधसुपुस्तकस्य ।
गीर्वाक्प्रचारविषयेऽनुपमः प्रयासः
विज्ञापयामि भवते बहुधन्यवादान् ॥

With kind regards,

Yours Sincerely,
(B. D. Tiwari)



OUR PUBLICATIONS

(1) Subodh Sanskrit Parts 1 to 4 in Gujarati

(2) Subodh Sanskrit Parts 1 to 4 in English

(3) Subodh Sanskrit Parts 1 to 2 in Hindi

(4) Subodh Sanskrit Ramayana (Balkanda)

(5) Subodh Ramayana Parts 1 and 2 in Gujarati

(6) Subodh Mahabharat Parts 1 and 2 in Gujarati

(7) Shiva Mahimna stotra

(8) Stavanmalika in Gujarati

(9) Moonlit English Primer–Parts I and II

BHARTIYA VIDYA

Balajee Road, SURAT